कापि ६

Folios 125 |
Size 34 x 21 cms

ॐ स्वस्ती श्रीगणेशाय नमः षष्ठखंड प्रारभ्यते नमः तद्व हीरिन्द्रादीन्
ब्रह्मादींश्च सम्पुज्य धूपदीपौ दत्वा नैवेद्यं दद्यात् तद्यथा नैवेद्यमानीय
देवाय मूलेन पाद्यं ह्याचमनीयं दत्वा फडिति मंत्रेन नैवेद्यं संप्रोक्ष्य वक्रमु
द्रया अभिरक्ष्य यं इति मंत्रेन दोषसमूहं संशोष्य रं इति दोषं संदह्य ह्रिमक
रसौघधाराभिः पूर्णं वमित्यामृतीकृतं विभाव्य मूलमष्टधा जपेत् ततो
धेनुमुद्रयामृतीकृत्य गंधपुष्पाभ्यां नैवेद्यं संपुज्य देवाय मूलमंत्रेन पु
ष्पाञ्जलिं दत्वा कृताञ्जलिः सन् हविः प्रार्पयेत् अस्य मुखतो महः
प्रसवेदिति विभाव्य स्वाहान्तं मूलमुच्चार्य नैवेद्यजलं दद्यात् ततो मूल
मुच्चार्य एतन्नैवेद्यं अमुकदेवतायै नमः ततो नैवेद्यमुद्रया ॐ
नैवेदयामि भवते जूषाणेदं हरे हविः इति नैवेद्यं समर्प्य अमुक

देवतायै एतज्जलं अमृतापिधानमसीति जलं दत्वा वामहस्ते
ग्रासमुद्रां प्रदर्श्य दक्षिणहस्ते प्राणादिमुद्राः प्रदर्शयेत् यथा
ॐ प्राणाय स्वाहा इति कनिष्ठानामिकाङ्गुष्ठैः स्पृशेत् ॐ अपानाय
स्वाहा इति तर्जनीमध्यमाङ्गुष्ठैः स्पृशेत् ॐ व्यानाय स्वाहा इति मध्य
मानामिकाङ्गुष्ठैः स्पृशेत् ॐ उदानाय स्वाहा इति तर्जनीमध्यमा
नामाङ्गुष्ठैः स्पृशेत् ॐ समानाय स्वाहा सर्वाङ्गुलीरङ्गुष्ठैः स्पृशेत्
ततोऽङ्गुष्ठाभ्यां अनामिकाग्रे स्पृशन् वौं नमः पराय सर्वात्मने अनि
रुद्धाय नैवेद्यं कल्पयामि इति नैवेद्यमुद्रां प्रदर्श्य मूलमन्त्रमुच्चार्य अ
मुकदेवं तर्पयामि इति चतुर्धा संतर्प्य अमुकदेवतायै एतज्जलं अमृ
तापिधानमसीति जलं दद्यात् तेजो देवतामुखे स्थापयित्वा आच
मनीयादिकं दद्यादिति वैष्णवे तु सर्वत्र नैवेद्यदाने अयं क्रमः ततः
ततः सामान्यपद्धतिक्रमेण विसर्जनान्तं कर्म समापयेत् अस्य पुरश्चर
णे षोडशलक्षजपः तथा च विकारलवे प्रजप्येन्मनुमेनं समा
हितं तद्दशांशं सरसिजैर्जुहुयान्मधुराप्लुतैः १
अथ श्रीरामस्य मन्त्रोऽन्यस्तनः सेन्दुबीजं रामाय हृन्मनुः षडक्षरो मधि
भूभुजतां कामदो मनुः २ अस्य पूजा प्रातः कृत्या दिवैष्णवोक्तपीठन्यासं
विधाय ऋष्यादिन्यासं कुर्यात् यथा शिरसि ब्रह्मणे ऋषये नमः मु
खे

2

गायत्रीछन्दसे नमः हृदि श्रीरामाय देवतायै नमः ततः कराङ्गन्यासौ
रां अङ्गुष्ठाभ्यां नमः रीं तर्जनीभ्यां स्वाहा रूं मध्यमाभ्यां वषट्
रैं अनामिकाभ्यां हुं रौं कनिष्ठिकाभ्यां वौषट् रः करतल
करपृष्ठाभ्यां फट् एवं हृदयादिषु रां हृदयाय नमः इत्यादि ततो म
न्त्रन्यासः ब्रह्मरन्ध्रे रां नमः भ्रुवोर्मध्ये रां नमः हृदि मां नमः नाभौ
यं नमः लिङ्गे नं नमः पादयोः मं नमः ततो मूर्तिपंजरादिकं नमः
विधाय ध्यायेत् ॥ कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासि
तं मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि सीतां पार्श्वगतां सरो
रुहकरां विद्युन्निभां राघवं पश्यन्तीं मुकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं
भजेत् ॥३॥ एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कुर्यात् ततः
पीठपूजां विधाय वैष्णवोक्तपीठशक्तिः पीठमनुश्च संपूज्य सीता
भरतलक्ष्मणशत्रुघ्नानां पूजां कुर्यात् तथा चागस्त्यसंहितायां
अजप्त्वा लक्ष्मणमनुं राममन्त्रं जपन्ति ये तज्जप्तस्य फलं नैव प्रयान्ति कुशात्मा
अपि ४ जपनियमस्तु अष्टोत्तरशतं वापि सहस्रं वा समाहितः लक्ष्मण
मनुं जपेद् इत्यादि मन्त्रस्य एवं पूर्वं समुच्चार्य पश्चान्मन्त्रं लक्ष्मणसंयुतं ङेन्ता
यं लक्ष्मणमनुं नमः स्वाहासमन्वितः ५ अङ्गन्यासे नादितो हेतु प्राधान्येन ना
पित्तन्नमः स्वादब्धप्पन्तनो वापि बजा यो राघवस्य ६ एषामपि च के
तव्यासक्रिमक्तिपूर्वे सुमिः ततः पुनर्ध्यात्वा आवाहनादि पंच

पुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजामारभेत् देववामपार्श्वे श्री
सीतायै नमः अग्रे शार्ङ्गाय नमः वामदक्षिणपार्श्वयोः ओं शरेभ्यो न
मः ओं चापाय नमः तद्बहिः केशरेष्वग्न्यादिकोणेषु दिक्षु च ओं हृदया
य नमः इत्यादिना षडङ्गानि पूजयेत् ततो दलेषु पूर्वादिक्षु ओं हनुमते नमः
रवं सुग्रीवाय भरताय विभीषणाय लक्ष्मणाय अङ्गदाय शत्रुघ्नाय जाम्ब
वते दलाग्रेषु धृष्ट्यै नमः रवं जयन्ताय विजयाय सुराष्ट्राय राष्ट्रवर्धनाय
अशोकाय धर्मपालाय सुमन्त्राय ततः इन्द्रादीन् वज्रादींश्च पूजयेत्
ततो धूपादिविसर्जनान्तं कर्म समापयेत् अस्य पुरश्चरणं षड्लक्षजपः
तथा च ॥ ऋतुलक्षं जपेन्मन्त्रं दशांशं कमलैः शुभैः जुहुयाद्विधिवद्धुत्वा ब्रा
ह्मणान्भोजयेत्ततः ७ अयं मन्त्रः षड्विधः तथा च स्वकामशक्तिवाक्
लक्ष्मीताराद्याः पञ्चवर्णकः षडक्षरः षड्विधः स्याच्चतुर्वर्गफलप्रदः ८ ॥
ब्रह्मसंमोहनः शक्रदक्षिणामूर्तिरव्ययः अगस्त्यः श्रीशिवः प्रोक्ता मु
नयोऽत्र क्रमादिमे ९ अथवा कामबीजाद्ये विश्वामित्रमुनिर्मतः छन्दो
गायत्री संप्रोक्तं श्रीरामश्च देवता १० ध्यानपूजादिकं सर्वं कार्यं अगस्त्य
संहितायां षड्वर्णस्यात्मनादिनात्रयाणां पञ्चवर्णके अन्येषां देशिकेन्द्रेण
वर्ज्ये तारकं विना ११ मन्त्रान्तरे जानकीवल्लभायाथ भवेत्पावक
वल्लभा हुमादिरेष कथितो रामचन्द्रो दशाक्षरः १२ तथा च जानकी
वल्लभं ङेन्तं वह्निजाया हुमादिकं दशाक्षरोऽयं मन्त्रः स्याद्वशिष्ठः स्यादृषि
विराट् १३ छन्दश्च देवता रामः सीतापाणिपरिग्रहः आद्यं बीजं द्वि

ठः शक्तिः कामेनाङ्गक्रियामता १४ शिखाललाटभ्रूमध्ये
तालुकण्ठेषु हृद्यपि नाभ्यूरुजानुपादेषु दशार्णान्विन्यसे
न्मनोः १५ ततो ध्यानं अयोध्यानगरे रम्ये रत्नसौवर्णमण्ड
पे मन्दारपुष्पैराबद्धविताने तोरणान्विते १६ सिंहासनस
मारूढं पुष्पकोपरि राघवं रक्षोभिर्हरिभिर्देवैर्दिव्ययानगतैः
शुभैः १७ संस्तूयमानं मुनिभिः सर्वतः परिशोभितं ध्यायेद्देवं
सीतालङ्कृतवामाङ्गं लक्ष्मणेनोपसेवितं १८ श्यामं प्रसन्न
वदनं सर्वाभरणभूषितं ध्यायन्नेवं जपेन्मन्त्रं वर्णलक्षम २८
दशांशं नन्यधीः १९ जुहुयाद्बिल्वपुष्पैर्मधुरसंयुतैः अन्यत्सर्वं
पूर्ववत् मन्त्रान्तरे वह्निर्नारायणो नाद्यो जठरः केवल
स्तथा हृदतोऽयं मन्त्रराजेयं सर्वाभीष्टफलप्रदः २० श्री
मायामन्मथैकैकद्वन्द्वगतो मनुः चतुर्वर्णः स एव स्यात्त्र
द्वर्णी वाद्धिः तत्पदा २१ स्वाहान्तो हुं फडन्तो वा नमोन्तो वा
भवेन्मनुः तारमायारमानङ्गवाक्स्वबीजैस्तु षड्विधः २२
अयं दशाक्षरो मन्त्रराजः स्यात्सर्वाभीष्टफलप्रदः चतुरोऽयं द्वादश
द्वात्रिंशत्तो यं वतुरादेरा २३ रामाय हन्मनुः प्रोक्तो मन्त्र

२ पंचाक्षरः परः । पंचाशन्मातृकावर्णैः प्रत्येकं पूर्वकोम
नुः २४ लक्ष्मीवाग्मन्मथादिस्तु तारादिः स्यादनेक
धा तेन श्रीरामाय नमः इत्यादि षडक्षराः २५ एतेषां
ध्यानपूजादिकं प्रागुक्तषडक्षरवत् ॥ वह्निस्थं शयनं वि
ष्णोरर्धचंद्रविभूषितं एकाक्षरो मनुः प्रोक्तो मंत्रराजः सु
रद्रुमः २६ ब्रह्मा ऋषिः स्याद्गायत्री छन्दो रामस्तु
देवता ॥ एकाक्षरे तु द्वादशलक्षजपः पुरश्चरणं तथा च भानु
लक्षं जपेन्मंत्रं इति वचनात् अन्येषां षडक्षरजपः इति
विशेषः अथ श्रीकृष्णमंत्राः गोपीजनपदस्यान्ते व
ल्लभाय द्विठावधिः अयं दशाक्षरो मन्त्रो दृष्टादृष्टफलप्रदः
अयं मंत्रः कामबीजादिः राशिनक्षत्रचक्रविचारे पुनर्बीज
रहितेन विचारः बीजपूर्वं जपेद्यस्त्वस्य रहस्यं कथितं मुने ॥
लुप्तबीजस्य भावत्वाद् दशाक्षर उदाहृते २७ इति गौतमीयात्
बृहद्गौतमीये [illegible] बीजाद्दशा
क्षराः उक्ता अन्यथा तु न कामबीजो महामुने २८ तद्यो
गात् वल्लभो मंत्रो नान्यथा सिद्धिदो भवेत् अस्य पूजा

विष्णुमंत्रोक्तैव स्वाचमनं कृत्वा प्रातःकृत्यादि ततन्या
सोक्तं कर्म विधाय प्राणायामं कुर्यात् तथा च गौतमी
ये एवं तत्वानि विन्यस्य प्राणायामं समाचरेत् कामबी
जस्यैकवारजपेन दक्षिणनासया वायुं रेचयेत् पुनः सप्त
वारजपेन वामनासया वायुं पूरयेत् ततो नासापुटौ धृत्वा
विंशतिवारजपेन वायुं कुंभयेत् पुनर्वामनासया रेचयेत्
दक्षिणेन पूरयेत् उभाभ्यां कुंभयेत् पुनर्दक्षिणेन रेच
येत् वामेन पूर्य उभाभ्यां कुंभयेत् तथा च एकेन रे
चयेत् कामबीजेनैव पृथक् पृथक् पूरयेत् सप्तजप्तेन
विंशत्या तेन धारयेत् २९ सर्वेषु कृष्णमंत्रेषु बीजेना
नेन वा जपेत् पद्मामूलेनैव मंत्रेण सर्वत्र प्राणायामः
तदुक्तं क्रमदीपकायां पवनसंयमनं स्वमनाचरेत् यमि
हजं मनसो मनुमिच्छती यदि दशाक्षरं जपति तदा दश
क्षरेण चेतस्तु वायुं विंशतिवारं रेचयेत् पूरयेद्वामतस्तद्व
धारयेत् प्रमाणतः ३० प्राणायामो भवेदेको रेचपूरक
कुंभकैः अष्टादशाक्षरेणाष्टादशैवं समाचरेत् ३१ अ
यवान्यमनुभिर्वर्णानुरूपमिति लघुत्वात् तान्मंत्रवर्णसंख्या
रेचकादित्रयं कुर्यात् रेचयेन्मारुतं दक्षपाददिने

साधकः पूरयेद्दाम[illegible]नाड्या पुनर्धारयेदित्यादि ॥
एतत्तु श्रीकृष्णमन्त्रविषयेनान्यत्र ततः पीठन्यासं विधा
य केसरेषु मध्ये च विमलादिपीठमन्वन्तं विन्यस्य ऋष्यादिन्या
सं कुर्यात् तद्यथा शिरसि नारदऋषये नमः मुखे विराट्
छन्दसे नमः हृदि श्रीकृष्णदेवतायै नमः गुह्ये क्लींबीजाय
नमः पादयोः स्वाहाशक्तये नमः मन्त्राधिष्ठातृदेवतायै दुर्गा
यै नमः इति दुर्गां नमस्कुर्यात् ततः प्रणवपुटितं मूलमन्त्रं
करयोर्मध्ये पृष्ठपार्श्वयोश्च त्रिशो विन्यस्य प्रणवपुटितान् स
विन्दून् मूलवर्णान् अङ्गुलीनां पर्वसु नमोन्तान् न्यसेत् ॥
तद्यथा दक्षिणाङ्गुष्ठे त्रिषु पर्वसु ओं गों ओं नमः दक्षिण
तर्जन्यां ओं पीं ओं नमः दक्षिणमध्यमायां ओं जं ओं नमः
"का" दक्षिणानामिकायां ओं नं ओं नमः दक्षिणकनिष्ठायां ओं
वं ओं नमः ओं वामकनिष्ठायां ओं लं ओं नमः वामानामि
मिकायां ओं भं ओं नमः वाममध्यमायां ओं यं ओं नमः ॥
वामतर्जन्यां ओं स्वां ओं नमः वामाङ्गुष्ठे ओं हां ओं नमः अयं
सृष्टिन्यासः एवं दक्षिणाङ्गुष्ठपूर्वी वामकनिष्ठान्तं स्थितिः
संहृतिस्तु वामाङ्गुष्ठादि दक्षिणाङ्गुष्ठान्तं पुनः सृष्टिस्थिती एवं
वधा कुर्यात् तथा च गौतमीये संहृतिर्द्वेषसंघानां हारणी

परिकीर्तिता विद्यापुरश्चस्य सृष्टा न्तो वर्णिनो गृहवेतसां २१
स्थित्यन्तः स्याद् गृहस्थानां त्रयं कामानुरूपतः सहजा
नो वा न पुरुषो स्थित्यन्तं कश्चिदिच्छति २२ संहारान्तो मु
नीनां च विरक्तस्य च सर्वतः अथ शक्ताश्च देहमात्रं कुर्यात्
तथा च न्यसेत्त्रयं सदा कुर्यात् दशाक्षरा एवकी एव हि इति गौत
मीयात् ततः स्थितिक्रमेणाङ्गुलिषु दशाक्षराणि विन्यसे
तद्यथा प्रणवपुटितं सर्वत्र गों नमः दक्षाङ्गुष्ठे पीं नमः
तर्जन्यां जं नमः वाममध्यमायां नं नमो अनामिकायां
वं नमो कनिष्ठायां लं नमो वामाङ्गुष्ठे भं नमो वामतर्जन्यां
यं नमो वाममध्यमायां स्वां नमो वामानामिकायां हां न
मो वामकनिष्ठायां ततः करयोरङ्गुलीषु पञ्चाङ्गन्यासः
यथा आचक्राय स्वाहा अङ्गुष्ठाभ्यां नमः विचक्राय स्वाहा
तर्जनीभ्यां स्वाहा सुचक्राय स्वाहा मध्यमाभ्यां वषट् त्रै
लोक्यरक्षणचक्राय स्वाहा अनामिकाभ्यां हुं असुरा
न्तकचक्राय स्वाहा कनिष्ठिकाभ्यां फट् ततो मूलमन्त्रपुटि
तान् सविन्दून् मातृकावर्णान् मातृकास्थानेषु न्यसेत्
ततः प्रणवपुटितं मूलमन्त्रं अकेशात् पादान्तं आपादा
"वि" केशं क्रमात् त्रिवारं न्यस्य संहारसृष्टिभेदेन दशतत्त्वा

निविन्यसेत् तथाच क्रमदीपिकायां संहृतावनुगतोम
नुवर्णाः सृष्टिवर्त्म निभवेत्प्रतिपातः तद्यथा पा
दयोः गौं नमः पराय पृथ्वी तत्त्वात्मने नमः लिङ्गे पीं
ॐ ४ हृदि जं नमः पराय तेजतत्त्वात्मने नमः मुखे वं नमः पराय वायुतत्त्वात्मने नमः ४
नमः पराय जलतत्त्वा त्मने नमः शिरसी वं नमः परा
याकाशतत्त्वात्मने नमः ह्लें नमः पराया हंकार तत्त्वात्म
ने नमः भों नमः पराय महत्तत्त्वात्मने नमः एतद्वयं हृदि
न्यस्यमिति यं नमः पराय प्रकृतितत्त्वात्मने नमः स्वांन
मः परायपुरुषतत्त्वात्मने नमः हों नमः परायपरतत्त्वात्म
ने नमः इतिस्थिति यं सर्वगात्रे इति संहारन्यास अथ
सृष्टिन्यासः हों पराय परतत्त्वात्मने नमः हुं पराया पुरु
ष तत्त्वात्मने नमः यं नमः पराया प्रकृतितत्त्वात्मने नमः
इति तत्त्वं सर्वगात्रे हृदि भों नमः पराय महत्तत्त्वात्मने नमः
ह्लें नमः पराया हंकारतत्त्वात्मने नमः शिरसी वं नमः
परायाकाशतत्त्वात्मने नमः मुखे वं नमः पराय वायु
तत्त्वात्मने नमः हृदि जं नमः पराय तेज तत्त्वात्मने न
मः लिङ्गे पीं नमः पाराया जलतत्त्वात्मने नमः पा
दयो गौं नमः पराय पृथ्वि तत्त्वात्मने नमः इतिसृ
ष्टिन्यास सृष्ट्यादिन्यासे अङ्गुली नियमो निबन्धे ॥

शिरसि विहिता मध्यमे वा दिन तर्जनिकान्विता अ
वसि रहिताङ्गुष्ठा ज्येष्ठान्विता पकनिष्ठकानसि ३४
वदने सर्वाः सज्यय शि हृदि तर्जनी प्रथम युता मध्यम
नामौ युतौ विहिता लिङ्गे ताष्वाङ्गु लये जान्वोः सा
ङ्गुष्ठास्तु पदद्वये तद्यथा शिरसि गौं नमो मध्यमाङ्गुल्या
नेत्रयो पीं नमो तर्जनी मध्यमाभ्यां कर्णयो जे नमः
अङ्गुष्ठ रहिताभि रङ्गुलिभिः घ्राने नें नमो अङ्गुष्ठानामि
काभ्यां मुखे वं नमः सर्वाङ्गुलिभि हृदि ह्लें नमो अङ्गुष्ठ
तर्जनीभ्यां नाभौ भों नमः अङ्गुष्ठमध्यमाभ्यां लिङ्गे
यं नमो अङ्गुष्ठ रहिताभि रङ्गुलिभिः जान्वोः स्वां
नमो अङ्गुष्ठ रहिताभि रङ्गुलिभिः पादयोः हों नमो सर्वाङ्गु
लिभिः इतिसृष्टिक्रमः अथस्थितिक्रमः हृदि गौं नमो
अङ्गुष्ठ तर्जनीभ्यां नाभौ पीं नमो अङ्गुष्ठमध्यमाभ्यां लि
ङ्गे जं नमो अङ्गुष्ठ रहिताभि रङ्गुलिभिः जान्वोः नें नमो
अङ्गुष्ठरहिताभि रङ्गुलिभिः पादयो वं नमः सर्वाङ्गुलिभि
शिरसी ह्लें नमो मध्यमयो नेत्रयो भों नमो मध्यमातर्जनीभ्यां ।

६

कर्णयोर्यंनमो रं॰अं॰ वृ॰रहिताभिरं॰अं॰ लिभिः घ्राणेस्वांनमोः रं॰अं॰ ष॰नामिकाभ्यां मुखे ह्रांनमः सर्वाङ्गु॰लिभिः अथ संहारक्रमः पादयोगौंनमोसर्वाङ्गु॰लिभिः जानुनोर्पीनमः रं॰अं॰रहिताभिरहिताभिरङ्गु॰लिभिः लिङ्गे॰जंनमोयं॰अं॰ ष॰रहिताभिरङ्गु॰लिभिः नाभौनंनमोय्यं॰अं॰वृमध्यमाभ्यां हृदि वंनमो य्यं॰अं॰वृतर्जनीभ्यां मुखे ह्लंनमोसर्वाङ्गु॰लिभिः घ्राणेभांनमो अं॰ष॰नामिकाभ्यां॰ कर्णयोर्यंनमो रं॰अं॰ष॰रहिताभिरङ्गु॰लिभिः नेत्रयोस्वांनमोमध्यमातर्जनीभ्यां॰ मूर्ध्नि ह्रांनमोमध्यमाङ्गु॰ल्या इतिसंहारक्रमः पुनःस्थितिं विन्यसेत् तथाच स्थानेर्न्ययोर्विनिमयानाङ्गु॰लिस्थानयोः क्वचित् विद्यार्थीब्रह्मचारीवपुनःसृष्टिंसमाचरेत् २५ गृहस्थस्यपुनःसृष्टिं स्थितिं कुर्याद्विशेषतः यतिर्वैराग्ययुक्तस्य संहारं न्यसेत्ततः २६ एतेन विद्यार्थिब्रह्मचारीनां चतुर्थी गृहस्थादीनां वंवधा यतिविरक्तादीनां त्रिधान्यासः कर्तव्याः अथविभूतिपञ्जरन्यासाः निवेद्य वध्यपरंन्या सः सर्वरंमूत्यभिधंमूतिकरं सं न्यसेत् पञ्चशावृत्तिमयंन्यस्य

त्तमंसंत्रिवरे तद्यथा मूलाधारे गौंनमः लिङ्गेपीं नमः नाभौजंनमः मुखे ह्लंनमः कुंभयोः भांनमः यंनमः उर्वोः स्वांनमः हंनमः कंधरायां गौंनमः नाभौ पींनमः कुक्षौ जंनमः हृदि नं नमः स्तनयोः वंनमः ह्लंनमः पार्श्वयोः भां नमः यंनमः श्रोण्योः स्वांनमः हांनमः शिरसि गौंनमः मुखे पीं॰ जंलं कर्णयोः वंह्लं नासापुटयोः भांस्वांकपोलयोः स्वांहांलवं दक्षिणकरस्य मूलसंध्यग्रकेषु पंचतदंगुलिषु पंच वामकरमूलसंध्यग्रकेषु पंचतदंगुलिषु पंच एवं दक्षिणपादमूलसंध्यग्रकेषु पंचतदंगुलिषु पंच वामपादमूलसंध्यग्रकेषु पंचतदंगुलिषु पंच मूर्ध्नि गौं॰ तत्पूर्वे पीं॰ तद्दक्षिणे जं तत्पश्चिमे नं तदुत्तरे वं॰ मूर्ध्नि सकले ह्लं॰ भुजयोः भां॰ यं उर्वोः स्वां॰ हां॰ शिरसि गौं॰ नेत्रयोः पीं॰ मुखे जं॰ कण्ठे नं॰ हृदि वं॰ जठरे ह्लं॰ मूलाधारे भां॰ लिङ्गे यं॰ जानुनोः स्वां॰ पादयोः हां॰ श्रोत्रयोः गौं॰ गण्डयोः पीं॰ नासयोः

जं स्तनयोः नं पार्श्वयोः वं लिंगे लं ऊर्वोः भं जा
न्वोः यं जंघयोः रं पादयोः हं एतानि नमोन्ता
नि विन्यसेत् तत्क्रमो गौतमीये हृत्कमला
दिसृष्टिस्थमनिधानस्थितिस्मृता गंगुं स्तथा
तु संहृतिमुखस्थित्यंतं तत्तत्त्वं न्यसेत् ३९ ततः
पूर्ववन् मूर्तिपञ्जरन्यासः पुनर्मूर्तिपञ्जरस्थे
न सृष्टिस्थिती ततो दशांगपंचांगन्यासौ तद्यथा
हृदि गौं शिरसि पीं शिखायां जं सर्वांगे नं
दिक्षु वं दक्षपार्श्वे लं वामपार्श्वे भं कटिदेशे
यं पृष्ठे स्वां मूर्ध्नि हां ततः पंचांगन्यासो यथा
आचक्राय स्वाहा हृदयाय नमः विचक्राय स्वा
हा शिरसे स्वाहा सुचक्राय स्वाहा शिखायै
वषट् त्रैलोक्यरक्षणचक्राय स्वाहा कवचाय
हुं असुरांतकचक्राय स्वाहा अस्त्राय फट्
ततो नारायणमंत्रोक्तकिरीटकेयूरन्या
दिमंत्रेण व्यापकं विधाय वेणुविल्वा
दिमुद्रां प्रदर्श्य ओं नमः सुदर्शनाय
अस्त्राय फडिति मंत्रेण दिग्बन्धनं कुर्यात्
किरीटादिन्यासस्तु सर्वत्र दिक्षु मंत्रे ततो
ध्यायेत् स्मरेद्वृन्दावने रम्ये मोहयन्तमना ध्ये२
रतं गोविंदं पुंडरीकाक्षं गोपकन्यासहस्रशः ३८

आत्मनो वदनांभोजे प्रेरिताक्षिमधुव्रता पीडिता
कामबाणेन चिरमाश्लेषणोत्सुकाः मुक्ताहारस्फु
रत्पीनतुंगस्तनभरानता स्रस्तधम्मिल्ल
वसनामदस्खलितभाषणाः दंतपंक्तिप्रभोद्भासि भो ४
स्पंदमानाधरांचिता विलोभयंतीर्विविधैर्वि
भ्रमैर्भावगर्वितैः ४१ फुल्लेन्दीवरकांतिमिं
दे दुवक्त्रं बर्हावतंसप्रियं श्रीवत्सांकमुदारकौ
स्तुभधरं पीतांबरं सुन्दरं गोपीनां नयनोत्पला
र्चिततनुं गोगोपसंघावृतं गोविंदं कलवेणुवा
दनपरं दिव्यांगभूषं भजे ४२ एवं ध्यात्वा मा
नसैः संपूज्य शंखस्थापनं कुर्यात् ततो वैष्ण
वोक्तपीठमंत्रांतां पीठपूजां विधाय पुनर्ध्या
त्वा आवाहनादि पंचपुष्पांजलिदानपर्य
न्तं विधाय देवशरीरे सृष्टिस्थिती दशांगपञ्चां
गन्यासक्रमेण पूजयेत् ततो मुखे ओं वनवे
नमः हृदि ओं वनमालायै नमः ओं कौस्तुभा
य नमः ओं श्रीवत्साय नमः ततः अपरं पञ्च
पुष्पांजलिं दद्यात् शुक्लचंदनपंकुलां श्वेत
तुलसीं रक्तचन्दनपंकुलां रक्ततुलसीं मूले
न दक्षवामपार्श्वयोर्देयात् एवं हूंकरवीरहृदये
येन मूर्ध्नि वामदक्षनमेदेन पद्मकयेन तथा

तुलसीहृदये करवीरहृदये च शिरसी दद्यात सर्वेवाशि
रसी दद्यात तथाचगौतमीये दक्षिणे वासुदेवाद्ते
स्वच्छं चैतन्यमव्ययं वामेवसंक्तनीरक्ता नित्या रज
गुणान्विता तुलसी युगलं पार्श्वे हृदये दक्षिणवामके
पद्म पुष्पं मूर्धि देशे मूलेन दक्षवामके ४४ वडशिः
सर्वतो दद्यात पुनः शिरसि सर्वतः ततः सर्वाणि
पुष्पाणि सर्वततो दद्यात ४५ ततः स्वावरणं पूजये
त पूर्वे ॐ दामाय नमः दक्षिणे ॐ सुदामाय नमः
पश्चिमे वासुदेवाय नमः उत्तरे ॐ किङ्किण्यै नमः
केशरेषु अग्न्यादिकोणे ॐ ज्ञानवक्त्राय स्वाहा हृदयाय
नमः नैरृत्ये ॐ विवक्त्राय स्वाहा शिरसे स्वाहा वायु
कोणे सुवक्त्राय स्वाहा शिखायै वषट् ऐशान्यां ॐ
त्रैलोक्यरक्षणवक्त्राय स्वाहा कवचाय हुं वेदादि हृ॥
ॐ सुदर्शनचक्रवक्त्राय स्वाहा अस्त्राय फट् ततः प
त्रेषु पूर्वादि ॐ रुक्मिण्यै नमः एवं सत्यभामायै ना
ग्नजित्यै नमः सुनन्दायै नमः मित्रवृन्दायै सुले

क्षणायै· जाम्बवत्यै· सुशीलायै· पत्रमेषु पूर्वादि ॐ
वासुदेवाय नमः एवं देवक्यै· नन्दायै· यशोदायै·
बलभद्राय· सुभद्रायै· गोपेभ्यः गोपीभ्यः तद्बाह्ये
मध्ये च पूर्वादिक्रमेण ॐ मन्दाराय नमः एवं सन्ताना
य· पारिजाताय· कल्पवृक्षाय· हरिचन्दनाय। तद्बा
ह्ये इन्द्रादीन वज्रादींश्च पूजयेत ततः कृष्णाष्टकेन पू
जयेत ॐ श्रीकृष्णाय नमः एवं वासुदेवाय नमः देवकीनन्द
नाय· नारायणाय· यदुश्रेष्ठाय· वार्ष्णेयाय· धर्मसंस्थापना
य· असुराक्रान्तभारहारिणे सर्वत्रगुणवादिनमोन्तेकेन पूज
येत स्वस्वकृष्णदेवैः इन्द्रवज्रादींश्च पूजयेत तथाचगौतमीये
अथवाङ्ग दिक्पतिभिः शक्रदैरपि वार्चयेत एवमभ्यर्चयन
कृष्णं कामशक्त्या समाजनं ४६ एतत्पूजनः शाक्रोऽपि द
कृष्णादिकेन पूजयेत ततो धूपादि विसर्जनान्तं कर्म समा
पयेत अस्य पुरश्चरणं दशलक्षजपः तथाच दशलक्षम
देयफलप्रदं मन्त्रं प्रतिजप्य निर्मलमतिदशांशमं जुहु
यात सिताज्यमधुराप्लुतैर्नवैर्वरारुणाम्बुजैः हुताशने दश
धुतैः अथ शापविमुक्तगतवर्णा चेन्मन्त्रं बलतरं प्रजपेत तज्ज
रुयाच्च श्लोकं कन्याहुतेन्दे अमलं रमारेवायसे रम्य
मति

१०

५ जानोऽस्मि तद्धृतमुसिक्तैरारभेद्धोमकर्म दशाक्षरादौ श्री
मायाकामः काममायास्त्रिविधस्तया दशाक्षरो भवति त
था च श्रीमारकुमारपूर्वश्च शक्तिश्रीमारपूर्वकः काम
शक्तिरमापूर्वो दशार्णो मनवो बुधैः इति सनत्कुमारक
ल्पे एतेषां पूजाप्रयोगः प्रातःकृत्यादि वैष्णवोक्तपीठन्या
सान्तं कर्म विधाय ऋष्यादिन्यासं कुर्यात् तद्यथा शि
रसि नारायणऋषये नमः मुखे विराट् गायत्रीछन्दसे न
मः हृदि श्रीकृष्णदेवतायै नमः ततः क्लां ॐ सौ आ
चक्राय स्वाहा अंगुष्ठाभ्यां नमः आचक्राय स्वाहा हृदया
य नमः इत्यादि दशाक्षरवद्विन्यसेत् ततः फलाधीज्ञ
दशतत्त्वमूर्तिपंजरान्न्यसेत् ततः किरीटमंत्रेण व्यापकं
विधाय यथाशक्ति मुद्राः प्रदर्श्य ॐ नमः सुदर्शनाय अस्त्रा
य फट् इति दिग्बंधनं विधाय ध्यायेत् आद्ये मनौ दशाक्ष
रध्यानं द्वितीये स्वाभिषेकध्यानं तृतीये तु ध्यानं शंखं
चक्रं धनुर्बाणान् पाशांकुशधरान् लवेणुधरान् धृतो
दोर्भ्यां ध्येयः हेमाद्रिवाकरे गोपनीयमतेत स्त्रापि
दशाक्षरध्यानं तथा च रमादिकामादिमंत्रसुधी "दये"
कृत्यध्यानयोर्मंत्रयोर्मंत्री यावक्रादिः षडक्षरं कुर्या

[redacted]

दृष्टानुसारं वैष्णवोक्तपीठपूजां विधाय पुनर्ध्यात्वा
मानसैः संपूज्य ... कुर्यात् ॥ सर्वं ध्यानपू
जादिकं सुधी एवं ध्यात्वा मानसैः संपूज्य शंखस्था
पनं कुर्यात् ततो वैष्णवोक्तपीठपूजां विधाय पुनः
ध्यात्वा आवाहनादि पंचपुष्पांजलिदानपर्यंत
पूर्वोक्तवैष्णवादिपूजनं च विधाय आवरणपूजामा
रभेत् अस्यावरणं निकुंजे द्वयुजादीक्षित ततो के
श्यादिकान् संपूज्य धूपादि विसर्जनान्तं कर्म समा
पयेत् एतेषां पुरश्चरणं पंचलक्षजपः तथा च पंच
लक्षजपेत् तावत् दशांशं पायसेन च जुहुयात् संस्कृ
ते वह्नौ मंत्री सर्वाभीष्टसिद्धये ८७ मंत्रांतरं कृष्णा
य पदमाभाष्य गोविन्दाय ततः परं गोपीजनपद
स्यान्ते वल्लभाय द्विठावधिः कामबीजादिरांता
तो मन्त्रराट् दशाक्षरा ८८ अस्य पूजाप्रयोगः
प्रातःकृत्यादि वैष्णवोक्तपीठमन्त्रान्तं विन्यस्य ऋ
ष्यादिन्यासं कुर्यात् यथा नारदऋषये नमः मुखे
गायत्रीछन्दसे नमः हृदि श्रीकृष्णदेवतायै नमः गु
ह्ये क्लीं बीजाय नमः पादयोः स्वाहा शक्तये नमः
सर्वांगे ततः पूर्ववत् पुटितमंत्रं शिरःकरयोर्व्या
प्य करांगन्यासौ कुर्यात् क्लीं कृष्णाय अंगुष्ठा
भ्यां नमः गोविन्दाय तर्जनीभ्यां स्वाहा गोपीज
नमध्यमाभ्यां वषट् वल्लभाय अनामिकाभ्यां

१°
२° हुं स्वाहा कनिष्ठिकाभ्यां फट् एवं हृदयादिषु ततो
मूलेन मूर्द्धादि पाद पर्यन्तं त्रिशा व्याप्य पुनर्व
न्यसेत् तद्व्याप्य मंत्रन्यासं कुर्यात् मूर्द्धनि ललाटे
टे भ्रूमध्ये कर्णयोश्चक्षुषोर्घ्राणयोर्वदने ग्रीवा
यां हृदि नाभौ कट्यां लिंगे जान्वोः पादयोः एषु स्था
नेषु पृथक् मंत्रवर्णान् नमोन्तान् विन्यसेत् शिर
ए सि पूर्वं च न्यसेत् ततो नेत्र मुख हृदय गुह्ये ङ्घ्रिषु
मंत्रस्य पदपंचकं नमोन्तं न्यसेत् पदपञ्चकेन च
तुरस्रतु लभ्यादयं ततोङ्गन्यासं कुर्यात् क्लीं कृ
ष्णाय हृदयाय नमः गोविन्दाय शिरसे स्वाहा गो
पीजन शिखायै वषट् वल्लभाय कवचाय हुं स्वा
हा अस्त्राय फट् तथैव चतुःकर्णिवेदाब्धि नेत्र सं
ख्यावर्णैः कुर्यात् षडंगं मनोः कुर्यात् मन्त्रविज्ञा
तिसंयुते ४९ नमः स्वाहा वषट् वौषट् हुं फडन्ता
श्च जातयः ततो दशतत्त्व मूर्ति पञ्जर न्यासो विधा
य किरीट मंत्रेण व्यापकं कृत्वा यथाशक्ति मुद्रां ब
ध्वा ॐ नमः सुदर्शनाय अस्त्राय फडिति दिग्बं
धनं कृत्वा पश्चात् रौक्मं ध्यात्वा मानसैः संपूज्य शं
खं स्थापनं कृत्वा वैष्णवीं पीठमन्त्रं ततो पीठपूजां विधा
“न” य पुष्पांजलिं आवाहनादि पञ्च पुष्पांजलि
दान पर्यन्तं विधाय क्लीमित्या द्यावरे स्त्रदले
षु न्यसेत् क्रमेण संपूज्य क्लीं कृष्णाय हृदयाय
नमः इत्यादिना अंग मंत्रेण संपूज्य च पुनः पञ्च
पुष्पांजलिं दद्यात् ततो वेण्वादी पूजनं कृत्वा पश्चा

त्तौ रौक्म वसनं पूजाञ्च कृत्वा धूपादि विसर्जनान्तं कर्म स
“पुरश्चरणं” मापयेत् अस्य पुरश्चरणं तु पदलक्षं मंत्रान्तरे शक्ति
श्री पूर्वक अष्टादशाक्षर विधानं दशांशः अस्य पूजा प्रयो
गः प्रातःकृत्यादि वैष्णवोक्त पीठ मन्त्रेन्ने पीठन्यासं वि
धाय ऋष्यादिकं न्यासं कुर्यात् शिरसि ब्रह्मा ऋषये
नमः मुखे गायत्री छन्दसे नमः हृदि श्रीकृष्ण देवतायै नमः
गुह्ये क्लीं वीजाय नमः पादयोः स्वाहा शक्तये नमः ततः
कराङ्गन्यासो ह्रीं श्रीं क्लीं अंगुष्ठाभ्यां नमः कृष्णा
य तर्जनीभ्यां स्वाहा गोविन्दाय मध्यमाभ्यां वषट् गो
पीजन अनामिकाभ्यां हुं वल्लभाय कनिष्ठाभ्यां वौषट्
स्वाहा करतलपृष्ठाभ्यां फट् एवं हृदयादिषु ततो मूले
न व्यापकं कृत्वा मंत्रपुटितान् मातृकावर्णान् तत्त
त्स्थानेषु न्यसेत् ततो दशतत्त्वानि विन्यस्य पुनर्मूलेन
व्यापकं कुर्यात् ततो मंत्रन्यासः मूर्ध्नि ह्रीं नमः ललाटे
श्रीं नमः भ्रूमध्ये क्लीं नमः नेत्रयोः क्लीं नमः कर्णयोः स्वा
नमः नासायं नमः वदने गों नमः चिबुके विं नमः कंठ
देशे नमः दोर्मूलयोः नमः हृदि गों नमः उदरे पीं नमः नाभौ
जं नमः लिंगे नं नमः आधारे वं नमः कटौ ल्लं नमः

१· २२


जान्वोर्भां नमः जङ्घयोर्यं नमः गुल्फयोः स्वां नमः पादयोर्हां
नमः इति सृष्टिः हृदि ह्रीं · उदरे श्रीं नाभौ क्लीं · उदरे कृं · आ
धारे ष्णां · कट्यां यं · जान्वोर्गों · जङ्घयोर्विं · गुल्फयोर्न्दां ·
पादयोर्यं · मूर्ध्नि गों · कपाले पीं · भ्रूमध्ये जं · नेत्रयोर्नं · कर्णयो
र्वं · नसोर्ल्लं · वदने भों · नमः चिबुके यं · कण्ठे स्वां · दोर्मूले हां ·
इति स्थितिः पादयोर्ह्रीं · गुल्फयोः श्रीं · जङ्घयोः क्लीं · जान्वोः
कृं · कट्यां ष्णां · आधारे यं · लिङ्गे गों · नाभौ विं · उदरे न्दां
हृदि जं · दोर्मूले गों · कण्ठे पीं · चिबुके यं · वदने नं · नासयोर्वं ·
कर्णयोर्ल्लं · नेत्रयोर्भं · भ्रूमध्ये यं · ललाटे स्वां · मस्तके हां · स
र्वाङ्गे नमो न्यासं न्यसेत् इति संहारन्यासः पुनः सृष्टिस्थिती
कृत्वा मूर्तिपञ्जरं विन्यस्य मूर्तिपञ्जरं सृष्टिस्थिती विन्य
स्य षडङ्गानि न्यसेत् ह्रीं श्रीं क्लीं हृदयाय नमः कृष्णाय शिरसे
स्वाहा गोविन्दाय शिखायै वषट् गोपीजनकवचाय हुं वल्ल
भाय नेत्रत्रयाय वौषट् स्वाहा अस्त्राय फट् तथा च सृष्टि
स्थितौ च विन्यस्य षडङ्गानि समाचरेत् गजाग्निवेदकरण
कारणद्यदोरेमना: ततः पूर्ववन्मुद्रादिदर्शने दिग्बन्धनं च कृत्वा कि
रीटमन्त्रेन व्यापकं विधाय मुद्रां बद्ध्वा ध्यायेत् तद्यथा द्वा
रवत्यां सहस्रार्कभास्वरैर्भवनोत्तमैः अनल्पैः कल्पवृक्षै
श्च परिते मणिमण्डपे ५१ ज्वलद्रत्नमयस्तम्भद्वारतो
रणकुड्यके फुल्लस्रग्युल्लसच्चित्रवितानालम्बिमौक्तिके ५२
पद्मरागस्थलीराजिद्रत्ननद्यास्य मध्यतः अनारतगल


द्रुमधारसमासक्तरोरथः ५३ रत्नदीपावलीभिः प्रदीपितदिग
तरे उद्यदादित्यसंकाशे मणिसिंहासनाम्बुजे ५४ समासीनो
च्युतो ध्येयो द्रुतहाटकसंनिभः समानोदितचन्द्रार्कतडित्को
टिसमद्युतिः ५५ सर्वाङ्गसुन्दरः सौम्यः सर्वाभरणभूषितः पीत
वासाश्चक्रशङ्खगदापद्मोज्ज्वलद्भुजाः ५६ अनारतोच्चलद्र
त्नधारौघकलसं स्पृशन् वामपादाम्बुजाग्रेण मुष्टत्पल्लव
च्छविं ५७ रुक्मिणीसत्यभामे द्वे मूर्ध्नि रत्नौघधारया सिञ्च
त्यौ दक्षवामस्थे स्वदोस्थकलत्यया ५८ नाग्नजितिसुनन्दा
चदिशन्त्यौ कलसौ तयोः जाम्बवती सुशीला च दिशन्त्यौ दक्ष
वामके ५९ वहिः षोडशसाहस्रसंख्याताः परितः प्रियाः ध्येया
कनककलशधारामुक्तसलिलैः ६० तद्बहिर्वाहिनिधयः
पूरयन्तो धनैर्धरां तद्बहिर्वृष्णयः सर्वे पुरो देवमुनादयः ६१ ए
वं ध्यात्वा मानसैः सम्पूज्य पूजां स्थापनं कुर्यात् यथा पूजायन्त्रं
षट्कोणमष्टदलपद्मं विलिख्य तन्मध्ये सप्तदशाक्षरं स्थापयेत्

श्रीकृष्णस्य यन्त्र



१२ ततः षट्कोनस्य प्राग्‌वोनिलकोनेषु श्रीवीजं शिष्टेषु भुवनेश्वरी
लिखेत् ततः षट्संधिषु क्लीं कृष्णाय नमः इति षट्‌वर्णान् लिखेत्
ततः केशरेषु कामदेवाय विद्महे पुष्पवाणाय धीमहि तन्नोन
ङ्गः प्रचोदयात् इति गायत्र्याः द्वौ द्वौ अक्षराणि सर्वदिक्षु विलि
खेत् ततः पत्रेषु पूर्वादि नमः कामदेवाय सर्वजनप्रियाय सर्वज
नसंमोहनाय ज्वल २ प्रज्वल २ सर्वजनस्य हृदयं मम वशं कुरु
कुरु स्वाहा इति मालामंत्रस्य ४८ षड्‌वर्णान् दलेषु विलिखेत्
मालामंत्रमाह शारदायां नमो न्तं कामदेवाय वदेत् सर्वजनं त
तः प्रियाय सर्व वर्णान्ते जनसंमोहनाय च ५२ ज्वल द्वयं प्रज्वलो
ज्वले वदेत् सर्वजनस्य च हृदयं मम सदन्ते नेवशं कुरु युग्मं पिरः ६३
मालामनुरयं वाणवल्यारि प्रति कादैरः तद्बाह्ये मातृकापाशं वेष्ट
येत् ततोश्रुविश्व दिक्षु श्रीवीजं विदिक्षु च मायावीजं विलिखेत्
तद्बाह्ये अष्टवज्राणि तत्पार्श्व विलि[illegible] प्रागन्यपंक्तेन लिखे
दष्टदलाम्बुजे कर्णिकायां न्तषट्‌कोने सत्साध्यं तन्नमन्त्रमयं ६४





शिष्टेषु सप्तदशाभिरक्षरैर्वेष्टयेत् तस्मिन् प्राग्‌वोनिलको
णेषु श्रियं शिष्टेषु संन्विदं ६९ षडश्रं षट्‌संधिषु के
शरेषु त्रिशः त्रिशः विलिखेत् तस्मिन् गायत्री मालाम
न्त्रं दलाष्टके ६६ षट्‌सः संलिख्य तद्बाह्ये वेष्टयेत् मातृ
कादौरेः भूविम्बं विलिखेद्बाह्ये श्रीमाये दिग्विदिक्ष्वपि ६७
भूगृहं चतुरस्रं स्याद्दष्टवज्र[illegible] विभूषितं एतद्यंत्र
मष्टादशाक्षरद्वाविंशात्यक्षराष्टादशाक्षरदशाक्षरचतुर्दशा
क्षरैकादशाक्षराणामिति पंचपद्मसदृपल्लासं तु चतुर
स्रं सुलतनं चतुर्द्वारं "चतुरस्रे[illegible] ६८
समायुक्तं कामगर्भित्रिकोणके सामान्यमन्त्रमुद्दिष्टं मष्टा
दशाक्षरेश्रृणु ६८ चतुरस्रं चतुर्द्वारं पद्मम दृष्टदलान्वितं
षट्‌कोनगर्भकामाद्यं संपन्नदृशारवेष्टितं षड्‌क्षरमन
वर्षट्‌कोने विलिखेत् ततः इति मोहनीये अष्टादशा
क्षरदशाक्षरयोर्यद्विशेषमुक्तं तदष्टादशविषयं अन्यथा
तापिन्यादिविरोधः स्यात् ततः पूर्वोक्तपीठमन्त्रेणापी
ठपूजां विधाय पुनर्ध्या[illegible]त्वा आवाहनादिपञ्चपु
ष्पाञ्जलीदानपर्यन्तं विधाय सृष्टिस्थितिषडङ्गा
न्ये संपूज्य ओं किरीटाय नमः एवं कुण्डलाभ्यां च
क्राय शंखाय गदायै पद्माय वनमालायै श्रीवत्साय
कौस्तुभाय सर्वत्र प्रणवादिनमोन्तेन पूजयेत् पुनः प
ञ्चपुष्पाञ्जलिं दत्वा आवरणपूजामारभेत् षट्‌कोने

ह्रीं श्रीं क्लीं कृष्णाय नमः कृष्णाय त्रिरसस्वाहा इत्या
दिना षडङ्गानि पूजयेत् ततो दिक्पत्रस्य मूले वासुदेवा
य नमः एवं संकर्षणाय प्रद्युम्नाय अनिरुद्धाय प्रणवा
दिनमोन्तेन पूजयेत् एवं विदिक्पत्रस्य मूलेषु ॐ शा
न्त्यै नमः एवं श्रियै नमः सरस्वत्यै नमः रत्यै पत्राग्रे पूर्वा
दि पूर्ववद्रुक्मिण्याद्याः पूजयेत् पत्रकोडस्थस्थमहि
षीभ्यो नमः तद्बहिः पूर्वादि इन्द्रनिधिं नीलनिधिं
मुकुन्दनिधिं मकरनिधिं आनन्दनिधिं कच्छपनिधिं
पद्मनिधिं शङ्खनिधिं च पूजयेत् तद्बहिरिन्द्रादीन्
वज्रादींश्च पूजयेत् ततो धूपादिविसर्जनान्तं कर्म
समापयेत् अस्य पुरश्चरणं वर्त्तुलक्षजपः तथा च ध्या
त्वैवं परमात्मानं विंशत्यर्णं मनुं जपेत् वर्त्तुलक्षं हुनेदा
ज्यैस्त्रिंशत्सहस्रकं ६९ मन्त्रान्तरं वाग्भवका
मवीजं च कृष्णाय भुवनेश्वरी गोविन्दाय रमा गोपीजन
७० वल्लभङेशिरः चतुर्द्दशाक्षरोपेतो मनुः समीतर्द्धितः स्वा
विंशत्यक्षरो मन्त्रो वाग्मीशालपरायणः ७१ अस्य पूजा
प्रयोगः प्रातःकृत्यादि वैष्णवोक्तपीठमन्त्रान्तं पीठन्यासं
विधाय अष्टादशाक्षरवत् हृदयादिन्यासं कराङ्गन्यासौ
विधाय सुवर्द्धि दिव्य धनं चेत्कृत्वा ध्यायेत् वामोर्द्ध्वहस्ते
दधतं विद्या सर्वामपुस्तकं मूर्द्धमालाञ्च दक्षोर्द्ध्वे स्फा
टिकीं मातृकामयीं ७२ शब्दब्रह्ममयं वेणुमधःपाणिद्वये रितं

गायन्तं पीतवसनं श्यामलं कोमलच्छविं ७३ बर्हिबर्हकृ
तोत्तंसं सर्वज्ञं सर्ववेदिभिः उपासितं मुनिगणैरुपतिष्ठ हरिं
सदा ७४ एवं ध्यात्वा विंशत्यर्णं वक्ष्यति पूजयेत् विशेषस्तु
सृष्टिस्थितिमन्त्रे पूजनं नास्ति तद्वाक्याभावात् अस्य पुरश्चर
णं वर्त्तुलक्षजपः तथा च वर्त्तुलक्षं जपेन्मन्त्रमिमं मन्त्री सुसंयतः
पलाशपुष्पैः स्वाद्वक्तैश्चत्वारिंशत्सहस्रकं ७५ जुहुया
द्धर्मसम्पन्नेन मन्त्रसिद्धिर्भवेद्ध्रुवं मन्त्रान्तरं वाग्भवका
मवीजं च माया लक्ष्मी मनन्तरं ७६ दशाक्षरो मनुर्वर्ण्यअभवच्छका
दशः न्मनुः ब्रह्मसंहितायां वाग्भवभुवनेशानीश्रीवीजं कामवी
जं के ॥ दशार्णेत्यादि अस्य पूजाप्रयोगः प्रातःकृत्यादि
वैष्णवोक्तपीठन्यासं कृत्वा ऋष्यादिन्यासं कुर्यात् शि
रसि ब्रह्मणे ऋषये नमः मुखे गायत्रीच्छन्दसे नमः हृ
दि श्रीकृष्णाय देवतायै नमः अस्य न्यासपूजाजपहो
मादि सर्वं दशाक्षरवत् ध्याने तु विशेषः ध्यायेद्वृन्दा
वने रम्ये कालिन्दीभूमिमध्यगे नानापुष्पलताकीर्णे
श्च वृन्दारकगणाश्रिते ७७ कल्पाटवीतले सत्यकश्रीमन्मानि मते
क्यमण्डपे नारदाद्यैर्मुनिश्रेष्ठैः स्तुतिभिः परिवारिते ७८
रत्नसिंहासने ध्यायेदुपविष्टं केजोपरि सजलज
लदश्यामं रक्तपद्मायतेक्षणं ७९ रक्तपद्मस्फुरत्पा
दपाणिं कम्पापरिमण्डितं नवरत्नसमानत्वभूषणैप
रिभूषितं श्रीयुक्तवक्षसं भ्राजत्कौस्तुभोद्भा

२८ षितोरस्वरे लसद्धारावलीरम्यं श्रीवत्साङ्कितवक्षसं ७३
रोचनातिलकप्रान्तकुन्तलभ्रमराजिते कर्णचापश
रेषा विलसमानविराजिते ७४ अनेकरत्नसंयुक्तस्फुरन्मक
रकुण्डलैर्वर्हिवर्हकृतोत्तंसं सर्वज्ञं सर्ववेदभि: ७५ उपा
सितं मुनिगणैरुपनिषद्भुरिसन्ध्या॥ इति अथ कादम्बरीप्रकार:
कामदेवं धरास्य कान्तिबिन्दुविभूषितं त्रैलोक्यमोह
नो विष्णु: कथितस्तस्य वै पुन: ७६ अस्य पूजाप्रयोग: प्रा
त:कृत्यादि वैष्णवोक्तपीठपूजान्तं विन्यस्य तदु
परि वदिराजाय स्वाहेति पीठमन्त्रं न्यसेत् तत: ऋष्यादि
न्यास: तद्यथा शिरसि सम्मोहनऋषये नम: मुखे गा
यत्रीछन्दसे नम: हृदि त्रैलोक्यसम्मोहनाय विष्णवे नम:
तदुक्तं ऋषि: सम्मोहनश्छन्दो गायत्री परिकीर्तितं त्रैलो
क्यमोहनो विष्णुर्देवता समुदीरिता ७७ तत: कराङ्ग
न्यासौ क्लीं अङ्गुष्ठाभ्यां इत्यादि क्लीं हृदयाय नम:
इत्यादि तथा च निबन्धे दीर्घषट्कयुजानेन कामवी
जेन कल्पयेत् ततो वाणन्यास: अङ्गुष्ठे द्रां शोषणवा
णाय नम: तर्जन्यां द्रीं मोहनवाणाय नम: मध्यमयो: क्लीं
संदीपनवाणाय नम: अनामिकयो: ब्लूं तापनवाणाय
कनिष्ठकयो: स: मादनवाणाय तथा मस्तकमूलहृद
ययुग्मपादेषु न्यसेत् तथा च निबन्धे द्रामाद्यं शोषणं पू
र्वं द्रीमाद्यं मोहनं तत: संदीपनाख्यं क्लीमाद्यं ब्लूमा

द्यं तापनं पुन: ७८ सर्गान्तं मुख्यमादनं
पंचमं न्यसेत् ततो ध्यायेत् भक्तविद्रुमसंकाशं
सर्वतेजोमयं वपु: किरीटिनं कुण्डलिनं केयूरव
लयान्वितं ७९ शङ्खसद्कुन्तसंनद्धावलोकोद्दि
समुज्वले नानालङ्कारसुभगं पीताम्बरयुगावृतं ८०
श्रीकौ वक्षसमन्विद्धं रक्तपङ्कजमध्यगं उन्नतहेमसंकाश
श्रीलक्ष्मीवामाङ्गसंस्थितां ८१ सर्वालङ्कारसुभगां शु
ल्कवासायुगावृता सकामा लीलया देवं मोहयन्तं पुन:
पुन: ८२ शङ्खचक्रगदापद्मपाशाङ्कुशधनु:शरान्
धारयन्तं जगन्नाथं रक्तपद्मासने दने ८३ एवं ध्यात्वा मा
नसै: सम्पूज्य शङ्खस्थापनं विधाय न्यासक्रमेण पीठ
पूजां कृत्वा पुनर्ध्यानावाहनादि पञ्चपुष्पाञ्जलि
दानपर्यन्तं विधाय षडङ्गानि सम्पूज्य न्यासक्रमेण
शरीरे पंचवाणान् सम्पूज्य ओं किरीटाय नम: एवं कुण्डला
य नम: शङ्खाय नम: चक्राय गदायै पद्माय पाशाय
अङ्कुशाय धनुषे शराय इति हस्तेषु पूजयेत्॥
श्रीवत्साय कौस्तुभाय गले वनमालायै नितम्बे पी
तवसनाय वामाङ्के श्रीलक्ष्म्यै नम: सर्वत्र प्रणवादिनमो
न्तेन पूजयेत् तत: केशरेषु अग्न्यादिकोणेषु मध्ये दिक्षु
च क्लीं हृदयाय नम: क्लीं शिरसे स्वाहा इत्यादि षडङ्गा
नि पूजयेत् तत: पूर्वादिदिक्षु चतुरो वाणान् सम्पूज्य

२५ कोणेषु पञ्चमं वाणं सम्पूजयेत् पत्रेषु ॐ लक्ष्म्यै न
मः एवं सरस्वत्यै रत्यै प्रीत्यै कीर्त्यै का
न्त्यै तुष्ट्यै पुष्ट्यै तद्बहिर्लोकपालान्
पूजयेत् इत्यङ्गब्रह्मादिपूजानाम्नि इत्युक्तत्वा
त् ततो धूपादिविसर्जनान्तं कर्म समाप
येत् अस्य पुरश्चरणं द्वादशलक्षजपः त
थाच रविलक्षं जपेन्मन्त्रं जुहुयात् तद्
दशांशतः अष्टत्र्यस्रसितेन पायसेनाज्ये
नान्वितं द्वादश वा रविसाहस्रं हुतेन तद
र्चयेत् मन्त्रान्तरं कामबीजं ङेऽन्तं विके
षाय स्वाहा मन्त्रो ह्यष्टादशोऽपरः तथाच ऋषिर्वेकोऽप्यपदे ङेऽन्ते
नमोऽन्तः कामपूर्वकः २४ अस्य न्यासपूजादिकं
सर्वं पूर्ववत् लक्ष्मीर्माया कामबीजं ङेऽन्तं कृष्णप
दं तथा स्वाहेति मन्त्रराजोऽयं भजतां सुरपादपः २५
अस्य पूजाप्रयोगः प्रातःकृत्यादि वैष्णवोक्तपीठमन्त्र
न्तविन्यासाद्यं ऋष्यादिन्यासं कुर्यात् शिरसि नारदऋष
ये नमः मुखे अनुष्टुप्छन्दसे नमः हृदि श्रीकृष्णदेवतायै
नमः ततः कराङ्गन्यासौ क्लां अङ्गुष्ठाभ्यां नमः इत्यादि
एवं क्लीं हृदयाय नमः इत्यादि ततो ध्यानं कलायकुसुमश्या
मं वृन्दावनगतं हरिं पायन्तं गोपीगवीतं पीतवस्त्रयुगावृतं २५
नानालङ्कारसुभगं कौस्तुभभ्राजिवक्षसं सनकादिमुनि

श्रेष्ठैः संस्तुतं परया मुदा २७ सं ऽ चक्रकलमद्धां हुं वेणु
हस्तं द्विभुजं स्मरेत् एवं ध्यात्वा मानसैः सम्पूज्य शङ्खस्थाप
नं कुर्यात् ततो वैष्णवोक्तपीठमन्त्रैः पीठं सम्पूज्य
पुनर्ध्यात्वा आवाहनादि पञ्चपुष्पाञ्जलिदानपर्य
न्तं विधाय आवरणपूजामारभेत् यथा केशरेषु अ
ग्न्यादिकोणेषु मध्ये दिक्षु च क्लां हृदयाय नमः इत्या
दि पूजयेत् तद्बहिरिन्द्रादीन् वज्रादींश्च सम्पूज्य धू
पादि विसर्जनान्तं कर्म समापयेत् अस्य पुरश्चरणं
पञ्चलक्षजपः तथाच ध्यात्वैवं परमात्मानं पञ्च
लक्षं मनुं जपेत् दशांशं जुहुयान्मन्त्री कुसुमैः कुसुमेव्र
तेजे २८ मन्त्रान्तरं श्रीं ह्रीं क्लीं कृष्णाय गो
गोविन्दाय स्वाहा मनुः अस्य पूजाप्रयोगः प्रातः
कृत्यादि पूर्वोक्तपीठमन्त्रैः पीठन्यासं विधाय ऋत्वा
मिषके वे हृष्यादिन्यासं कुर्यात् ततः कराङ्गन्या
यथा श्रीं अङ्गुष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां स्वाहा
क्लीं मध्यमाभ्यां वषट् कृष्णाय अनामिकाभ्यां
भ्यां हुं गोविन्दाय कनिष्ठिकाभ्यां वौषट् स्वाहा
१ करतलकरपृष्ठाभ्यां फट् एवं हृदयादिषु
श्रीं हृदयाय नमः इत्यादि ततो मूर्तिपञ्ज
रन्यासं विधाय मुद्रादि दिग्बन्धनं विधात्यनो
ध्यात्वा तद्ध्यानेन पूजयेत् विषयस्तु सुषि स्थिति

१·
१८

क्रमेण तं प्रजपेत् तत्तद्दशांशभावात् । अस्य पुरश्चरणं
जपहोमस्तथा । मन्त्रान्तरं तारं हृद् भगवते रुक्मिणी
वल्लभाय स्वाहा तथा च तारो हृद् भगवान् ङेन्तो रुक्म
णीवल्लभस्तथा शिवो वह्नेः स्त्रीड पूर्णो यं रुक्मिणीव
ल्लभाह्वयः १९ अस्य पूजा प्रातः कृत्यादि वैष्णवो
क्तपीठमन्त्रान्तं पीठन्यासं विधाय ऋष्यादिन्यासं कु
र्यात् शिरसि नारदऋषये नमः मुखे अनुष्टुप्छन्दसे
नमः हृदि रुक्मिणीवल्लभाय देवतायै नमः ततः करा
ङ्गन्यासौ ॐ ऋं ऋं · ऋं भ्यां नमः नमस्तर्जनीभ्यां स्वाहा
भगवते मध्यमाभ्यां वषट् रुक्मिणीवल्लभायानामि
काभ्यां हुं स्वाहा कनिष्ठिकाभ्यां फट् एवं हृदयादिषु
ततो ध्यानं तापिञ्जच्छविरञ्जितप्रियतमां स्वर्णप्र
भामम्बुजप्रोद्यद्दामभुजां स्ववामभुजया श्लिष्यन्
स चित्रां स्मयः श्लिष्यन्तीं स्वयमन्यहस्तविलसत्सौव
र्णवेत्रश्रियं पायान्नः शान्तस्मन्नपीतवसनो नाना
विभूषो हरिः २० एवं ध्यात्वा मानसैः सम्पूज्य प्रा
र्थे स्थापनं कृत्वा वैष्णवोक्तपीठमन्त्रान्तं पीठ
पूजां विधाय पुनर्ध्यात्वा आवाहनादि पञ्चपुष्पा
ञ्जलिदानपर्यन्तं विधायावरणपूजामारभेत् यथा
केशरेषु अग्निनिऋतिवायव्यैशानकोणेषु
मध्ये दिक्षु च ॐ हृद् यायनमः नमः शिरसे स्वा
हा भगवते शिखायै वषट् रुक्मिणीवल्लभाय

कवचाय हुं स्वाहास्त्राय फट् ततो दलेषु पूर्वादितो
नारदाय नमः एवं पर्वतं जिष्णुं निशठं उद्धवं दारुकं
विष्वक्सेनं शैनेयं च पूजयेत् ततो दलाग्रे इन्द्रादीन्
वज्रादींश्च सम्पूज्य धूपादिविसर्जनान्तं कर्म
समापयेत् अस्य पुरश्चरणं लक्षजपः तथा च ध्या
त्वैवं रुक्मिणीकान्तं जपेल्लक्षमितं मनुं दशांशं जुहुयात्
पद्मै रक्तैर्मधुरप्लुतैः २१ मन्त्रान्तराणि श्रीशक्तिका
मपूर्वो ङेन्तः स्याद्दधिभक्षकः दशाक्षरः सर्वाभी
ष्टदः सर्वसम्पत्समायुतः २२ मन्त्रो विकृतिरव्यन्तो वा चक्रा
द्याङ्ङे कामिनो अनेनैवास्य व्यादि पञ्चाङ्गानि दशा
क्षरवत्कृत्वा विंशत्यर्णोक्तपूजां कुर्यात् ध्यानन्तु वरदाभय
हस्ताभ्यां श्लिष्यन्तं स्वाङ्गे गोप्रियं पद्मलोचनं रताभ्यां श्लिष्टं देव
कीनादोज्ज्वलं २३ अस्य पुरश्चरणं दशलक्षजपः आ
ज्योक्तावत्सहस्रहोमः तथा च दशलक्षं जपेदाज्यैर्हुत्वा ता
वत्सहस्रकं प्राग्वत्समभ्यर्च्य कृष्णगोविन्दको तथा २४
श्रीपूर्वो ङेन्तः कृष्णायेति हुं फट् स्वाहान्तिको मनुः अस्य
नारदऋषिरनुष्टुप्छन्दः परमात्मा हरिर्देवता आचक्रा
द्यैः षडङ्गकल्पना दशाक्षरवदस्य पूजाजपहोमादयः बीज
शक्ती चैतन्यमिमे अथ बालगोपालमन्त्राः ॥
वह्निर्वसुस्वरान्वितः सर्गी कृष्णः कामकृष्णाय कृष्णा
नमः कामकृष्णाय नमोन्तकः कामः कृष्णाय कामः
गोपालाय हृदन्तं कामकृष्णाय स्वाहा कृष्णगोविन्दौ

१
१७

ङेन्तो कामं कृष्णाय गोविन्दाय [illegible] ः कामः कृष्णगोविन्दौ
ङेन्तौ कामः दधिभक्षणाय ठद्वयं सुपुत्रकामेनेदृशे का
मबीजो कामः श्यामलाङ्गाय ठद्वयं वालवपुषे कृष्णाय वह्नि
जाया रमा [illegible] या कामः कृष्णाय कामः वालवपुषे क्लीं कृष्णा
य वह्निजाया तथा च गौतमीये निबन्धे वाक्कामवसुस्वरयु
तः सर्गी कामो मनुर्मतः कृष्णेति द्वादशार्णः कामः पूर्वेऽस्य
र्णः स एव च ९५ स एव कामपूर्वश्चेत् षडक्षरो मनुर्मतः ॥
स एव चतुर्वर्णः स्यात् ङेन्तोन्यश्चेत् दशाक्षरः वह्निजायापञ्च
वर्णं स्यात् कृष्णाय नमः इत्यपि ९६
कृष्णायेति स्मरद्वन्द्वमध्ये पञ्चाक्षरः परः ९७ गोपाला
याग्निजायान्तः षड्दशमनुर्मतः कृष्णाय कामवीजा
द्यो वह्निजायान्तः कामः ९८ कृष्णगोविन्दकौ ङेन्तौ स
प्तार्णो मनुरुत्तमाः कृष्णगोविन्द ङेन्तौ कामाद्यश्चाष्टा
वर्णकः ९९ आद्यन्तकामवीजेन नवार्णोदाहृताः द
धिभक्षणाय वह्निवल्लभान्तोष्टवर्णकः १०० सुपुत्रकाम
नेप्रोक्तो नमो इत्ययं परो वृकः कामवीजं धरावीजं पुनः
कामं समुद्धरेत् १०१ श्यामलाङ्गपदं ङेन्तं समोन्तो
यदशाक्षरः शिरोन्तो वालवपुषे कृष्णायान्यो म
नुर्मतः १०२ श्रीसक्लिं कामकृष्णाय स्मारः स्मारादरो
स्त्रीं मनुः शिरोन्तो वपुषे कृष्णायाग्निवधूः १०३ एते
षां पूजायन्त्रे दलमष्टदलं पद्मं भूगृहं वह्निरेख
न्त्रमध्यस्थं कामवीजं तथा च गौतमीये १४

पद्ममष्टपत्रं सकेसरं विवरं भूपुरसंलग्नं चतुर्द्वारसमा
युक्तं कामगर्भितकर्णिकं १०५ एतेषां पूजाप्रयोगः
प्रातः कृत्यादिवैष्णवोक्तपीठ [illegible] न्यासं विधाय ऋ
ष्यादिन्यासं कुर्यात् यथा शिरसि नारदऋषये नमः
ह्रीं मुखे गायत्रीच्छन्दसे नमः हृदि श्रीकृष्णदेवतायै नमः ततः
कराङ्गन्यासं क्लां अङ्गुष्ठाभ्यां नमः क्लीं तर्जनीभ्यां स्वा
हा क्लूं मध्यमाभ्यां वषट् क्लैं अनामिकाभ्यां हुं क्लौं
कनिष्ठिकाभ्यां वौषट् क्लः करतलपृष्ठाभ्यां फट् एवं हृद
यादिषु क्लां हृदयाय नमः इत्यादि ततः पूर्ववत् मुद्रादि
कं बद्ध्वा ध्यायेत् अव्याद्व्याकोषनीलाम्बुजरुचिरा
रुणाम्भोजनेत्रोम्बुजस्थो वालो जङ्घाकटीरस्थल
४ष्ठः कलितरणत्किंकिणीको मुकुन्दः दोर्भ्यां हैयङ्गवीनं
दधदतिविमलं पायसं विश्ववन्द्यो गोगोपीगोपवीतो रुरुनख
विलसत्कण्ठभूषश्चिरं वः १०६ एवं ध्यात्वा मानसैः
समभ्यर्च्य शङ्खस्थापनं कुर्यात् ततो वैष्णवोक्तपीठम
न्त्रैः पीठपूजां विधाय पुनर्ध्यात्वा आवाहनादि पञ्च
पुष्पाञ्जलिदानपर्यन्तं विधाय आवरणपूजामारभेत्
यथा केशरेषु अग्न्यादिकोणेषु मध्ये दिक्षु च क्लां
हृदयाय नमः इत्यादिना षडङ्गं संपूज्य तद्बहिः इन्द्रा
दीन् वज्रादींश्च पूजयेत् ततो धूपादि विसर्जनान्तं
कर्म समापयेत् एतेषां पुरश्चरणं लक्षजपः तथा
च ध्यात्वैवमेवमेतेषां लक्षं जप्यमनेन ततः सर्पिः

५·
१८

स्मितेनवैलापयेत् पायसैः स्वयुतं हुनेत् १०६ तथा ते
र्पयेत्त्वावेदनेषां मनुना हुतं हुतेन संदद्या मन्त्रान्तरे
उद्दुदन्त्रयुतः शार्ङ्गि वत्रीं हुतेन कर्णयुक् मांसना
प्यायेन्नित्यन्त्रां मूलमन्त्राणुर्वर्णिकः १०८ ऋषिर्ब्रह्मा
×गेम× स्याद्गायत्री छन्दः कृष्णः स्याद्देवतावर्णायुः समस्तेन
प्रोक्तं स्यादङ्गपञ्चकं १०९ ध्यानन्तु पञ्चवर्षमति
दृप्तमङ्गने धावमानमतिचञ्चलं ल्लेदनैः किङ्किणी
वलयहारनूपुरैरञ्जितं नमत गोपबालकं ११० ध्या
त्वैवं पूजयेत् मूलदेनावत सहस्रकं जहुयात् दुग्ध
हौत्थ समिद्भिः पायसेन वा १११ प्रासादस्यापि
तेषे स मनुना नित्यमर्चयेत् द्वारपूजादि पीठान्तं
कृत्यात्तत्पीठाङ्कमार्गतः ११२ मध्ये चैव पृदिदिक्षु वि
दिक्षु ज्ञानि वेत्कमात् वासुदेवः संकर्षणः प्रद्युम्नश्चा
निरुद्धकाः ११३ रुक्मिणी सत्यभामा च लक्षणा जाम्बव
त्यपि दिक्षु विदिक्षु वैपदे तान् रुद्रवज्रादिकान् बहिः ११४
वामे मन्त्रं जपेल्लक्ष्यं विधिना पूर्ववत् हुनेत् समस्त
सम्पत्सम्पुनानित्यं पूजयेत्तेजवत् ११५ मन्त्रे
त्रैर कामया रन्त्रः हीसपदमन्त्रः सद्यफलप्रदःत
थाच सद्यःफलप्रदे मन्त्रं वैन्यं वहारतरे ११६ संप्रोक्तामार
घ्र गर्भमन्त्रः सस्य कृष्णपदेनतः अस्य पूजाप्रयोगः प्रा
तःकृत्यादि वैष्णवोक्तं पीठमन्त्रं पीठन्यासविधा
य पूर्ववद्दृष्यादिन्यासकराङ्गन्यासौ च कृत्वा ध्यायेत्

श्रीमत्कल्पद्रुमूलोद्गतकमललसत्कर्णिकासं
स्थितं तायत्सव्ये बालस्त्रिपद्मादरविसरदसं स्वात्ते
रस्त्राभिषिक्तः हे मामासः स्वप्रभाभिस्त्रिभुवनमखिलं
भासयन्वासुदेवः पायाद्वा पायसादानवरतनवनीतामृ
ताशी रक्षीम ११७ एवं ध्यात्वा मानसैः संपूज्य पाद्यं स्था
पनं विधाय वैष्णवोक्तपीठमन्त्रपीठसम्पूज्य पुनर्ध्यात्वा
वाहनादि पञ्चपुष्पाञ्जलीदानपर्यन्तं विधाय
वरणपूजामारभेत् पूर्ववदग्न्यादिकोनेषु मध्ये दिक्षु च
क्लीं हृदयाय नमः इत्यादिना षडङ्गानि संपूज्य पत्रेषु
पूर्वादिषु रुक्मिण्यादीन्तदग्रे इन्द्रादीन् वज्रादींश्च सम्पू
ज्य धूपादि विसर्जनान्तं कर्म समापयेत् अस्य पुरश्च
×वद× रणं लक्षजपः तथाच ध्यात्वैवं प्रजपेल्लक्षं जुहुया
त्ततः त्रिमध्वक्तैर्बिल्वफलैः सवत्वारिंशतसहस्रकैः ११८
अथ मन्त्रस्य कामबीजपालंकारस्यारस्ते रफस्वेतदा मे
नहिज्ञामनिः तथाचोक्तं वन्हि मारं रमा मासाधो रक्त्वा
दपरोमनुः कामबीजस्य मासां धालंकार स्याधोग
रफेरफसुरान्ते दायष्य मन्त्र मंस्य पूः अस्य पूजाप्रयोग पू
र्ववद्दृष्यादिन्यासं कृत्वा कराङ्गन्यासौ कुर्यात् यथा क्लीं
अङ्गुष्ठाभ्यां नमः इत्यादि ल्कां हृदयाय नमः इत्यादि
अस्य पूजादिकं सर्वं पूर्ववत् ध्यानन्तु विशेषः यथा
क्रोधान्कल्पद्रुमतलविलसत्स्वर्णदोलाधिरूढं

९ गापीमध्यपुन्नमानेविकसितनववन्धूकसिंदूरभातं बीलंले
लीलकानुंभृत्नटविलसत्तन्हदृवंटावटाभ्यां वंदेस
दूलकामाङ्कुशलतितगलाकल्पादियुक्तं ११९ धूलिले तद्
वेरित्पनेजसारकोलापलनवैः मधुत्रयपुनेन्दुलाम्रवेपपूवे
वेदूरि १२० अथवासुदेवमन्त्रः ॐ एहिंहुं भगवते वासुदेवाय कीर्त्ति
ताः प्रधानेवेसवेतन्त्रमन्त्रायेषस्पोदपं १२१ ग्रसासुजा प्रा
तेऽस्यादिषु वीज्ञपीठमन्त्रन्विनासऋष्यादि न्यासेपाल
थ्या शिरसीवृजापतेयेऋ छंदसेनमः मुखे गायत्री छंदसे नमः
हृदिवासुदेवदेवतायैनमः ततः कराङ्गन्यासो ॐ अङ्गुष्ठाभ्यां नमः
नमः तर्जनीभ्यां स्वाहा: भगवते मध्यमाभ्यां वषट् वासुदेवायअ
नामिकाभ्यां हुं ॐ भगवते वासुदेवाय कनिष्ठिकाभ्यां फट् एवं
हृदयादिषु तथा च निवन्धे तारेनमःहृदये प्रोक्तं नमसा शिरोऽङ्ग
रिते देवेशो शिखा प्रोक्ता वासौकवचमतं १२२ समस्तेनम
वेदस्त्रमङ्गकल्पनमीरितं ततो मन्त्रन्यासः मूर्ध्नि भालदृग्नासास्य
गलेदोर्हृदयावसुजेकुटीनाभौ ध्वजेजानुद्वयेपादद्वये तथा १२३
दुादशवर्णान्विन्यसेत ततोमूर्तिपञ्जरं विन्यसेद्धिर्हमेत्रेन
व्यापकं विधाय ध्यायेत् विष्णुं शारदचंद्रकोटिसदृशं शंखं रथा
ङ्गं गदामम्भोजं दधतं सिताब्जनिलयं कान्त्या जगन्मोहनं श्री
वत्साङ्कदलद्वकुलकलमलामालिं स्फुरत्केङ्गणं श्रीवत्साङ्कमुदा
रकौस्तुभधरं वन्दे मुनीन्द्रैः स्तुतं १२४ एवं ध्यात्वा मानसैः सं
पूज्य शङ्खस्थापनं कृत्वा ततो वैष्णवीं पीठपूजां विधाय
पुनर्ध्यात्वा यावच्छक्त्या दिपज्ञं पुष्पांजलिदानपर्यन्तं विधा
य आवरणपूजामारभेत अग्निकोणेशनैऋत्यवायव्ये ईशाने केशरेषु
मध्ये दिक्षु च ॐ हृदयाय नमः इत्यादिना पञ्चाङ्गं नत्पूजयत
ततः पूर्वादिदलेषु शान्त्यादिसहिता नवासुदेवादीन्॥

केशवादीनिन्द्रादीन वज्रादींश्च सम्पूज्य धूपादिविसर्जना
न्तं कर्म समापयेत् अस्य पुरश्चरणं द्वादशलक्षजपः तथा
यद्वर्णलक्षं जपेन्मन्त्रं दीक्षितो विजितेन्द्रियः तत्सहस्रं
जुहुयात् लेराजापरिप्लुते १२५ अथ लक्ष्मीनारायण
मन्त्रः मायाद्वयं रमाद्वयं लक्ष्मीवासुदेवाय नमः प्रजावी
वादिसूर्यमन्त्रः तथा च निवन्धे हृल्लेखा बीजयुगलं रमाबी
जयुगं पुनः लक्ष्मीवासुदेवायहृदन्तः प्रजावादिकं १२६
वदेदष्टादशार्णोऽयं मन्त्रः सुरपादपः अस्य पूजादिकं
वासुदेवमन्त्रवत् ऋष्यादिन्यासे लक्ष्मीवासुदेवो
देवता करांगन्यासमन्त्रास्तु ॐ ह्रीं हृदयाङ्गुष्ठाभ्यां नमः ॐ
श्रीं श्रीं तर्जनीभ्यां स्वाहा ॐ लक्ष्मी मध्यमाभ्यां वषट् ॐ
वासुदेवाय अनामिकाभ्यां हुं ॐ नमः कनिष्ठिकाभ्यां फट्
एवं हृदयादिषु तथा च हृदयं शक्तिबीजाभ्यां रमाभ्यां
शिरोऽङ्गरितं लक्ष्म्या प्रोक्ता शिखा वर्म वासुदेवाय कीर्तितं १२७
नमसा त्विस्त्रमुद्दिष्टं सर्वतारादिकल्पयेत् ततो ध्यानं विद्युच्छ
द्रुतिभं वपुःकमलजादेवैः कुट्टयोरेकतां प्राप्तं
पद्मविलसत्भूषाभरालंकृते पीयापङ्कजदर्पणात्
निमषे कुम्भं करो जेगदापङ्कजचक्रशङ्खनिविष्टं
च्छ्रियेवः सदा १२८ अस्य पुरश्चरणं वर्णलक्षं जपः तथा व
र्णलक्षं जपेन्मन्त्रं ततो सहस्रसंख्याकैः होमं कुर्यात् द्वि
काष्ठैर्मधुरत्रयसंयुते १२९ पूर्णलक्षं वर्णसंख्यासहस्रदा
लदं अथ दधिवामनमन्त्रः ॐ नमो विष्णवे सुर

प
२०

पायेमहाबलायठद्वयं तथा निवेद्य तौ रोहे द्वि हय
वेषमानेडेः न्नमस्यवतिमवेत महाबलायठद्वंद्वं मन्त्ररक्षा
दशानेतः ग्रस्यपूजा प्रातः कृत्यादि ईसाममर्या
लाय प्राडस केलीहि नेनमः इत्यन्नंविन्यस्य ऋ
ष्यादिन्यासं कुर्यात शिरसी ईरु ऋषयेनमः मुखे
विराट्छंदसे नमः हृदि दधिवामनाय देवतायेनमः तथा
वन्हिवं वन्हीने कल्पिते पीठे प्राग्युक्तेनक्रमेणयजेत ततः
कराङ्गन्यासं ॐ श्रां अंगुष्ठाभ्यां नमः नेमः सो जेनीभ्यां स्वाहा
विश्वे मध्यमाभ्यां वषट सर्वरूपेयअनामिकाभ्यां हुं न
मोबलायकनिष्ठकाभ्यां वौषट स्वाहा करतलपृष्ठाभ्यां
फट एवं हृदयादिषु तथाएवं हृदे नशिरोद्वाभ्यां
शिरसेनमिषुदाद्वाभ्यां कवचपञ्चमिः प्राक्तेनेतला
द्वयेदेषैः १३ द्वाभ्यांमन्त्रामिशिखाङ्कं प्रकाराङ्गस्यमूर्
त्तिभिः ततोमन्त्रन्यास शिरसि भालवदनदृशोः कर्णयो
र्घ्राणे तालकेवाहुद्वये केठ हृदये उदरे नाभौ गुह्ये
ऊरुद्वये जानुद्वये जंघाद्वये पादद्वये मन्त्रवर्णान्न्य
सेत जंघाद्वये द्वये वर्णान् ततो मूर्तिपञ्जरादि कं वि
धाय ध्यायेत शङ्खाब्जरेणवमनिलाभगते षनेवदुमस्फ
टिकाकारे रत्नकोनिवैः शामिवक्त्राविंदे हस्ता ज्ञा
भ्याकेनकेलसश्रुताभ्यामिषु शिदध्यान्नादेवं
नेकवषकेधारयंत्रभजामः१२ एवंध्यात्वामानसैः स
म्पुज्यशङ्खस्थापनेकृते पति ततोवहुमरण्लान्ते

पीठे सम्पूज्य पुनर्ध्यात्वा ग्रावाहनादि पञ्च पुष्पाञ्जलीदा
मूर्त्ये नपर्यन्तं विधायावरणपूजा …ते ग्रम्यादिकोणमध्ये
दिक्षु ॐ हयग्रीवाय नमः इत्यादिना पूजयेत ततोदिग्दलेषु
वेसवीजं वामदेवादीन् शाक्तिसहितान् ध्वजादीन् तदग्रे के
शवादीन्ससम्पूज्य ऐन्द्रवज्रादीन् इन्द्रादीन् दिक्षुजाय
नमः इत्यादिकुमेण पूजयेत् एवं पुष्पशीकादीन् ततोधूपा
दिविसर्जनान्तं कर्म समापयेत ग्रस्यपुरश्चरणंलक्ष
यपुरश्चरणं लक्षत्रयजपः तथाच ग्रस्यलक्षजपेनमन्त्रं
तद्दशांशं घृतसुतेपायसान्नेनजुहुयात् दध्यान्नेनवा यथाविधि १३२

…श्रीहयग्रीवमन्त्रः ॐ उद्गिरत्प्रणवोद्गीथ सर्ववागी
श्वरेश्वर सर्ववेदमयाचिन्त्य सर्वबोधय बोधय १३३ त
थाविनिवन्धे उद्गिरत्प्रदमाभाष्यप्रणवोद्गीथ शब्द ततः
सर्ववागीश्वरेश्वरान्ते प्रवदेद्धीमा सर्ववेदमया
चिन्त्यशब्दान्ते सर्वमुच्चरेत बोधयद्वितयान्तोयं
मन्त्रसाराद्धिरीरितः १३४ ग्रस्यपूजा प्रातःकृत्यादिवै
ष्णवोक्तपीठमन्त्रान्तं विधाय ऋष्यादिन्यासं कुर्यात यथा
शिरसि ब्रह्मणे ऋषयेनमः मुखे अनुष्टुप्छन्दसेनमः हृ
दि श्रीहयग्रीवाय देवतायेनमः ततः कराङ्गन्यासं ॐ
ग्रंगुष्ठाभ्यांनमः उद्गिरत्प्रणवोद्गीथ तर्जनीभ्यां
स्वाहा सर्ववागीश्वरेश्वर मध्यमाभ्यां वषट सर्ववे
दमयाचिन्त्य ग्रनामिकाभ्यां हुं सर्वबोधय बोधय कनिष्ठ
काभ्यां फट एवं हृदयादिषु ततोध्यानं शरच्छशा
ङ्कप्रभमस्नवक्त्रं मुक्तामयैराभरणैः प्रदीप्तं रथाङ्गशं
खाचिनवाहुयुग्मं जानुद्वयेन्यस्तकरं भजामि १३५

१
२१

एवं ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनं कृत्वा वैष्ण
वोक्तपीठपूजां विधाय पुनर्ध्यात्वा मूलमन्त्रेण मूर्त्तिं
संकल्प्य तेनैव बीजेन संनिवेश्य तस्य बीजमुद्ध
तेयथा विद्युद्रावस्य मनी शविन्दुमद्बीजमीरितं १२
ततः पुनर्ध्यात्वावाहनादि पञ्चपुष्पाञ्जलीदा
नपर्यन्तं विधाय आवरणपूजामारभेत केशरेष्वग्न्या
दिदलेषु वेदाः ऋग्यजुःसामाथर्वाणो विदिक्षु स्मृति
न्यायसहशास्त्राणि पूजयेत् पत्राग्रेषु गदादीन्दि
व ओं हृदयाय नमः इत्यादि पञ्चाङ्गानि पूजयेत् तथा
च केशरेषु चतुर्वेदान् वह्न्यादिदलेषु पूजयेत् विदिक्षु स्मृ
तिन्यायसहशास्त्राणि पूजयेत् अग्रेषु पत्रेषु ध्वजादीन्
नेनाङ्कुशदेवताः १२८ तद्बहिरिन्द्रादीन्वज्रादींश्च पूजयेत्
ततो धूपादिविसर्जनान्तं कर्म समापयेत् अस्य पुरश्चरणं ज
पलक्षं तद्दशांशं होमः तथा च वर्णलक्षं जपेन्मन्त्रं विद्वान्पुष्पसमप्र
भुते: दशांशं सेवं ... जुहुयान्मन्त्रविज्जमा १२९ हयग्री
वैकाक्षरमन्त्रः सह हकारसकाररेफऊकारबिन्दुसंयुक्तं तथा
च केशव विषदन्तुस्थमनी सविन्दुमद्बीजमीरितं हकारा
मनुः प्रोक्तः सर्ववेगफलप्रदः १४० अस्य ब्रह्मऋषिरनुष्टप्
छन्दः हयग्रीवःपरमात्मा देवता हकारो बीजं ऊकारः कीलकं
सकारः शक्तिः हसां हसीं हसूं हसैं हसौं हसः इति षडङ्गं केवलं ना
ध्याने धवलनलिननिषण्णं शङ्खचक्रे च दधानं जपवलयकरा ज
पुस्तकाभिहितं कनेन दधानमक्षीणव ... रकेल्याणामभिरामे
तु रमवदहनजितं नाभिविद्या... जिमुखं १४१ अस्य प्रयोगः शङ्खा
कैः प्रसन्नवदनं ... हामरुनेरर ... तद्गात्रं शङ्खं ... हुङ्कारं
जविद्याधार्यं ध्यानं हृत्कमलकर्णिकामध्ये १४२ एवं ध्यात्वा मानस

इैः सम्पूज्य शङ्खस्थापनं कृत्वा पीठपूजां विधाय पुनर्ध्यात्वा
ध्यावाहनादि पञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजामा
रभेत तत्राग्नेः अग्न्यादिचतुरस्रे हयग्रीवाय नमः हयशिरसे हयवि
द्याय हयलक्ष्मी हयवागीश्वरी हयविद्या ... हयवना
दिव सदने हयेरवाभिमुखी ... लक्ष्मीसरस्वती रतिप्रीती की
र्तीकान्ती तुष्टिपुष्टिमिस्तती ... मदादि भिन्न्योवनितैरेन्द्रादि
भिः पूजयेत् ततो धूपादिविसर्जनान्तं कर्म समापयेत् अस्य
पुरश्चरणं वर्णलक्षं जपः तथा च वेदलक्षं जपेन्मन्त्रं दशां
शं अयुतं होमतः स्याज्जेनेहसां शहास्मः मन्त्राणेरे हयग्रीवैका
क्षरादि ... य शारः शब्दानेमामन्त्रेतः तथाकल्पः हयशि
रपदंऊ ... स बीजादिरयं मनुः ... वैका
क्षरः १४३ अस्य ब्रह्मऋषिरनुष्टुप्छन्दः हयग्रीवरूपी विष्णु
र्देवता ... सर्वमकारादिवर्णे मन्त्रमन्त्रे अङ्गन्यासः प्रणवे
धीमहि सर्ववागीश्वराय सर्ववेदमयाय चिन्त्याय सर्वबोधाय
बोधाय १४४ स्वाहान्तो मनुरादिस्तोबीजं ... वसम्पुटे
षष्ठमन्त्रः स्ववीजं गुणवादिः ब्रह्मवीजादीश्च मन्त्रा
न्ते विश्ववाणीश्वरायाय विनयायार्चयेन्तेन तु
नमो हयग्रीव विद्याराजाय विष्णवे १४५ स्वाहान्तो म
नान्तो हसेन सेवुपदिष्टेतः मन्त्राः सादिः सोऽहमात्रकः १४६
देवायमे नवः यामाः पूर्वोक्तहयग्रीवमन्त्रवत् सर्वं ज्ञानदम्
अथ नृसिंहमन्त्रः निवेन्दो उग्रं वीरं महाविष्णुम
न्त्रं ज्वलन्तं सर्वतोमुखं नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहं १४७ नृसिं
हे भीषणे भद्रे मृत्युमृत्युं नमाम्यहं ... नमामि यन्त्रिनिशान्त्रा
मन्त्रराजः सुरद्रुमः १४८ अस्य मन्त्रस्य मायापुष्टिनाम्न्यतिते
दासमकामफलप्रदः तथा वेकल्पे ... ब्रह्मा ऋषिरनुष्टुप्छन्दः

प· २२

स्यात् सर्वकामफलप्रदः ॥ अस्य पूजा प्रातःकृत्यादि वैष्णवोक्त
पीठमन्त्रं विधाय ऋष्यादिन्यासं कुर्यात् शिरसि ब्रह्मणे ऋ
षये नमः मुखे ऽनुष्टुप्छन्दसे नमः हृदि नृसिंहाय देवताये नमः
ततः करांगन्यासौ वद्रुमि हृदयं वेदैः शिरो रत्नैर्वह्निरदैः
शिखा भूमिसमुद्रैर्वसुभिः कवचमीरितं १४९ तावद्भि
र्नयनं प्रोक्तं अस्त्रमुक्तं करैर्नवैः ततो मन्त्रन्यासः शिरो ल
लाट नेत्रेषु मुखबाहुद्वये सन्धिषु साग्रेषु कुक्षौ हृदये गले पा
र्श्वद्वये पृष्ठे ककुदि १५० अत्र वर्णद्वन्द्वं ककुदीन्यासे हृत्स्थाने न पथा
द्वौ ततो ध्यानं माणिक्याद्रिसमप्रभं निजरुचा संत्रस्तरक्षो
गणं जानुन्यस्तकराम्बुजं त्रिनयनं रत्नोल्लसद्भूषणं बाहु
भ्यां धृतशंखचक्रमनिशं दंष्ट्रोग्रवक्त्रोल्लसज्ज्वालाजिह्वमु
दारकेशरचयं वन्दे नृसिंहं विभुं १५१ एवं ध्यात्वा मानसैः सम्पू
ज्य शंखस्थापनं विधाय वैष्णवोक्तपीठपूजां कृत्वा पुनर्ध्या
त्वा आवाहनादि पञ्चपुष्पाञ्जलिदानपर्यन्तं विधाय आवर
णपूजामारभेत् तद्यथा केशरेषु अग्न्यादिकोणेषु मध्ये दिक्षु
उग्रवीराय हृदयाय नमः महाविष्णवे [illegible] शिरसे
स्वाहा ज्वलन्तं सर्वतोमुखं शिखायै वषट् नृसिंहं भीषणं
कवचाय हुं भद्रं मृत्युमृत्युं नेत्रत्रयाय वौषट् नमाम्यहं अस्त्राय फट्
ततः पूर्वादिदलेषु गरुडं शङ्करं शेषं ब्रह्माणं च पूजयेत् दि
ग्दलेषु श्रियं ह्रियं धृतिं पुष्टिं च प्रणवादिनमोन्तेन पूजयेत्
तद्बहिरिन्द्रादीन् वज्रादींश्च पूजयेत् ततो धूपादिविसर्ज
नान्तं कर्म समापयेत् अस्य पुरश्चरणं द्वात्रिंशल्लक्षजपः
तथा च वर्णलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्ततः पायसैः
मधुराक्तैर्विधिवत् सम्जनतं १५२ मन्त्रान्तरं तारः शक्तिः
दोर्द्वन्द्वं श्रीवर्म फट् तथा वह्निवल्लभे पाशः शक्तिर्नरहरि

रंकुशो वर्म फट् फट् मनुः षडर्णो नरहरेः कथितः सर्वकामदः १५३
अस्य पूजा प्रातःकृत्यादि वैष्णवोक्तपीठमन्त्रं विन्यस्य ऋष्यादि
न्यासं कुर्यात् शिरसि ब्रह्मणे ऋषये नमः मुखे पङ्क्ति[illegible]छन्द
से नमः हृदि नृसिंहाय देवताये नमः ततः करांगन्यासौ ओं क्ष्रौं श्री
ह्रौं नमः ह्रीं तर्जनीभ्यां स्वाहा ह्रीं मध्यमाभ्यां वषट् क्रों अनामिका
भ्यां हुं हुं कनिष्ठिकाभ्यां वौषट् फट् करतलपृष्ठाभ्यां फट् एवं हृदया
दिषु ततो ध्यानं कोपादालोलजिह्वं विवृतनिजमुखं सोमसूर्या
ग्निनेत्रं पादादानाभिरक्तं प्रभमुपरिसितं भिन्नदैत्येन्द्रगात्रं शङ्खं
चक्रं सपाशांकुशकुलिशगदादारुसन्नाद्युद्धहन्तं भीमं तीक्ष्णाग्रदंष्ट्रं
मणिमयविविधाकल्पमीडे नृसिंहं १५४ एवं ध्यात्वा मानसैः सम्पू
ज्य शंखस्थापनं कृत्वा वैष्णवोक्तपीठपूजां विधाय पुनर्ध्यात्वा
आवाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं विधाय आवरणपूजामारभेत्
तद्यथा केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च ओं हृदयाय नमः इत्यादिना
षडङ्गानि पूजयेत् ततः पूर्वादिदलेषु शङ्खचक्रे पाशांकुशौ वज्रं गदां
खड्गं खेटकं च प्रणवादिनमोन्तेन पूजयेत् तद्यथा सिन्धुमन्त्र
द्रोहे ... तद्बहिरिन्द्रादीन् वज्रं कौमोदकीं खड्गं खेटं
च तेषु पूजयेत् ततः इन्द्रादीन् वज्रादींश्च पूजयेत् ततो धूपादि
विसर्जनान्तं कर्म समापयेत् अस्य पुरश्चरणं षड्लक्षजपः ज
था च षड्लक्षं जपेन्मन्त्रं घृतेन जुहुयात्ततः अन्तसहस्रं सम
भिर्मधु ... १५५ मन्त्रान्तरं तकारो वह्निमारूढो
मनुबिन्दुसमन्वितः एकाक्षरो मनुः प्रोक्तः सर्वकामफलप्र
दा १५६ अस्य पूजादिकं सर्वं मन्त्रराजवत् विशेषस्तु अत्रिऋ
षिर्गायत्री छन्दो नृसिंहो देवता तकारो बीजं ऊकारः शक्तिः
षड्दीर्घयुक्तबीजेनाङ्गकल्पना अस्य पुरश्चरणं द्वादशलक्षजपः
तथा च द्वादशलक्षं जपेन्मन्त्रं इत्यादि वचनात् मन्त्रान्तरं जय

१० २२ द्वपश्रीनृसिंहः तथा च कल्पे जपद्व पंलक्षमाद्यं श्रीनृसिंह
इत्यादि अन्यत्रापि तेनोमनुप्रोक्तो भजतां कामदोमणिः ॥ १५७ ॥ अस्य
चुल्लकाल ऋषिः गायत्री छन्दो नृसिंहो देवता ह्रस्वदीर्घबीजेनाङ्गकल्प
ना ॥ अस्य पुरश्चरणं मधुलक्षजपः वधुलक्षजपेन मन्त्रं इत्यादि वचनात्
अथ वराहमन्त्रः ॥ मधु इन्द्रयुक्ता प्रिया न्यासा नारो मायावाचूसादं शङ्कर
नारायणाय नमः प्रसादं माया तारः अस्य पूजा प्रयोगः प्रातः कृत्या
दिवेसवोक्तो सेवोक्तो वापीन्यास विधाय अस्य ध्यादिन्यासं कुर्यात्
शिरसि भार्गव ऋषये नमः मुखे अनुष्टुप् छन्दसे नमः हृदि हरि
रूपाय देवताये नमः गुह्ये बीजाय नमः पादयोः शक्तये नमः
नमः करा ङ्गन्यासौ हां अङ्गुष्ठाभ्यां नमः इत्यादि षड् दीर्घयुक्तबी
जेन एवं हृदयादिषु ततो ध्यानं शूले वक्षोपाज्जजन्यमपीठि हृ
धृते करैः स्वस्वभूवादु लीलाहुदेहे हरिहरं भजे ॥ १५८ ॥ एवं ध्यात्वा मा
नसैः संपूज्य शङ्खस्थापनं कुर्यात् ततो पेसवोक्तो पीठे वापी
पूजां विधाय पुनर्ध्यात्वा आवाहनादि पञ्चपुष्पाञ्जलिदानपर्यं
न्तं विधाय आवरणपूजामारभेत केसरेषु अग्न्यादि कोणेषु मध्ये दिक्षु च
हृदयाय नमः इत्यादिना पूजयेत् ततः पत्रेषु पूर्वादि ॐ लं
दम्ये नमः एवं सरस्वत्यै नारायण्यै नमः धाराये भूधराये क्षितिकाये
अम्बिकाये गङ्गाये गङ्गाधराये ततो हिरिन्द्रादीन् पूजयेत्
वज्रादिकं च ज्ञात्वा अनुकूला त्यात् ततो धूपादीनि सर्जयेत्
को कर्मासमर्पयेत् अस्य पुरश्चरणे लक्षजपः घृतपायसेनायुतहोम
तथा च लक्षमेकं जपेन्मन्त्रं तद्दशांशं घृतलुते पायसेर्हरसेका
ये सेवको तेहव्यवाहने ॥ १५८ ॥ अथ वराहमन्त्रः ॥ तारो नमो
भगवते वराहरूपाय भूर्भुवः स्वःपतये भूपतित्वं मे देहि ददा
पय स्वाहा अस्यप्रयोगः सदस्तरः तथा च कल्पे तारो नमो
भगवते वराहरूपाय भूर्भुवः स्वः स्यात् पतये

भूपतित्वं मे पदा देहि दे स्वहरेयपदापय वह्निजायावधिमन्त्रः स्या
त् पङ्क्तिपादाक्षरः ॥ १६० ॥ अस्य पूजा प्रातः कृत्यादि वैसवोक्तो पीठ
मन्त्रविन्यासाङ्ग ऋष्यादिन्यासं कुर्यात् शिरसि भार्गव ऋ
षये नमः मुखे अनुष्टुप् छन्दसे नमः हृदि आदिवराहाय देवता
यै नमः ततः कराङ्गन्यासौ एकदंष्ट्राय अङ्गुष्ठाभ्यां नमः व्योमो
ल्काय तर्जनीभ्यां स्वाहा तेजोधिपतये मध्यमाभ्यां वषट् विश्व
रूपाय अनामिकाभ्यां हुं महादंष्ट्राय कनिष्ठकाभ्यां फट् एवं
हृदयादिषु तथा च भार्गवोऽस्य मुनिराख्यातोच्छन्दोऽनुष्टुबुदा
हृतः देवतादिवराहस्य मन्त्रस्यास्य विनाधुधैः ॥ १६१ ॥ एकदंष्ट्राय हृ
दयं व्योमोल्काय शिरः स्मृतं शिखा तेजोधिपतये विश्वरूपाय
वर्म च ॥ १६२ ॥ महादंष्ट्राय ... अस्त्रं स्यात् पञ्चाङ्गमिति कल्पयेत्
अथ वराहप्रपञ्चसारे ... ततो ध्यानं आपाद
आजानुदेशाद् ... नाभिदेशा ... दक्षिणाद्युरेशा
ते ... विनिर्मित



मस्तका ... ॐ इति ध्याने
यत्र ... दौ च
... दानांभ ... षट्
... १६३ ... मा ... वा ह
संपूज्य शङ्खं
... एवं ध्यात्वा मानसैः
स्थापनादि पञ्चपुष्पा
दानपर्यन्तं विधाय आवरणपूजामारभेत पूर्वादि केशरे दि
एकदंष्ट्राय हृदयाय नमः व्योमोल्काय शिरसे स्वाहा
महातेजोधिपतये शिखायै वषट् विश्वरूपाय कवचा
य हुं अग्नि निऋति वायवीशानकोणेषु महादंष्ट्राय अस्त्रा
य फट् ... पत्रेषु ॐ चक्राय नमः एवं शङ्खाय ...

५॰
२४

कायनादाय । प्रासादाय । वराय । अभयाय । तदुक्तं हरिहिन्द्रादीन्
वज्रादींश्च प्रपूजयेत् ततो धूपादिविसर्जनान्तं कर्म समापयेत्
अस्य पुरश्चरणे लक्षजपः तथा च लक्षमेकं जपेन्मन्त्रं मधु
राक्तैः सरसैर्हुनेत् जुहुयात्तद्दशांशेन पीठे विष्णुं प्रपूजयेत् विष्णो
मन्त्रराजेन जपेत् तथा च न जपेद्देवं रात्रौ प्रावेसाक्षेन दुष्प्रा
ति इति वैशम्पायनसंहितायां ॥ इति विष्णुमन्त्रपरिच्छेदः ॥
अथ शिवमन्त्रविधानप्रारम्भः ॥ उद्दिश्य यं केन तं वतीति सिद्धिजात
पस्यो यत्पादयुक्ः जरजोविभूधीलसेस्थि याशामवरे भुजङ्गरा
जविभूषिताङ्गः । तं वन्दे मौलिममलं मनसा स्मरामि १६४ अथ
वक्ष्ये महेशस्य मन्त्रान् सर्वसमृद्धिदान् यैः पूर्वं मृत्युं प्राप्ताः सि
साधुजा मन्त्रसा १६५ मान्त्रमोकारसे युक्तं बिन्दुभूषितमस्तके
प्रासादाख्यो मनुः प्रोक्तो भजतां कामदो मनिः १६६ अस्य पूजा
प्रातःकृत्यादि मातृकान्यासान्तं विधाय श्रीकण्ठन्यासं मातृका ॥दि॥
स्थाने कुर्यात् तद्यथा अं श्रीकण्ठपूर्णोदरीभ्यां नमः नमः सर्वत्र या
अनन्तविरजाभ्यां । ईं सूक्ष्मशाल्मलीभ्यां । उं त्रिमूर्तिलोलाक्षी
भ्यां । ऊं अमरेश्वरवर्तुलाक्षीभ्यां । ऋं अर्घीशदीर्घघोणाभ्यां ।
ॠं भारभूतिसुदीर्घमुखीभ्यां । ऌं अतिथीशगोमुखीभ्यां ।
ॡं स्थाणुकदीर्घजिह्वाभ्यां । एं हरकुण्डोदरीभ्यां । ऐं झ
ण्टीशोर्ध्वमुखीभ्यां । ओं भौतिकविकृतमुखीभ्यां । औं सद्योजा
तज्वालामुखीभ्यां । अं अनुग्रहेश्वरोल्कामुखीभ्यां । अ
×अः× क्रूरेशश्रीमुखीभ्यां । महासेनविद्यामुखीभ्यां । कं क्रोधीशम
हाकालीभ्यां । खं चण्डेशसर्वसिद्धिसरस्वतीभ्यां । गं
×पञ्चा× पञ्चान्तकगौरीभ्यां । घं शिवोत्तमत्रैलोक्यविद्याभ्यां । ङं एकरु
द्रमन्त्रशक्तिभ्यां । चं कूर्मात्मशक्तिभ्यां । छं एकनेत्रभूतमात
भ्यां । जं चतुराननलम्बोदरीभ्यां । झं अजेशद्राविणीभ्यां ।

ञं सर्वनागरीभ्यां । टं सोमेशखेचरीभ्यां । ठं लाङ्गलीशमञ्जरीभ्यां ।
डं दारुकरूपिणीभ्यां । ढं अर्धनारीश्वरवीरिणीभ्यां । णं उमाकान्तकाको
दरीभ्यां । तं आषाढीपूतनाभ्यां । थं दण्डिभद्रकालीभ्यां । दं अद्रि
योगिनीभ्यां । धं मीनशङ्खिनीभ्यां । नं मेषगर्जिनीभ्यां । पं लोहि
तकालरात्रिभ्यां । फं शिखिकुब्जिनीभ्यां । बं छगलण्डकपर्दिनीभ्यां ।
भं द्विरण्डेशकपर्दिनीभ्यां । मं महाकालजयाभ्यां । यं त्वगात्मवालि
न्सुमुखेश्वरीभ्यां । रं असृगात्मभुजङ्गेशरेवतीभ्यां । लं मांसात्म
पिनाकीशमाधवीभ्यां । वं मेदआत्मखड्गीशवारुणीभ्यां । शं अ
स्थ्यात्मबकेशवायवीभ्यां । षं मज्जात्मश्वेतरक्षोविदारणीभ्यां । सं शु
×शाल्मली× क्रात्मभृग्वीशसहजाभ्यां । हं प्राणात्मनकुलीशलक्ष्मीभ्यां । लं जी
वात्मशिवव्यापिनीभ्यां । क्षं क्रोधात्मसंवर्तकमायाभ्यां । सांहि
त्यविवक्षयनवक्षचनेतु दसमासो वेति न्यायादिविरोधेन एवं वाक्ये
तथा च निबन्धे श्रीकण्ठानन्तसूक्ष्माश्च त्रिमूर्तिरमरेश्वरः अर्घीशो
भारभूतिश्च तिथीशः स्थाणुको हरः १६७ झिण्टीशो भौतिकः
सद्योजातश्चानुग्रहेश्वरः अक्रूरश्च महासेनः षोडश स्वरमू
र्तयः १६८ ततः क्रोधीशचण्डेशौ पञ्चान्तकशिवोत्तमाः तथै
करुद्रकूर्मैकनेत्राः चतुराननाः १६९ अजेशः सर्वसोमे
शौ तथा लाङ्गलिदारुकौ अर्धनारीश्वरश्चोमाकान्तश्चाषा
ढिदण्डिनौ १७० अद्रिमीनमेषश्च लोहितश्च शिखी
तथा छगलण्डद्विरण्डौ समहाकालवालिनौ १७१
भुजङ्गेशः पिनाकी च खड्गीशश्च बकः स्मृतः श्वेतभृग्वीश
नकुलीशाः शिवः संवर्तकः स्मृतः १७२ एतान् रुद्रान् समाख्या
तान् धृतशूलकपालकान् पूर्णोदरी स्याद्विरजा शाल्मली
तदनन्तरं १७३ लोलाक्षी वर्तुलाक्षी च दीर्घघोणा सुदीर

५· ता सदी श्रीमुखी मानुखो दीर्घजिह्वा तथैव च १७४ कंकालदंष्ट्रा हु
२५ मुख्या च तथा विकृतमुखापि ज्वालामुखी ततो लेपः १७५ शु
ल्का मुखी स्मृता १७६ भृशाभुखी मखी च विद्यास्ततो तालुः
स्वरराज्ञः यः महाकाली सरस्वत्यो सर्वसिद्धिसमन्विते १७७
गौरी त्रैलोक्यविद्या स्यान्मन्त्रशक्तिस्ततः परं आत्मशक्ति
र्भूतमाता तथा लम्बोदरी मता १७८ द्राविणी नागरी खेच
रेखरी याथ मञ्जरी रूपिणी वीरिणी पश्चात् काकोदर्यपि
पूतना १७८ स्याद् भद्रकाली योगिन्यौ शङ्खिनी गर्जिनी तथा
कालरात्रिश्च कुब्जिन्या कपर्दिन्यपि वज्रया १७९ जया च
सुमिरवस्था या रेवती माधवीततः [illegible] वारुणी वायवी
प्रोक्ता पश्चाद् रक्षोविदारिणी १८० ततः सहजालक्ष्मीव्या
पिनी मायया न्विता एताः रुद्राङ्कः पीठस्याः शिनन्दरारत्नवि
ग्रहाः १८१ श्रीकण्ठवक्त्र्या लाभ्यामलंकृता योगमुद्रा ॥
ततः सामान्यपूजावधनं कृत्वा पीठन्यासं कृत्वा पीठशक्तिन्य
सेत् यथा ओं वामायै नमः एवं ज्येष्ठायै रौद्र्यै कान्त्यै कल
विकरिण्यै बलविकरिण्यै बलप्रमथिन्यै सर्वभूतदमन्यै पू
र्वादिकेशरेषु विन्यसेत् मध्ये ओं मनोन्मन्यै नमः तदुपरि ओं
नमो भगवते श्रीकलगुणात्मसक्तियुक्तायानन्तायपद्मयोगपीठा
त्मने नमः तथा च सारदायां वामा ज्येष्ठा तथा रौद्री कालीं च कलविकरिण्यौ ×कलः×
विकरिण्यथ तथा प्रोक्ता बलादि विकरिण्यथा १८२ बलप्रमथनी
पश्चात् सर्वभूतदमन्यपि मनोन्मनीति निर्दिष्टा नवपीठस्य श
क्तयः १८३ नमो भगवते पश्चात् सकलादिपदं ततः गुणादिशक्ति
युक्ताय ततोनन्ताय तत्परं १८४ योगपीठात्मने नमः पीठमन्त्रो
दितो मनुः पद्मेन मध्ये पद्मासनं ततः १८५ मूर्ति मू
लेन संकल्प्य तत्रावाहनं च जेद् देवं ततो पञ्चवक्त्रादिन्यासः ~

शिरसि वामदेवाय ऋषये नमः मुखे पङ्क्तिच्छन्दसे नमः हृदि
सदाशिवाय देवतायै नमः सारदायां वामदेवो मुनिश्छन्दः पङ्क्ति
र्देवः सदाशिवः ततः कराङ्गन्यासः ह्रां अङ्गुष्ठाभ्यां नमः इत्यादि
एवं ह्रां हृदयाय नमः इत्यादि षड्दीर्घयुक्ताकारैर्न्यसेत् तेन
षट्दीर्घयुक्तबीजेन षडङ्गविधिरीरितः ततः ईशानादि पं
चमूर्तिन्यसेत् करयोरङ्गुष्ठाद्यङ्गुलिषु यथा ओं ह्रौं ईशा ×१८७×
नाय नमः तर्जन्योः हें तत्पुरुषाय नमः मध्यमयोः हुं अघोराय नमः
अनामिकयोः हिं वामदेवाय नमः हं सद्योजाताय नमः तथा च ईशा
नादिन्यसेन्मूर्तीरङ्गुष्ठादिषु देशिकः ईशानाद्यास्ततः पञ्चमूर्ती
र्वदनेषु १८८ वामदेवाहृदये पश्चात् सद्योजातं तु पादयोः ओंकारा
द्यैः पञ्चह्रस्वदीर्घैर्नामात्तसंयुतैर्विपन १८९ ततः हृदङ्गुलीमिर्न्यं
यसेत् हीजादिकान्न्यसेत् ततस्तत्तद्दङ्गुलीभिः ह्रौं ईशानाय नमः १९०
इत्यादि शिरोवदनहृद्गुह्यपादेषु पञ्चमूर्तीन्यसेत् ततः ओं
ऊर्ध्वप्राग्दक्षिणपश्चिमोत्तरेषु मुखेषु ततस्तद्ङ्गुलिभिः सत्तहि
जैः त्रिंशत्कलान्न्यसेत् एतत्कलान्यासं कृत्वा ध्याये
त तत्र न्यासान् धिकारात् ततः ऊर्ध्वप्राग्दक्षिणपश्चिमोत्त
रेषु ईशानस्य पञ्चकलाः पञ्चवक्त्रादिकाः
पुरुषादिन्यमोन्यासेत् तद्यथा ईशानः सर्वविद्यानां
ओं शशिन्यै कलायै नमः ईश्वरः सर्वभूतानां अङ्गदायै क
लायै नमः ओं ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा ओं इष्टदा
यै कलायै नमः शिवो मे अस्तु ओं मरीच्यै कलायै नमः ओं सदाशि
वोम् ओं अंशुमालिन्यै कलायै नमः ततः पूर्ववक्त्रम्
दक्षिणावर्तवक्त्रे तत्पुरुषस्य चतस्रः कला विन्यसेत् यथा तत्
पुरुषाय विद्महे ओं शान्त्यै नमः कलायै नमः महादेवाय धीमहि
×१९१× ओं विद्यायै कलायै नमः ओं तन्नो रुद्रः ओं प्रतिष्ठायै कलायै नमः

१३
२६

पूर्ववदस्य ॐ निवृत्त्यै कलायै नमः ततो रुद्रेण ग्रीवायां यं
शाङ्घ्येनाभौ केन्द्रो ॐ ष्ठ वह्निस्य घोरस्याष्टौ कलान्यसेत्
यथा ॐ अघोरेभ्यः ॐ उमायै कलायै नमः अथ घोरेभ्यः मो
हायै कलायै नमः घोर ॐ क्षमायै कलायै नमः ॐ घोरतरे
भ्यः ॐ निद्रायै कलायै नमः ॐ सर्वतः सर्व ॐ व्याधये कला
यै नमः सर्वेभ्यः ॐ मृत्यवे कलायै नमः ॐ नमस्ते
ॐ क्षुधायै कलायै नमः ॐ रुद्ररूपेभ्यः ॐ तृष्णायै कलायै नमः
ततो गुह्यस्य क्षणे कोष्ठ उरुद्वये जानुद्वये जंघाद्वये स्फिग्द्वये क
ट्यां पार्श्वद्वये वामदेवस्य त्रयोदश कलान्यसेत् यथा ॐ वा
मदेवाय नमः ॐ रजायै कलायै नमः ॐ ज्येष्ठाय नमः ॐ रक्षा
यै कलायै नमः रुद्राय नमः ॐ रत्यै कलायै नमः कालाय नमः
ॐ पालिन्यै कलायै नमः कल ॐ कामायै कलायै नमः विकर
णाय नमः ॐ संयमिन्यै कलायै नमः बल ॐ क्रियायै
कलायै नमः विकरणाय नमः ॐ बुद्ध्यै कलायै नमः बल ॐ
स्थिरायै कलायै नमः प्रमथनाय नमः ॐ रात्र्यै कलायै नमः
सर्वभूतदमनाय नमः ॐ भ्रामिण्यै कलायै नमः मन ॐ
मोहिन्यै कलायै नमः उन्मनाय नमः ॐ जरायै कलायै
नमः ततः पादद्वये स्तनद्वये नासिकायां मूर्ध्नि बाहुद्वये
सद्योजातस्याष्टौ कलान्यसेत् यथा ॐ सद्योजातं प्रपद्या
मि ॐ सिद्ध्यै कलायै नमः सद्योजाताय वै नमः ॐ ऋद्ध्यै
कलायै नमः भवे ॐ द्युत्यै कलायै नमः अभवे ॐ लक्ष्म्यै
कलायै नमः अनादिभवे ॐ मेधायै कलायै नमः ॥
भजस्व मां ॐ प्रभायै कलायै नमः भव ॐ प्रभायै कलायै नमः
उद्भवाय ॐ सुधायै कलायै नमः ततः पञ्चाङ्गुली सु ॥

ईशानाद्याः पञ्च ब्रह्म चोन्यसेत् ॐ ईशानः सर्वविद्यानामीश्वरः स
र्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मेऽस्तु सदाशि
वोम् ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदया
त् ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः सर्वतः सर्वसर्वेभ्यः
नमस्तेऽस्तु रुद्ररूपेभ्यः ॐ वामदेवाय नमो ज्येष्ठाय नमो रुद्राय नमः
कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलप्रम
थनाय नमः सर्वभूतदमनाय नमः मनोन्मनाय नमः ॐ सद्योजा
तं प्रपद्यामि सद्योजाताय वै नमः भवे भवेनादि भवे भजस्व माम्
भवोद्भवाय नमः एवं मूर्ध्नि हृदयगुह्यपादेषु एतान् चोन्यसेत् ए
षं ऊर्ध्व प्राग्दक्षिणोदीच्य पश्चिमेषु मुखेषु एतान् चोन्यसेत् ततोऽ
न्यासं तत्र कुर्यात् ऐं ह्रौं ह्रीं सर्वज्ञाय हृदयाय नमः अमृ
तेजोमालिने तृप्ताय ब्रह्मणे शिरसे स्वाहा ज्वलितशिखिशिखाय
स्वाहा अनादिबोधाय शिखायै वषट् वज्रिणे वज्रहस्ताय स्वतन्त्राय क
वचाय हुं सौं वौं हौं परतो ज्वल शक्तये नेत्रत्रयाय वौषट् ह्लीं पशु हुं
जाः फट् अनन्तशक्तये अस्त्राय फट् तथा च मले सर्वज्ञता तृप्ति र
नादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः अनन्तशक्तिश्च विभोर्वि
धिज्ञाः षडाहुरङ्गानि महेश्वरस्य १८६ एवं विन्यस्य ध्यायेत् यथा
मुक्तापीतपयोदमौक्तिकजवावर्णैर्मुखैः पञ्चभिस्त्र्यक्षैरञ्चितमीश
मिन्दुमुकुटं पूर्णेन्दुकोटिप्रभम् शूलं टङ्ककृपाणवज्रदहनान्नागेन्द्रघण्टाङ्
कुशान् पाशं भीतिहरं दधानममिताकल्पोज्ज्वलाङ्गं भजे १८७ एवं ध्या
त्वा मानसैः सम्पूज्यार्घ्यस्थापनं कुर्यात् अत्र शङ्खनिषेधः सर्वत्रै
व प्रशस्तो ब्रह्मः शिवस्यार्घ्यं विना इति ततः शैवोक्तपीठपूजां
विधाय पुनर्ध्यात्वा मूलेन मूर्तिं सङ्कल्प्यावाहनादि पञ्चपु
ष्पाञ्जलिदानपर्यन्तं विधाय आवरणपूजामारभेत् यथा ऐशान्यां
ॐ ईशानाय नमः पूर्वे ॐ तत्पुरुषाय नमः दक्षिणे ॐ अघोरा

पत्र २०

नमः उत्तरे ॐ वामदेवाय नमः पश्चिमे ॐ सद्योजाताय नमः ईशाना
दिकोणेषु निवृत्त्यै नमः एवं प्रतिष्ठायै विद्यायै शान्त्यै ततो रूप
पेषु पूर्वादि ॐ अनन्ताय नमः एवं सूक्ष्माय शिवोत्तमाय एकनेत्रा
य एकरुद्राय त्रिमूर्तये श्रीकण्ठाय शिखण्डिने ततस्तु उत्तरा
दिक्रमेण ॐ उमायै नमः एवं चण्डेश्वराय नन्दिने महाकालाय ग
णेशाय वृषाय भृङ्गिरीटाय स्कन्दाय ततस्तु पूर्वादिक्रमेण इ
न्द्रादीन् वज्रादींश्च पूजयेत् ततो धूपादि विसर्जनान्तं कर्म समाप
येत् अस्य पुरश्चरणं पञ्चलक्षजपः तथा च एवं ध्यात्वा जपेन्म
न्त्रं पञ्चलक्षमधुप्लुतैः पृथुकैः करवीरोत्थैर्जुहुयात् दशांशतः । १८८
अथ मन्त्रान्तरं भुवनेशी प्रणवं नमः शिवाय भुवनेशी पुनः प्रणवादौ मनुः
तथा च निबन्धे षडक्षरः श्री शिवहेतुः कथितो ब्रह्मवादिभिर्मनुः ऋष्यादि
जा प्रातः कृत्यादि पूर्वोक्त पीठमन्त्रान्ते पीठन्यासं विधाय ऋष्या
दिन्यासं कुर्यात् शिरसि वामदेवाय ऋषये नमः मुखे पङ्क्तिच्छ
न्दसे नमः हृदि उमापतये नमः ततः करन्यासः ॐ अङ्गुष्ठा
भ्यां नमः नं तर्जनीभ्यां स्वाहा मं मध्यमाभ्यां वषट् शिं अनामिका
भ्यां हुं वां कनिष्ठिकाभ्यां वौषट् यं करतलपृष्ठाभ्यां फट् एवं हृ
दयादिषु ततो ध्यानं वन्धूककाञ्चननिभं रुचिराक्षमालां पाशाङ्कुशौ वरदं
स्मेरवक्त्रं त्रिनेत्रं कपालं वरमभयदं वा ... हारनेमामि
वामांसस्तलम्बं ॥ इति षडक्षरः समाप्तः अथ ...

अथ प्रस्तावक वचनानि ॥–

अथाद्यौ भुवनेश्वरीस्तोत्रं । अथानन्दमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीं । ईडे सकलसम्पत्यै जगत्कारणमम्बिकां ॥ आद्यामशेषजननीमरविन्दयोनेर्विष्णोः शिवस्य च वपुः प्रतिपादयित्रीं । सृष्टिस्थितिक्षयकरीं जगतां त्रयाणं स्तुत्वा गिरं विमलयाम्यहमम्बिके त्वां । पृथ्व्या जलेन शिखिना मरुताम्बरेण होत्रेन्दुना दिनकरेण च मूर्तिभाजः । देवस्य मन्मथरिपोरपि शक्तिमत्ता हेतुस्त्वमेव खलु पर्वतराजपुत्रि । त्रिस्रोतसः सकललोकसमर्चिताया वैशिष्ट्यकारणमवैमि तदेव मातः । त्वत्पादपंकजपरागपवित्रितासु शम्भोर्जटासु नियतं परिवर्त्तनं यत् । आनन्दयेत् कुमुदिनीमधिपः कलानां नान्यामिनः कमलिनीमथ नेतरां वा एकस्य मोदनविधौ परमेकमीष्टे त्वं च प्रपंचमभिनन्दयसि स्वदृष्ट्या ॥ आद्याप्यशेषजगतां नवयौवनासि शैलाधिराजतनयाप्यतिकोमलासि । त्रय्याः प्रसूरपि तया न समीक्षितासि ध्येयापि गौरि मनसो न पथि स्थितासि ॥ आसाद्य जन्म मनुजेषु चिराद्दुरापं तत्रापि पाटवमवाप्य निजेन्द्रियाणां नाभ्यर्चयंति जगतां जनयित्रि ये त्वां निःश्रेणिकाग्रमधिरुह्य पुनः पतंति ॥ कर्पूरचूर्णहिमवारिविलोडितेन ये चन्दनेन कुसुमैश्च सुजातगन्धैः । आराधयंति हि भवानि समुत्सुकास्त्वां ते खल्वशेषभुवनाधिभुवः प्रथंते । आविश्य मध्यपदवीं प्रथमे सरोजे सुप्ताहिराजसदृशी विरचय्य विश्वं । विद्युल्लतावलयविभ्रममुद्वहंती पद्मानि पंच विदलय्य समश्नुवाना । तन्निर्गतामृतरसैरभिषिच्य गात्रं मार्गेण तेन विलयं पुनरप्यवाप्ता । येषां हृदि स्फुरसि जातु न ते भवेयुर्माहेश्वर कुटुम्बिनि गर्भभाजः । आलम्बिकुंतलभराभि-रामवक्त्रा आपीवरस्तनतटीं तनुवृत्तमध्यां । चिंताक्षसूत्रकलशालिखिताढ्यहस्ता मावर्त्तयामि मनसा तव गौरि मूर्त्तिं ॥

,आस्थाय योगमवजित्य च वैरिषट्कमावध्य चेन्द्रियगणं मन
सि प्रसन्ने। पाशांकुशाभयवराढ्यकरां सुवक्त्रामालोकयंति भुव
नेश्वरि योगिनस्त्वां। उत्तप्तहाटकनिभा करिभिश्चतुर्भिरावर्ज्जि
तामृतघटैरभिषिच्यमाना। हस्तद्वयेन नलिने रुचिरे वहंती
पद्मापि साभयवरा भवसि त्वमेव॥ अष्टाभिरुग्रविविधायुधवा
हिनीभिर्दोर्वल्लरीभि-रधिरुह्य मृगाधिराजं। दूर्वादलद्युति
-रमर्त्यविपक्षपक्षान् न्यक्कुर्वती त्वमसि देवि भवानि दुर्गा॥
,आविर्निदाघजलशीकरशोभिवक्त्रां गुंजाफलेन परिकल्पितहा
रयष्टिं। पत्रांशुकामसितकांतिमनंगतन्द्रां मायां पुलिन्दतरु
णीमसकृत् स्मरामि॥ हंसैर्गतिक्वणितनूपुरदूरकृष्टैर्मूर्त्तैरि
वाप्तवचनै-रनुगम्यमानौ। पद्माविवोर्द्ध्वमुखरूढसुजातनालौ
श्रीकंठपत्नि शिरसैव दधे तवांघ्री॥ द्वाभ्यां समीक्षितुमतृप्तिम
तेव दृग्भ्यामुत्पाद्य भालनयनं वृषकेतनेन। सान्द्रानुराग
तरलेन निरीक्ष्यमाणे जंघे उभे अपि भवानि तवानतोऽस्मि॥
ऊरू स्मरामि जितहस्तिकरावलेपौ स्थौल्येन मार्द्दवतया परिभू
तरम्भौ। श्रोणीभवस्य सहनौ परिकल्प्य दत्तौ स्तम्भाविवाम्बर
वसा तव मध्यमेन॥ श्रोण्यौ स्तनौ च युगपत् प्रथयिष्यतोच्चैर्बा
ल्यात् परेण वयसा परिहृष्टसारः। रोमावली विलसितेन विभाव्य
मूर्त्तिर्मध्यं तव स्फुरतु मे हृदयस्य मध्ये॥ सख्या स्मरस्य हर
नेत्रहुताशभीरोर्लावण्यवारिभरितं नवयौवनेन। आपाद्यदत्त
मिव पल्वलमप्रधृष्यं नाभिं कदापि तव देवि न विस्मरेयं॥ ईशो
पगेहधिषुनं भसितं दधाने काश्मीरकर्द्दममनुस्तनपंकजे ते।
स्नानोत्थितस्य करिणः क्षणलक्षफेणौ सिन्दूरितौ स्मर यतः सम
दस्य कुम्भौ॥ कंठाभिरिक्त गलदुज्ज्वलकांतिधारा शोभौ भुजौ
निजरिपोर्मकरध्वजेन। कंठग्रहाय रचितौ किल दीर्घपाशौ मा
तर्म्मम स्मृतिपथं न विलंघयेतां। नात्यायतं रचितकम्बुविलास
चौर्य्यं भूषाभरेण विविधेन विराजमानं। कंठं मनोहरगुणं गिरिरा
जकन्ये संचिंत्य तृप्तिमुपयामि कदापि नाहं॥ आत्यायताक्षमभिजात
ललाटपट्टं मन्दस्मितेन दरफुल्लकपोलरेखं। बिम्बाधरं वदनमुन्नत
दीर्घनासं यस्ते स्मरत्यसकृदम्ब स एव जातः॥ आविस्तुषारकरलेखम
नल्पगन्धपुष्पोपरिभ्रमदलिव्रजनिर्व्विशेषं। यश्चेतसा कलयते तव केश
पाशं तस्य स्वयं गलति

ॐ श्रीगणेशाय नमः।

तंत्रसारः।

सप्तविंशखण्ड।

देवि पुराणपाशः। श्रुतिसुचरितपाकं धीमतां स्तोत्रमेत
त् पठति य इह मर्त्यो नित्यमार्द्रान्तरात्मा। स भवति
पदमुच्चैः सम्पदं पादनम्रक्षितिपमुकुटलक्ष्मी लक्षणा
नां चिराय। इति भुवनेश्वरीस्तोत्रं समाप्तं॥

अथ भुवनेश्वरीकवचं। देव्युवाच। भुवने
श्वर्य्यास्तु देवेश या या विद्याः प्रकाशिताः। श्रुता
श्चाधिगताः सर्व्वाः श्रोतुमिच्छामि साम्प्रतं। त्रैलोक्य
मंगलं नाम कवचं यत् पुरोदितं। ईश्वर उवाच।
शृणु पार्व्वति वक्ष्यामि सावधानावधारय। त्रैलोक्य
मंगलं नाम कवचं मंत्रविग्रहं। सिद्धिविद्यामयं
देवि सर्व्वैश्वर्य्यप्रदायकं। पठनाद्धारणान्मर्त्यस्त्रैलो
क्यैश्वर्य्यवान् भवेत्। त्रैलोक्यमंगलस्यास्य कवचस्य
ऋषिः शिवः। छन्दो विराट् जगद्धात्री देवता भुवने
श्वरी। धर्म्मार्थ्यकाममोक्षेषु विनियोगः प्रकीर्त्तितः।
ह्रीँ वीजं मे शिरः पातु भुवनेशी ललाटकं। ऐँ
पातु दक्षनेत्रं मे ह्रीँ पातु वामलोचनं। श्रीँ पातु
दक्षकर्णं मे त्रिवर्णात्मा महेश्वरी। वामकर्णं सदा
पातु ऐँ घ्राणं पातु सर्व्वदा। ह्रीँ पातु वदनं देवी ऐँ

पातु रसनां मम। वाक्पुटा च त्रिवर्णात्मा कंठं पातु परा
त्मिका। श्रीं स्कन्धौ पातु मे नित्यं ह्रीं भुजौ पातु सर्व्वदा
क्लीं करौ त्रिपुटेशानी त्रिपुटैश्वर्य्यदायिनी। ओं पातु
हृदयं ह्रीं मे मध्यदेशं सदावतु। क्रौं पातु नाभिदेशं
सा त्र्यक्षरी भुवनेश्वरी। सर्व्वबीजप्रदा पृष्ठं पातु सर्व्व
वशंकरी। ह्रीं पातु गुह्यदेशं मे नमो भगवती कटिं।
माहेश्वरी सदा पातु सङ्खिनी जानुयुग्मकं। अन्नपूर्णे
सदा पातु स्वाहा पातु पदद्वयं। सप्तदशाक्षरी पायादन्न
पूर्णाखिलं वपुः। तारं माया रमा कामः षोडशार्णा
ततः परं। शिरस्था सर्व्वदा पातु विंशद्वर्णात्मिका परा।
तारं दुर्गे युगं रक्षिणि स्वाहेति दशाक्षरी। जयदुर्गा घन
श्यामा पातु मां पूर्व्वतो मुदा। मायाबीजादिका चैषा
दशार्णा च तथा परा। उत्तप्तकांचनाभासा जयदुर्गा
नलेऽवतु। तारं ह्रीं दुं दुर्गायै नमोऽष्टार्णात्मिका प
रा। शंखचक्रधनुर्व्वाणधरा मां दक्षिणेऽवतु। महिष
मर्द्दिनि स्वाहा वसुवर्णात्मिका परा। नैर्ऋत्यां स
र्व्वदा पातु महिषासुरनाशिनी। माया पद्मावती स्वा
हा सप्तार्णात्मा परात्मिका। पद्मावती पद्मसंस्था प
श्चिमे मां सदाऽवतु। पाशांकुशधरा पुटा मायैहि
परमेश्वरि। स्वाहा त्रयोदशार्णा ताराद्याश्वारूढा
निलेऽवतु। सरस्वती पंचशरो नित्यक्लिन्ने मदद्रवे
स्वाहा रव्यक्षरी विद्या मामुत्तरे सदाऽवतु। तारं मा
या तु कवचं खे च देव ततो वधूः। हुं क्षें ह्रीं फट्
स्वाहा द्वादशार्णाखिलप्रदा। त्वरिताष्टाहिभिः पाया
च्छिवकोणे सदा च मां। ऐं क्लीं सौः सा ततो वाला
मामूर्द्ध्वदेशतोऽवतु। विन्दवन्ता भैरवी वाला भूमौ

च मां सदाऽवतु। इति ते कथितं पुण्यं त्रैलोक्यमंगलं
परं। सारात् सारतरं पुण्यं महाविद्यौघविग्रहं। अस्या
पि पठनात् सद्यः कुवेरोऽपि धनाधिपः। इन्द्राद्याः सक
ला देवा धारणात् पठनाद् यतः। सर्व्वसिद्धीश्वराः स
न्तः सर्व्वैश्वर्य्यमवाप्नुयुः। पुष्पांजल्यष्टकं दत्त्वा मूले
नैव सकृत् पठेत्। सम्वत्सरकृतायास्तु पूजायाः फ
लमाप्नुयात्। प्रीतिमन्योन्यतः कृत्वा कमला निश्चला
गृहे। वाणी च निवसेद्वक्त्रे सत्यं सत्यं न संशयः।
योधारयति पुण्यात्मा त्रैलोक्यमंगलाभिधं। कवचं
परमं पुण्यं सोऽपि पुण्यवतां वरः। सर्व्वैश्वर्य्ययुतो
भूत्वा त्रैलोक्यविजयी भवेत्। पुरुषो दक्षिणे वाहौ ना
री वामभुजे तथा। वहुपुत्रवती भूत्वा वन्ध्यापि लभते
सुतं। ब्रह्मास्त्रादीनि शास्त्राणि नैव कृन्तन्ति तं जनं।
एतत् कवचमज्ञात्वा योजपेद्भुवनेश्वरीं। दारिद्र्यं परमं
प्राप्य सोऽचिरान्मृत्युमाप्नुयात्। इति रुद्रयामले देवी
श्वरसम्वादे त्रैलोक्यमंगलं नाम भुवनेश्वरीकवचं
समाप्तं॥

अथ अन्नपूर्णास्तोत्रं। नमः कल्याणदे देवि नमः
शंकरवल्लभे। नमो भक्तप्रिये देवि अन्नपूर्णे नमोऽ
स्तु ते। नमो मायागृहीतांगि नमः शंकरवल्लभे। माहे
श्वरि नमस्तुभ्यमन्नपूर्णे नमोऽस्तु ते। महामायेशिव
धर्म्मपत्नीरूपे हरप्रिये। वांछादात्रि सुरेशानि अन्नपू
र्णे नमोऽस्तु ते। उद्यद्भानुसहस्राभे नयनत्रयभूषिते
चन्द्रचूड़े महादेवि अन्नपूर्णे नमोऽस्तु ते। विचित्रवसने
देवि अन्नदानरतेऽनघे। शिवनृत्यकृतामोदे अन्नपूर्णे

नमोऽस्तु ते। साधकाभीष्टदे देवि भवदुःख विनाशिनि।
कुचभारनते देवि, अन्नपूर्णे नमोऽस्तु ते। षट्कोणप
द्ममध्यस्थे षडंग युवतीमये। ब्रह्माण्यादिस्वरूपे च
अन्नपूर्णे नमोऽस्तु ते। देवि चन्द्रकृतापीड़े सर्व्वसाम्राज्य
दायिनि। सर्व्वानन्दकरे देवि, अन्नपूर्णे नमोऽस्तु ते। इन्द्रा
द्यंर्चित पादाब्जे रुद्रादिरूपधारिणि। सर्व्वसम्पत्प्रदे दे
वि, अन्नपूर्णे नमोऽस्तु ते। पूजाकाले पठेद् यस्तु स्तोत्र
मेतत् समाहितः। तस्य गेहे स्थिरा लक्ष्मीर्ज्जायते नात्र
संशयः। प्रातःकाले पठेद् यस्तु मंत्रजाप पुरःसरं। त
स्य चान्नसमृद्धिः स्याद्वर्द्धमानो दिने दिने। यस्मै कस्मै
न दातव्यं न प्रकाश्यं कदाचन। प्रकाशात् कार्य्यहानिः
स्यात्तस्माद् यत्नेन गोपयेत्। इत्यन्नपूर्णास्तोत्रं समाप्तं॥-

अथ, अन्नपूर्णाकवचं। कथितास्त्वन्नपूर्णाया
या या विद्याः सुदुर्लभाः। कृपया कथिताः सर्व्वाः श्रु
तास्त्वाधिता मया। साम्प्रतं श्रोतुमिच्छामि कवचं यत्
पुरोदितं। त्रैलोक्यमंगलं नाम कवचं मंत्रविग्रहं। ईश्वर
उवाच। शृणु पार्व्वति वक्ष्यामि सावधानावधारय। त्रैलोक्य
मंगलं नाम कवचं ब्रह्मनामकं। ब्रह्मविद्यास्वरूपं च
महदैश्वर्य्यदायकं। पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्य्य
वान् भवेत्। त्रैलोक्य-रक्षणस्यास्य कवचस्य ऋषिः शि
वः। छन्दो विराडन्नपूर्णा देवता सर्व्वसिद्धिदा। धर्म्मार्थ
काममोक्षेषु विनियोगः प्रकीर्त्तितः। ह्रीँ नमो भगवत्यंते
माहेश्वरि पदं ततः। अन्नपूर्णे ततः स्वाहा चैषा सप्तद
शाक्षरी। पात्वन्नपूर्णा सर्व्वांगं रत्नकुम्भान्नपात्रदा। श्रीवी
जाद्या सदा चैषा द्विरन्ध्रार्णा यथा सुखं। प्रणवाद्या

भ्रुवौ पातु कंठं वाग्बीजपूर्व्विका। कामबीजादिका चैषा हृद
यं तु महेश्वरी। तारं श्रीँ ह्रीँ नमोऽन्ते च भगवतीपदं ततः
माहेश्वरि पदं चान्नपूर्णे स्वाहेति पातु मां। नाभिमेकोन
विंशार्णा पायान्माहेश्वरी सदा। तारं माया रमा कामः
षोडशार्णास्ततः परं। शिरःस्था सर्व्वदा पातु विंशत्यर्णा
त्मिका च या। करौ पादौ सदा पातु रमा कामो भुवस्तथा
ध्वजं च सर्व्वदा पातु विंशत्यर्णात्मिका च या। अन्नपूर्णा
महाविद्या ह्रीँ पातु भुवनेश्वरी। शिवः श्रीँ ह्रीँ तथा क्लीं
च त्रिपुटा पातु मे गुदं। षड्दीर्घभाजा वीजेन षड़ंगा
नि पुनं तु मां। इन्द्रो मां पातु पूर्व्वे च वह्निकोणेऽन
लोऽवतु। यमो मां दक्षिणे पातु नैर्ऋत्यां निर्ऋति
स्तथा। पश्चिमे वरुणः पातु वायव्यां पवनोऽवतु।
कुवेरश्चोत्तरे पातु मामैशान्यां शिवोऽवतु। ऊर्द्ध्वाधः
सततं पातु ब्रह्मानंतो यथाक्रमात्। वज्राद्यास्त्वायु
धाः पांतु दशदिक्षु यथाक्रमात्। इति ते कथितं पुण्यं
त्रैलोक्यरक्षणं परं। यद्धृत्वा पठनाद्देवा सर्व्वैश्वर्य्य
मवाप्नुयुः। ब्रह्मा विष्णुश्च रुद्रश्च धारणात् पठनाद्
यतः। सृजत्यवति हंत्येव कल्पे कल्पे पृथक् पृथक्।
पुष्पांजल्यष्टकं देव्यै मूलेनैव पठेत्ततः। युगायुत
कृतायास्तु पूजायाः फलमाप्नुयात्। प्रीतिमन्योऽ
न्यतः कृत्वा कमला निश्चला गृहे। वाणी वक्त्रे वसेत्त
स्य सत्यं सत्यं न संशयः। अष्टोत्तरशतं चास्य पुर
श्चर्य्याविधिः स्मृतः। भूर्ज्जे विलिख्य गुलिकां स्वर्ण
स्थां धारयेद् यदि। कंठे वा दक्षिणे बाहौ सोऽपि सर्व्व
तपोमयः। ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रं प्राप्य पा
र्व्वति। माल्यानि कुसुमान्येव भवंत्येव न संशयः। इति

भैरवतंत्रे भैरवभैरवी सम्वादे, अन्नपूर्णाकवचं समाप्तं ॥—
,अथ त्रिपुरास्तोत्रं। वराभीति हस्तं द्विवाहुं प्रसन्नं
शिवं सुप्रसन्नं स्वशक्त्योपविष्टं। प्रसन्नास्य विम्वं प्रकाश
स्वरूपं शिरःपद्ममध्ये गुरुं भावयामि। वक्रं वह्निसंस्थं
त्रिमूर्त्यो प्रजुष्टं शशांकेन युक्तं तवाद्यं स्ववीजं। सुवर्ण
प्रभं ये जपंति त्रिशक्तेः श्रियं सौभगत्वं लभंते नरा
स्ते। नभोवायुमिश्रं ततो वामनेत्रं सुधाधाम विम्वं नि
योज्यैकवक्रं। द्वितीयं स्ववीजं सुरश्रेणीवन्द्यं त्वदीयं
विभाव्य श्रियं प्राप्नुवंति। विरिंचिं क्षितिस्थं ततो वा
मनेत्रं विधुं नादयुक्तं दिनेशाभवीजं। विभाव्यैव
संमोहयंति त्रिलोकीं जपादीश्वरत्वं लभंते नरेन्द्राः
त्रयं संप्रयोज्य स्मरारिप्रिये ये त्रिसन्ध्यं जपंति त्वदं
नं विभाव्य। न तेषां रिपुर्वाकि प्रयोगं करोति स्मरास्ते
ङ्गनानां गृहे श्रीस्तु तेषां। मुखे भारती गद्यपद्य
प्रवन्धा न हिंसंति हिंस्राः सुरास्ता न्नमंति। तदंघ्रिद्व
यं भूषणं मूर्ध्नि राज्ञां करे सिद्धयो दुग्रहास्तांस्त्य
जंति। वने पारिजातप्रमाणं पृथिव्यां सुवर्णप्रभा
यां मणिक्युहगेहे। स्मरेद्वेदिकायां लसद्रत्नसिंहासने
पद्ममष्टाकरं संविचिन्त्य। स्फुरत् कर्णिकायां परं यो
नि युग्मं तदंतर्गता मुषण हेमप्रभां यां। लसत् कुण्ड
लामिन्दुवक्त्रां त्रिनेत्रां स्फुरत् कम्बुकंठां सुवक्षोजन
म्रां। महारत्नवज्रोल्लसद्वाहुवृन्दैः सुपद्मद्वयं पाशकं
कार्म्मुकंच। सुवर्णांकुशं पुष्पवाणान् दधानां वृहद्र
त्नभूषां सुमध्यां सुकांचीं। तुलाकोटिरम्यस्फुरत्
पादपद्मां किरीटाद्यलंकारयुक्तां प्रसन्नां। सिते चा
मरे दर्पणं तत् करण्डं समुद्गं सुकर्पूरपूर्णं दधानाभिः

त्रिलोकीविधात्री जगन्नाशहन्त्री जगत्क्षोभकर्त्री जगल्लो
कपुत्री। सदानन्दपूर्णं हकारार्द्धवर्णं त्रिविन्दुस्वरूपां
त्रिशक्तिं भजामि। चिरं चिंतयित्वा त्वदेतत् स्वरूपं पुरो
यंत्रमध्ये समावाह्य भक्त्या। स्वयम्भुप्रसूनादिभिः पूज
यित्वा चतुर्वर्गसिद्धिं लभेत् पामरोऽपि। श्रियं श्रीपतिं
पार्वतीमीश्वरंच रतिं कामदेवं षडंगेन सार्द्धं। स्वयो
नौ तथा मंत्रमुक्त्वा भवानीं क्रमात् पूजयित्वा नरेन्द्रो
भवेत् सः। निधी द्वौ च पार्श्वद्वये संविभाव्य प्रपूज्या
महिष्यंस्ततो लोकपालाः। तदस्त्राणि तत्तद्दलाग्रे प्रपू
ज्य भवस्याष्टसिद्धिं लभेत् पामरोऽपि। क्षितिस्त्वं
विधाता जगत्सृष्टिकर्त्री त्वमापोपि विष्णुर्जगत्
पालिका च। त्वमग्निस्तु रुद्रो जगत्क्षोभकर्त्री त्वमैश्व
र्यरूपा जगद्वायुरूपा। त्वमाद्या शिवे शम्भुकांते शर
ण्ये जगद्व्याल रन्ध्रे सदारं भ्रमीषि। निराधारगम्याभ
वस्यैकपूर्ण्या त्वमाकाशकल्पा भवानि प्रसीद। भवा
म्बोधिमध्ये निपात्यैव सर्व्वं मुनीनांनु गर्व्वं सुखर्व्वं
करोषि। ,अतस्त्वां न जाने चिदानन्दरूपे प्रकाशस्वरूपे
भवानि प्रसीद। त्वमाधारशक्तिस्त्वमाधाररूपा जग
द्व्यापिका त्वं जगद्व्याप्यरूपा। ,अभावस्त्वमेका गुण
तीतरूपा त्वमेवासि भावो भवानि प्रसीद। ,अरुस्त्वं वि
भुस्त्वं त्वमेवासि विश्वं स्तुतिः का भवत्या जगत्यां
विभासि। तथापि त्वदीया गुणानां दिशंति स्तुतिं क
र्तुमेवं भवानि प्रसीद। इदं स्तोत्रमत्यंत गुह्यं नरा
ये पठंति त्रिसन्ध्यं कुलांते जपित्वा। न तेषामसाध्यं
त्रिलोकीजनानां लभंते स्वरूपं भवानि प्रसीद। इति
त्रिपुरास्तोत्रं समाप्तं ॥—

अथ त्रिपुरा कवचं। श्रीदेव्युवाच। भगवन् सर्व्वधर्म्मज्ञ सर्व्व
शास्त्रार्थपारग। त्रिशक्तिरूप लक्ष्म्याश्च कवचं यत् प्रका
शितं। सर्व्वार्थसाधनं नाम कथयस्व मयि प्रभो। ईश्वर
उवाच। शृणु देवि प्रवक्ष्यामि कवचं परमाद्भुतं। सर्व्वार्थसा
धनं नाम त्रैलोक्ये चातिदुर्लभं। सर्व्वसिद्धिमयं देवि
सर्व्वैश्वर्य्यप्रदायकं। पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्य्य
भाग्भवेत्। सर्व्वार्थसाधनस्यास्य कवचस्य ऋषिः
शिवः। छन्दो विराट् त्रिशक्तिः श्रीजगद्धात्री च देवता।
धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः। श्रीं वीजं
मे शिरः पातु लक्ष्मीरूपा ललाटकं। ह्रीं पातु दक्षनेत्रं
मे वामनेत्रं सुरेश्वरी। क्लीं पातु दक्षपार्श्वं मे वामं का
मेश्वरी तथा। लक्ष्मीर्घ्राणं सदा पातु वदनं पातु केश
वः। गौरी तु रसनां पातु कंठं पातु महेश्वरः। स्कन्ध
देशं रतिः पातु भुजौ तु मकरध्वजः। शंखनिधिः क
रौ पातु वक्षः पद्मनिधिस्तथा। ब्राह्मी कुक्षिं सदा पा
तु नाभिं पातु महेश्वरी। कौमारी पृष्ठदेशं मे गुह्यं
रक्षतु वैष्णवी। वाराही सक्थिनी पातु ऐन्द्री पातु पद
द्वयं। भार्य्यां रक्षतु चामुण्डा लक्ष्मी रक्षतु पुत्रकान्।
इन्द्रः पूर्व्वे सदा पातु आग्नेय्यामग्निदेवता। याम्ये यमः
सदा पातु नैरृत्यां निरृतिस्तथा। पश्चिमे वरुणः
पातु वायव्यां वायुदेवता। सौम्ये सोमः सदा पातु ऐ
शान्यामीश्वरोऽवतु। ऊर्द्ध्वं प्रजापतिः पातु अधश्चा
नंतदेवता। राजद्वारे श्मशाने च अरण्ये प्रांतरे तथा
जले स्थले चांतरीक्षे शत्रूणां निवहे तथा। एताभिः
सहिता देवि त्रिवीजात्मा महेश्वरी। त्रिशक्तिश्च महा
लक्ष्मीः सर्व्वत्र मां सदावतु। इति ते कथितं देवि सारात्

सारतरं परं। सर्व्वार्थसाधनं नाम कवचं परमाद्भुतं। तस्या
नुपठनात् सद्यः कुवेरोपि धनेश्वरः। इन्द्राद्याः सफला देवा
धारणात् पठनाद् यतः। सर्व्वसिद्धीश्वराः संति सर्व्वैश्वर्य्य
मवाप्नुयुः। पुष्पांजल्यष्टकं दद्यान्मूलेनैव पठेत् सकृत्।
सम्वत्सरकृतायास्तु पूजायाः फलमाप्नुयात्। प्रीतिम
न्योन्यतः कृत्वा कमला निश्चला गृहे। वाणी च निवसे
द्वक्त्रे सत्यं सत्यं न संशयः। यो धारयति पुण्यात्मा स
र्व्वार्थसाधनाभिधं। कवचं परमं पुण्यं सोपि पुण्यवतां
वरः। सर्व्वैश्वर्य्ययुतो भूत्वा त्रैलोक्यविजयी भवेत्। पुरु
षो दक्षिणे वाहौ नारी वामभुजे तथा। वहुपुत्रवती
भूत्वा वन्ध्यापि लभते सुतं। ब्रह्मास्त्रादीनि शस्त्रा
णि नैव कृंतंति तत्तनुं। एतत् कवचमज्ञात्वा यो जपे
त् परमेश्वरीं। दारिद्र्यं परमं प्राप्य सोऽचिरान्मृत्यु
माप्नुयात्। इति रुद्रयामले त्रिशक्त्याः सर्व्वार्थसाधनं
नाम कवचं समाप्तं॥-
अथ दुर्गायाः शतनाम स्तोत्रं। ईश्वर उवाच। शतनाम
प्रवक्ष्यामि शृणुष्व कमलानने। यस्य प्रसादमात्रेण
दुर्गा प्रीता भवेत् सती। ॐ सती साध्वी भवप्रीता
भवानी भवमोचनी। आर्य्या दुर्गा जया आद्या त्रिनेत्रा
शूलधारिणी। पिणाकधारिणी चित्रा चण्डघण्टा महा
तपा। मनोबुद्धिरहंकारा चित्तरूपा चिता चितिः। स
र्व्वमंत्रमयी सत्या सत्यानन्दस्वरूपिणी। अनंता भावि
नी भाव्या भव्या भव्यसदातिः। शाम्भवी देवमाता च
चिन्ता रत्नप्रिया सदा। सर्व्वविद्या दक्षकन्या दक्षयज्ञ
विनाशिनी। अपर्णानेकपर्णा च पाटला पाटलावती।
पट्टाम्बरपरीधाना कलमंजीररंजिनी। अमेयविक्रमा

श्रूरा सुन्दरी पुरसुन्दरी। वनदुर्गा च मातंगी मतंगमुनिपूजिता। ब्राह्मी माहेश्वरी चैन्द्री कौमारी वैष्णवी तथा वामुण्डा चैव वाराही लक्ष्मीश्च पुरुषाकृतिः। विमलोत्कर्षिणी ज्ञाना क्रिया सत्या च वुद्धिदा वहुला वहुलप्रेमा सर्व्ववाहन वाहना। निशुम्भ शुम्भहननी महिषासुरमर्द्दिनी। मधुकैटभ हन्त्री च चण्डमुण्डविनाशिनी। सर्व्वासुरविनाशा च सर्व्वदानवघातिनी। सर्व्वशास्त्रमयी सत्या सर्व्वास्त्रधारिणी तथा। अनेकशस्त्रहस्ता च अनेकास्त्रस्य धारिणी। कुमारी चैव कन्या च कैशोरी युवती यती। अप्रौढ़ा चैव प्रौढ़ा च वृद्धमाता वलप्रदा। य इदं प्रपठेन्नित्यं दुर्गानामशताष्टकं। नासाध्यं विद्यते देवि त्रिषु लोकेषु पार्व्वति। धनं धान्यं सुतं जायां हयं हस्तिनमेव च। चतुर्व्वर्गं तथा चान्ते लभेन्मुक्तिंच शाश्वतीं। कुमारीं पूजयित्वा तु ध्यात्वा देवीं सुरेश्वरीं पूजयेत् परया भक्त्या पठन्नामशताष्टकं। तस्य सिद्धिर्भवेद्देवि सर्व्वैः सुरवरैरपि। राजानो दासतां यान्ति राज्यं श्रियमवाप्नुयात्। गोरोचना लक्तक कुंकुमेन सिन्दूरकर्पूर मधुत्रयेण। विलिख्य मंत्रं विधिना विधिज्ञो भवेत् सदा धारयते पुरारिः। भौमावास्या निशाभागे चन्द्रे शतभिषां गते। विलिख्य प्रपठेत् स्तोत्रं स भवेत् सम्पदां पदः। इति विश्वसारतंत्रे दुर्गाशतनामस्तोत्रं समाप्तं॥—

अथ दुर्गाकवचं। ईश्वर उवाच। शृणु देवि प्रवक्ष्यामि कवचं सर्व्वसिद्धिदं। पठित्वा धारयित्वा च नरो मुच्येत संकटात्। अज्ञात्वा कवचं देवि दुर्गामंत्रंच यो जपेत् सनाप्नोति फलं तस्य परे च नरकं व्रजेत्। इदं गुह्य

तमं देवि कवचं तव कथ्यते। गोपनीयं प्रयत्नेन सावधानावधारय। उमा देवी शिरः पातु ललाटं शूलधारिणी। चक्षुषी खेचरी पातु कर्णौ च द्वारवासिनी। सुगन्धा नासिकां पातु वदनं सर्व्वसाधिनी। जिह्वांच चण्डिका पातु ग्रीवां सौभद्रिका तथा। अशोकवासिनी चेतो द्वौ वाहू वज्रधारिणी कंठं पातु महावाणी जगन्माता स्तनद्वयं। हृदयं ललिता देवी उदरं सिंहवाहिनी। कटीं भगवती देवी द्वावूरू विन्ध्यवासिनी। महावलाच जंघे द्वे पादौ भूतलवासिनी एवं स्थितासि देवि त्वं त्रैलोक्य रक्षणात्मिके। रक्ष मां सर्व्वगात्रेषु दुर्गे देवि नमोऽस्तु ते। इत्येतत् कवचं देवि महाविद्याफलप्रदं। यः पठेत् प्रातरुत्थाय सर्व्वतीर्थफलं लभेत्। यो न्यसेत् कवचं देहे तस्य विघ्नं न कुत्रचित्। भूतप्रेतपिशाचेभ्यो भयं तस्य न विद्यते। रणे राजकुले वापि सर्व्वत्र विजयी भवेत्। सर्व्वत्र पूजामाप्नोति देवीपुत्र इव क्षितौ। इति कुब्जिकातंत्रे दुर्गाकवचं समाप्तं॥—

अथ महिषमर्द्दिनीस्तोत्रं। भैरव उवाच। मच्चित्ते चर चण्डि चूर्णित दुराचार प्रचण्डासुरे स्वैरं दारय भूरि दुर्द्धरदरप्रोद्दाममर्म्मापदः। तेनाहं निरुपप्लुतो निरुपम श्रीपादपद्माटवी प्राप्तानन्दरसार्णवे मम मनो हंस स्थिरं नन्दतु।१। हित्वा चण्डि हिरण्यदारुण पटुप्रोद्यामहस्तांगुलिस्फायत्क्रमसुमेरु सोदरशयाटोपं नृसिंहं सुराः। मानस्त्वत् पशुपाशपेषण पटु श्रीपाद-संसेविनं सेवन्ते करिवैरिणं किमरिभिर्भीतिर्भवत्सेविनः।२। चण्डि त्वद्विषयान्तरान्तरपदं श्रोत्रान्तरं वेदगं तत्तत् पुरुषप्रकृत्यनुगतं व्रह्मादिभिर्गीयते तस्माद्देवि समस्तदैवतसुधासारैकधामस्फुरत् - श्रीमत् पादपयोजचुम्बन

परं मामप्य सम्भावय।३। मन्निन्दा यदि वास्तु ते कुलपथा
चाराध्वरं मास्तु वा कीर्त्तिः केशव कौशिकार्च्चन-चरी नै
वास्तु मत सन्निधिः। मातर्ब्रह्म हरिस्मरारि-हुतभुग्दैत्या
रिसेवास्पदं।श्रीमत् पाद पयोज चिन्तन विधौ चित्तं सदैवा
स्तु नः।४। निर्द्दिष्टोऽसि यदि त्वदीय पद युक् पूर्व्वापरीभा
वने निर्द्दिष्टस्य तदा ममापि विरलं किम्वास्तु सिध्या
स्पदं। तस्माद्देवि कृपाभवांचिततरं श्रीपाद पद्मद्वयं मात्रे
त्रे ऽदान सम्पदं प्रसरतु क्षेमंकारि क्षम्यतां।५। स्वात्मानं परि
रभ्य भूतपतिरप्युन्माद मासादितः स्फारं जीवनरक्षणे
स च कृती नैवाभविष्यत् प्रभुः। दैवाद्बिच्युत चन्द्र चन्दन
रस- प्राग्लभ्य गर्भश्रवन्माध्वी पूर्ण्ण भवत्- पदैक कमला
मोदेन नास्वादितः।६। हाहा मातरनादि-मोह जलधिव्या
हार- सिध्याखिल ब्रह्मानन्द सराभिषेक- विरस- स्वांतोद्धे
-मादृशि। युष्माकं सुरवृन्द निर्भर मनस्तापाभिभूति
क्षमः श्रीमद्भक्तिरसातिदुर्द्दिन परीवाहः सदा सर्पतु।७।
त्वत् पाद स्फुरदंशुजाल जठराच्चण्डांशु कोटिस्खलध्वांतस्वां
तविसारि निर्म्मल चिदानन्दत्रयं दैवतं। सर्गं संसृजति स्थि
तिं वितनुते सृष्टिं पुनर्लुम्पति प्रोद्भिन्नांजन-नीलनीरद
महं चित्ते सदैवास्तु नः।८। या शश्वन्महिषच्छलस्फुट
मिलद् गर्ज्जद्विधारत् -स्खलद्वक्रां त प्रसरन्नमस्तमशिरोदै
त्यः समालम्बते। सा दुर्गा भयदुर्गदुर्गतिहरा लम्भांत
रत्रासिनी प्रध्यद्दैवत वैरिदारण पटुर्जीयाज्जया ह्लादिनी
।९। नृत्यत् खेटक चामरांचलचलच्चक्राप्य खर्व्वा वरस्फाय
त्,शैलशिलीमुखोच्छलदनल्पाजिह्मताम्रायुधौ। ऊर्ज्जा
वातविसर्पिनर्त्तितशरः साटोपदुष्टासुरक्रन्दत् खण्ड
विखण्डिताखिल शकुंत क्षुत् पिपासोज्ज्वले।१०। चंचतक
म्रविभ्रम कालकलतीवास्फालसम्पादकोन्मीलन्महिष

तिर्य्यगानतशिरः शृंगांतराले स्थले। वस्त्रैर्व्वसुपत्रम
ध्य कलितैर्व्बध्वा श्रुतीर्म्मातृभिः सेव्ये चारुररंगगने
ररम्मुदा घूर्ण्णयमानां स्मरेत्।११। अध्याधिः क्रमसव्य
वामकरयोश्चक्रं दरं कर्त्तृकां खेटं वाणधनुस्त्रिशूलमभय
हन्मुद्रां दधानां शिवां। श्यामां नीलघनोच्चकुंतलचयप्रो
न्नध्धजूटां स्खलद्धीरास्फाललसत् करालवदनां घोराट्ट
हासोद्भटां।१२। एवं ये तव देवि मूर्त्तिमनघां ध्यायंति
दुर्गादिभिः शक्राद्यै रभिपूजितां परपुर क्षोभादिकं कु
र्व्वते। राज्यं शत्रुजयः सदर्थधिषणं काव्यामृतादर्शि
न स्तम्भोच्चाटन मारणादिकृतिनां तेषां स्वयं जायते।
१३। स्तोत्रं ते चरणारविन्द युगलध्याना वधानान्मया
मंत्रोध्धार कुलोपचार चरितं गूढोपदिष्टं यदि। ये शृण्वंति
पठंति देवि तरसा श्रीमोक्षकामादयस्तेषां हस्तगताभवं
ति जगतां मातर्नमस्ते जयः।१४। इति महिषमर्द्दिनीस्तोत्रं
समाप्तं॥

अथ महिषमर्द्दिनीकवचं। ईश्वर उवाच। अथ वक्ष्ये महेशा
नि कवचं सर्व्वकामदं। यस्य प्रसादमासाद्य भवेत् साक्षात्
सदाशिवः। ॐकारं पूर्व्वमुच्चार्य्य मंत्री मंत्रस्य सिध्धये।
प्रपठेत् कवचं नित्यं मंत्रवर्ण्णस्य सिध्धये। महिषमर्द्दिन्याः
कवचस्य भगवान्महाकाल-ऋषिरनुष्टुप् छन्दः आद्या
शक्तिर्द्देवता चतुर्व्वर्ग फलप्राप्तये विनियोगः। ह्लींपातु
मस्तके देवि कामिनी कामदायिनी। मकारः पातु मांदेवी
चक्षुर्युग्मे महेश्वरी। हिकारः पातु वदनं हिंगुलासुरना
यिका। षकारः पातु मां श्वेता जिह्वायां चापराजिता। म
कारः पातु मां देवि मर्द्दिनी सुरनायिका। द्दिकारः पातु
मां देवि सावित्री कालनाशिनी। नीकारः पातु मां नित्या हृ
दये बाहु पार्श्वयोः। नाभौ लिंगे गुदे कंठे कर्ण्णयोः पार्श्वयो

स्तथा। शिखायां कवचे पादे मुखे जंघा युगे तथा। सर्व्वांगे
पातु मां स्वाहा सर्व्व शक्ति समन्विता। कामाख्या पातु मां
स्वाहा सर्व्वांगे मर्द्दिनी शिरः। दशाक्षरी महाविद्या सर्व्वांगे
पातु मर्द्दिनी। मर्द्दिनी पातु सततं मर्द्दिनी रक्षयेत् सदा
राजस्थाने तथा दुर्गे सिंहव्याघ्रभयादिषु। श्मशाने प्रांत
रे दुर्गे नौकायां वह्निमध्यतः। मर्द्दिनी पातु सततं मर्द्दि
नी रक्षयेत् सदा। दुर्गा पातु सदा देवी आद्या पातु सदा मम
प्रभा पातु महेशानि कनका सर्व्वदावतु। कृत्तिका पातु स
ततं अभया सर्व्वदावतु। प्रभा पातु महामाया माया पातु
सदा मम। प्रभा पातु महेशानि विमला पातु सर्व्वदा। नन्दिनी
पातु सततं सुप्रभा सर्व्वदावतु। विजया पातु सर्व्वत्र
देवांगे नवशक्तयः। शक्तयः पांतु सततं मुद्राः पांतु सदा
मम। जया पातु सदा सूक्ष्मा विशुद्धा पातु सर्व्वदा। योगि
न्यः पांतु सततं खेचर्य्यः पांतु सर्व्वदा। डाकिन्यः पांतु
सततं सिद्धाः पांतु सदा मम। सर्व्वत्र सर्व्वदा पातु देवी
महिषमर्द्दिनी। इति ते कथितं दिव्यं कवचं सर्व्वकामदं
यत्र तत्र न वक्तव्यं गोपितव्यं प्रयत्नतः। गोपितं सर्व्व
तंत्रेषु विश्वसारे प्रकीर्त्तितं। सर्व्वत्र सुलभा विद्या कवचं
दुर्लभं महत्। शठाय भक्तिहीनाय निन्दकाय महेश्वरि
न्यूनांगे अतिरिक्तांगे क्रूरे मिथ्याभिभाषिणे। न स्तवं
दर्शयेद्दिव्यं कवचं सुरदुर्लभं। यत्र तत्र न वक्तव्यं शं
करेण च भाषितं। दत्त्वा तेभ्यो महेशानि नश्यंति सिद्धि
यः क्रमात्। मंत्राः परांमुखं यांति शापं दत्त्वा सुदारुणं
अशुभंच भवेत्तस्य तस्माद् यत्नेन गोपयेत्। गोरोचना
कुंकुमेन भूर्जपत्रे महेश्वरि। लिखित्वा शुभयोगेच ब्रह्मै
न्द्रौ वै धृतौ तथा। आयुष्मत् सिद्धि योगे वा बवे वा कौ
लिके तथा। वणिजे श्रवणायांच रेवत्यां वा पुनर्व्वसौ।

उत्तरात्रय योगे हि तथा पूर्व्वात्रयेषु च। अश्विन्यां वा रोहिण्यां
वा तृतीयानवमीतिथौ। अष्टम्यां वा चतुर्द्दश्यां षष्ठ्यां
वा पंचमीतिथौ। कुह्वां वा पूर्णिमायां वा निशायां प्रांतरे
तथा। एक लिंगे श्मशाने च शून्यागारे शिवालये। गुरुणा
वैष्णवैर्व्वापि स्वयम्भू कुसुमैस्तथा। शुक्लैर्व्वा रक्त कुसुमैश्च
न्दनै रक्तसंयुतैः। शवांगारैश्चिता वस्त्रे लिखित्वा धारयेत्
पुनः। तस्य सर्व्वार्थसिद्धिः स्यात् शंकरेण च भाषितं।
कुमारीं पूजयित्वा तु देवी सूक्तं निवेद्य च। पठित्वा भोज
येद्विप्रान् धनवान् वेदपारगान्। आखेटक मुपाख्यानं कु
मार्य्यैव दिनत्रयं। तदा धरेन्महारक्षां कवचं सर्व्वकाम
दं। नाधयो व्याधयस्तस्य दुःखशोकभयं क्वचित्। वादी मूको
भवेत् दृष्ट्वा राजा च सेवकायते। मासमेकं पठेद् यस्तु
प्रत्यहं प्रजपेत् सदा। षण्मासैर्व्वा त्रिभिर्मासैः खेचरो
भवति ध्रुवं। अपुत्रो लभते पुत्रमधनो धनवान् भवेत्
अरोगी बलवांश्चैव राजा च दासतामियात्। रजस्वलाभगे
नित्यं जपेद्विद्यां विशेषतः। य एवं कुरुते धीमान् स एव
श्रीसदा×शिवः। इति विश्वसारतंत्रे महिषमर्द्दिनीकवचं समाप्तं

अथ लक्ष्मीस्तोत्रं। ईश्वर उवाच। त्रैलोक्यपूजिते
देवि कमले विष्णुवल्लभे। यथा त्वं सुस्थिरा कृष्णे तथा
री भव मयि स्थिरा। ईश्वरी कमला लक्ष्मीश्चला भूतिर्हरि
प्रिया। पद्मा पद्मालया सम्पदुच्चैः श्रीपद्मधारिणी। द्वाद
शैतानि नामानि लक्ष्मीं संपूज्य यः पठेत्। स्थिरा लक्ष्मी
र्भवेत्तस्य पुत्रदारादिभिः सह। इति लक्ष्मीस्तोत्रं समाप्तं।

अथ लक्ष्मीकवचं। ईश्वर उवाच। अथ वक्ष्ये
महेशानि कवचं सर्व्वकामदं। यस्य विज्ञानमात्रेण भवेत्
साक्षात् सदाशिवः। नार्च्चनं तस्य देवेशि मंत्रमात्रं जपेन्नरः।

सभवेत पार्व्वतीपुत्रः सर्व्वशास्त्र पुरस्कृतः। विद्यार्थिना सदा सेव्या विशेषे विष्णुवल्लभा। अस्याश्चनु रवरीविष्णु वनितायाः कवचस्य श्रीभगवान शिव ऋषिरनुष्टुप्‌छन्दो वाग्‌भवी देवता वाग्‌भवं बीजं लज्जाशक्ती रमा कीलकं कामबीजात्मकं कवचं मम सुपाण्डित्य-कवित्व-सर्व्वसिद्धि समृद्धये विनियोगः। ऐँकारो मस्तके पातु वाग्‌भवी सर्व्वसिद्धिदा। ह्रीँ पातु चक्षुषोर्मध्ये चक्षुर्युग्मे च शांकरी। जिह्वायां मुखवृत्ते च कर्ण्णयोर्गण्डयोर्निशि। ओष्ठाधरे दंतपङ्क्तौ तालुमूले स्तनौ पुनः। पातु मां विष्णुवनिता लक्ष्मीः श्रीवर्ण्णरूपिण्णी। कर्ण्णयुग्मे भुजद्वन्द्वे स्तनद्वन्द्वे च पार्व्वती। हृदये मणिवन्धे च ग्रीवायां पार्श्वयोः पुनः। सर्व्वांगे पातु कामेशी महादेवी समुन्नतिः। व्युष्टिः पातु महामाया उत्कृष्टिः सर्व्वदावतु। सन्धिं पातु सदा देवी सर्व्वत्र शम्भुवल्लभा। वाग्‌भवी सर्व्वदा पातु पातु मां लक्ष्मीर्विष्णुमाया सुरेश्वरी। विजया पातु भवने जया पातु सदा मम। शिवदूती सदा पातु सुन्दरी पातु सर्व्वदा भैरवी पातु सर्व्वत्र भेरुण्डा सर्व्वदावतु। त्वरिता पातु मां नित्यं उग्रतारा सदावतु। पातु मां कालिका नित्यं कालरात्रिः सदावतु। वनदुर्गा सदा पातु कामाख्या सर्व्वदावतु। योगिन्यः सर्व्वदा पांतु मुद्राः पांतु सदा मम। मात्राः पांतु सदा देव्यश्चक्रस्था योगिनीगणाः। सर्व्वत्र सर्व्वकार्य्येषु सर्व्वकर्म्मसु सर्व्वदा। पातु मां देवदेवी च लक्ष्मीः सर्व्वसमृद्धिदा। इति ते कथितं दिव्यं कवचं सर्व्वसिद्धये। यत्र तत्र न वक्तव्यं यदिच्छेदात्मनोहितं। शठाय भक्तिहीनाय निन्दकाय महेश्वरि। न्यूनांगे अतिरिक्तांगे दर्शयेन्न कदाचन न स्तवं दर्शयेद्दिव्यं संदर्शं शिवहा भवेत्। कुलीनाय महो

च्छ्राय दुर्गाभक्तिपराय च। वैष्णवाय विशुद्धाय दद्यात्‌ कवचमुत्तमं। निजशिष्याय शांताय धनिने ज्ञानिने तथा। दद्यात्‌ कवचमित्युक्तं सर्व्वतंत्रसमन्वितं। शनौ मंगलवारे च रक्तचन्दनकैस्तथा। यावकेन लिखेन्मंत्रं सर्व्वतंत्रसमन्वितं विलिख्य कवचं दिव्यं स्वयम्भुकुसुमैः शुभैः। स्वशुक्रैः परशुक्रैश्च नानागन्धसमन्वितैः। गोरोचनाकुंकुमेन रक्तचन्दनकेन वा। सुतिथौ शुभयोगे वा श्रवण्यां रवेर्द्दिने। अश्विन्यां कृत्तिकायाम्वा फल्गुण्यां वा मघासु च। पूर्व्वभाद्रपदायोगे स्वात्यां मंगलवासरे। विलिखेत्‌ प्रपठेत्‌ स्तोत्रं शुभयोगे सुरालये। आयुष्मत्‌ प्रीति योगे च ब्रह्मयोगे विशेषतः। इन्द्रयोगे शुभयोगे शुक्रयोगे तथैव च। कौलवे वालवे चैव वणिजे चैव सत्तमः। शून्यागारे श्मशाने वा विजने च विशेषतः। कुमारीं पूजयित्वादौ यजेद्देवीं सनातनीं। मत्स्यमांसैः शाकपूपैः पूजयेत्‌ परदेवतां। घृताद्यैः सोपकरणैः पूपसूपैर्विशेषतः। ब्राह्मणान्‌ भोजयित्वा च पूजयेत्‌ परमेश्वरीं। आखेटकमुपाख्यानं तत्र कुर्य्याद्दिनत्रयं। तदाधरेन्महारत्नं शंकरेणेति भाषितं। मारणद्वेषणादीनि लभते नात्र संशयः। स भवेत्‌ पार्व्वतीपुत्रः सर्व्वशास्त्रपुरस्कृतः। गुरुर्द्देवो हरः साक्षात्‌ पत्नी तस्य हरप्रिया। अभेदेन भजेद्‌ यस्तु तस्य सिद्धिरदूरतः। पठति य इह मर्त्यो नित्यमार्द्रान्तरात्मा जपफलमनुमेयं लप्स्यते यद्विधेयं। स भवति पदमुच्चैः सम्पदां पादनम्रः क्षितिपमुकुटलक्ष्मीर्लक्षणानां चिराय ॥ इति विश्वसारतंत्रे लक्ष्मीकवचं समाप्तं॥—

~~अथ सरस्वतीस्तोत्रं~~ ह्रीँ ह्रीँ हृद्यैकबीजे शशिरुचिकमले कल्पविस्पष्टशोभे भव्ये भव्यानुकूले कुमति वनदवेविश्ववन्द्यांघ्रिपद्मे। पद्मे पद्मोपविष्टे प्रणतजनमनोमोदसम्पा

दयिते प्रोतप्लुष्टाज्ञानकूटे हरिनिजदयिते देवि संसारसारे
ऐँ ऐँ ऐँ इष्टमंत्रे कमलभवमुखाम्भोजभूतिस्वरूपे रूपा
रूपप्रकाशे सकलगुणमये निर्गुणे निर्विकारे। न स्थूले ना
पि सूक्ष्मेप्यविदितविषये नापि विज्ञाततत्त्वे विश्वे विश्वान्त
राले सुरवरनमिते निष्कले नित्यशुद्धे। ह्रीँ ह्रीँ ह्रीँ जाप
तुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते मातर्मातर्नमस्ते
दह दह जडतां देहि बुद्धिं प्रशस्तां। विद्ये वेदांतगीते
श्रुतिपरिपठिते मोक्षदे मुक्तिमार्गे मार्गातीतप्रभावे भव
मम वरदा शारदे शुभ्रहारे। धीधींधीधींधीं धारणाख्ये धृति
मतिनुतिभिर्नामभिः कीर्त्तनीये नित्येऽनित्ये निमित्ते मुनि
गणनमिते नूतने वै पुराणे। पुण्ये पुण्यप्रवाहे हरिहर
नमिते नित्यशुद्धे सुवर्णे मात्रे मात्रार्द्धतत्त्वे मतिमतिमति
दे माधवप्रीतिदाने। ह्रीँ क्लीँ ध्रीँ ह्रीँ स्वरूपे दह दह दुरितं
पुस्तकव्यग्रहस्ते संतुष्टाकारचित्ते स्मितमुखि सुभगे जृम्भ
नि स्तम्भविद्ये। मोहे मुग्धप्रवाहे कुरु मम कुमतिध्वांत
विध्वंसमीड्ये ~~[illegible]~~ गीर्गौर्वाग्भारती त्वं कविवृषरस
नासिद्धिदा सिद्धिविद्या। स्तौमि त्वां त्वांच वन्दे भज मम
रसनां मा कदाचित्त्यजेथाः मा मे बुद्धिर्विरुद्धा भवतु
नच मनो देवि मे यातु पापं। मा मे दुःखं कदाचिद्विपदि च
समये प्यस्तु मे नाकुलत्वं शास्त्रे वादे कवित्वे प्रसरतु मम
धीर्मास्तु कुंठा कदाचित्। इत्येतैः श्लोकमुख्यैः प्रतिदिन
मुषसि स्तौति यो भक्तिनम्रो वाणीं वाचस्पतेरप्यतिमतवि
भवो वाक्पटुर्मृष्टपंकः। स स्यादिष्टार्थलाभी सुतमिव सततं
पालितं सा च देवी सौभाग्यं तस्य गेहे प्रसरति कवितावि
घ्नमस्तः प्रयाति। ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामिषः
सारस्वतो नरः पाठात् स स्यादिष्टार्थलाभवान्। पक्षद्वयेपि
यो भक्त्या त्रयोदश्येकविंशतिं। अविच्छेदं पठेद्धीमान् ध्या
त्वा देवीं सरस्वतीं। शुक्लाम्बरधरां देवीं शुक्लाभरणभूषितां

वांछितं फलमाप्नोति स लोके नात्र संशयः। इति ब्रह्मा स्वयं
प्राह सरस्वत्याः स्तवं शुभं। प्रयत्नेन पठेन्नित्यं सोऽमृत
त्वंच गच्छति। इति सरस्वतीस्तोत्रं समाप्तं॥

अथ गणेशस्तोत्रं। ॐकारमाद्यं प्रवदंति संतो वाचः श्रुती
नामपि ये गृणंति। गजाननं देवगणानतांघ्रिं भजेहम
र्द्धेन्दुकृतावतंसं। पादारविन्दार्च्चनतत्पराणां संसार
दावानलभंगदक्षं। निरंतरं निर्गतदानतोयैस्तं नौमि वि
घ्नेश्वरमम्बुजाभं। कृतांगरागं नवकुंकुमेन मत्तालिमा
लां मदपंकलग्नां। निवारयंतं निजकर्णतालैः कोविस्मरे
त् पुत्रमनंगशत्रोः। शम्भोर्ज्जटाजूटनिवासिगंगाजलं
समादाय कराम्बुजेन। लीलाभिराराच्छिवमर्च्चयंतं गजा
ननं भक्तियुता भवंति। कुमारभुक्तौ पुनरात्महेतोः पयोधरौ
पर्वतराजपुत्र्याः। प्रक्षालयंतं करशीकरेण मौग्ध्येन तं
नागमुखं भजामि। त्वया समुद्धृत्य गजास्य हस्तं ये शीक
राः पुष्कररन्ध्रमुक्ताः। व्योमांगने ते विचरंति ताराः का
लात्मना मौक्तिकतुल्यभासः। क्रीडावते वारिनिधौ गजा
स्ये वेलामतिक्रामति वारिपूरे। कल्पावसानं परिचिंत्य दे
वाः कैलासनाथं श्रुतिभिः स्तुवंति। नागानने नागकृ
तोत्तरीये क्रीडावते देवकुमारसंघैः। त्वयि क्षणं कालप
तिं विहाय तौ प्रापतुः कन्दुकतामिनेन्दु। मदोल्लसत्
पंचमुखैरजस्रमध्यापयंतं सकलागमार्थान्। देवानृ
षीन् भक्तजनैकमित्रं हेरम्बमर्कारुणमाश्रयामि। पादाम्बु
जाभ्यामतिकोमलाभ्यां कृतार्थयंतं कृपया धरित्रीं। अका
रणं कारणमाप्तवाचां तन्नागवक्त्रं न जहाति चेतः। येना
र्पितं सत्यवतीसुताय पुराणमालिख्य विषाणकोट्या
तं चन्द्रमौलेस्तनयं तपोभिराराध्यमानन्दघनं भ
जामि। पदं श्रुतीनामपदं स्तुतीनां लीलावतारं परमात्म
मूर्त्तेः। नागात्मको वा पुरुषात्मको वेत्यभेद्यमाद्यं भज

विघ्नराजं। पाशांकुशौ भग्नरदं त्वभीष्टं करैर्दधानं कररन्ध्र
मुक्तैः। मुक्ताफलाभैः पृथुशीकरौघैः। सिंचंतमंगं शिवयो
र्भजामि। अनेकमेकं गजमेकदंतं चैतन्यरूपं जगदादिवी
जं। ब्रह्मेति यं ब्रह्मविदो वदंति तं शम्भुसूनं सततंभजा
मि। अंगे स्थितायां निजवल्लभाया मुखाम्बुजालोकनलो
लनेत्रं। स्मेराननाब्जं मदवैभवेन रुद्धं भजे विश्वविमोहनं
तं। ये पूर्व्वमाराध्य गजानन त्वां सर्व्वाणि शास्त्राणि पठं
ति तेषां त्वत्तो न चान्यत प्रतिपाद्यमस्ति तदस्ति चेत् सत्य
मसत्यकल्पं। हिरण्यवर्णं जगदीशितारं कविं पुराणं रविम
ण्डलस्थं। गजाननं यं प्रवदंति संतस्तत्कालयोगैस्तमहं
प्रपद्ये। वेदांतगीतं पुरुषं भजेहमात्मानमानन्दघनं हृ
दिस्थं। गजाननं यन्महसा जनानां विघ्नान्धकारो विलयं
प्रयाति। शम्भोः समालोक्य जटाकलापे शशांकखण्डं नि
जपुष्करेण। स्वभग्नदंतं प्रविविच्य मौग्ध्यादाकृष्टुकामः
श्रियमातनोतु। विघ्नागणानां विनिपातनार्थं यन्नारिकेलैः
कदलीफलाद्यैः। प्रभावयंतो मदवारणास्यं प्रभुं सदाभी
ष्टमहं भजे तं। यज्ञैरनेकैर्व्बहुभिस्तपोभिराराध्य साध्यं
गजराजवक्त्रं स्तुत्यानया ये विधिना स्तुवंति ते सर्व्वलक्ष्मी
निलयो भवंति॥ इति गणेशस्तोत्रं समाप्तं॥
अथ हरिद्रागणेशकवचं। ईश्वर उवाच। शृणु वक्ष्यामि
कवचं सर्व्वसिद्धिकरं प्रिये। पठित्वा धारयित्वा च नरो मु
च्येत संकटात्। अज्ञात्वा कवचं देवि गणेशस्य मनुं जपे
त्। सिद्धिर्न जायते तस्य कल्पकोटिशतैरपि। ॐ आमो
दश्च शिरः पातु प्रमोदश्च तथोपरि। सम्मोदो भ्रूयुगे पातु
भ्रूमध्ये च गणाधिपः। गणक्रीडो नेत्रयुग्मं नासायां गण
नायकः। गणक्रीडान्वितः पातु वदने सर्व्वसिद्धये। जिह्वायां
सुमुखः पातु ग्रीवायां दुर्म्मुखः सदा। विघ्नेशो हृदये पातु

विघ्ननाशश्च वक्षसि। गणानां नायकः पातु बाहुयुग्मे सदा
मम। विघ्नकर्त्ता च उदरे विघ्नहर्त्ता च लिंगके। गजवक्त्रः कटी
देशे एकदंतो नितम्बके। लम्बोदरः सदा पातु गुह्यदेशे
ममारुणः। व्यालयज्ञोपवीती मां पातु पादयुगे तथा। जा
पकः सर्व्वदा पातु जानुजंघे गणाधिपः। हारिद्रः सर्व्वदा पातु
सर्व्वांगे गणनायकः। य इदं प्रपठेन्नित्यं गणेशस्य महेश्वरि
कवचं सर्व्वसिद्ध्याख्यं सर्व्वपापविमोचनं। सर्व्वसम्पत्प्रदं सा
क्षात् सर्व्वशत्रुक्षयंकरं। ग्रहपीड़ाज्वररोगो ये चान्ये गुह्य
कादयः। पठनात् श्रवणादेव नाशमायांति तत्क्षणात्। धन
धान्यकरं देवि कवचं सुरपूजितं। समो नास्ति महेशानि
त्रैलोक्ये गणपस्य च। हारिद्रस्य महेशानि कवचस्य च
भूतले। किमन्यैरसदालापैर्यत्रायुर्व्ययतामियात्। इति
विश्वसारतंत्रे हरिद्रागणेशकवचं समाप्तं॥ —
अथ श्रीसूर्य्यकवचं। श्रीसूर्य्य उवाच। शाम्ब शाम्ब महाबाहो
शृणु मे कवचं शुभं। त्रैलोक्यमंगलं नाम कवचं परमाद्भुतं
यज्ज्ञात्वा मंत्रवित् सम्यक् फलमाप्नोति निश्चितं। यद्धृ
त्वा च महादेवो गणानामधिपोऽभवत्। पठनाद्धारणा
द्विष्णुः सर्व्वेषां पालकः सदा। एवमिन्द्रादयः सर्व्वे सर्व्वै
श्वर्य्यमवाप्नुयुः। कवचस्य ऋषिर्ब्रह्मा छन्दोऽनुष्टुबुदा
हृतं श्रीसूर्य्यो देवता चात्र सर्व्वदेवनमस्कृतः। यश
आरोग्यमोक्षेषु विनियोगः प्रकीर्त्तितः। प्रणवो मे शिरः
पातु घृणिर्मे पातु भालकं। सूर्य्योऽव्यान्नयनद्वन्द्वमादि
त्यः कर्णयुग्मकं। अष्टाक्षरो महामंत्रः सर्व्वाभीष्टफलप्रदः
ह्रीं वीजं मे मुखं पातु हृदयं भुवनेश्वरी। चन्द्रवीजं वि
सर्गाढ्यं पातु मे गुह्यदेशकं। त्र्यक्षरोऽसौ महामंत्रः
सर्व्वतंत्रेषु गोपितः। शिवो वह्निसमायुक्तो वामाक्षिविन्दुभूषि
तः। एकाक्षरो महामंत्रः श्रीसूर्य्यस्य प्रकीर्त्तितः। गुह्याद्

गुह्यतरो मंत्रो वांछाचिन्तामणिः स्मृतः। शीर्षादिपाद पर्य्यंतं
सदा पातु मनूत्तमः। इति ते कथितं दिव्यं त्रिषु लोकेषु दु
र्लभं। श्रीपदं कांतिदं नित्यं धनारोग्यविवर्धनं। कुष्ठादि
रोगशमनं महाव्याधिविनाशनम्। त्रिसन्ध्यं यः पठेन्नि
त्यमरोगी बलवान् भवेत्। बहुना किमिहोक्तेन यद्य
न्मसि वर्त्तते। तत्तत् सर्वं भवत्येव कवचस्य च धारणात्
भूतप्रेतपिशाचाश्च यक्षगन्धर्वराक्षसाः। ब्रह्मराक्षसवे
ताला नैव द्रष्टुमपि क्षमाः। दूरादेव पलायंते तस्य संकी
र्त्तनादपि। भूर्ज्जपत्रे समालिख्य रोचनागुरुकुंकुमैः। रवि
वारे च संक्रांत्यां सप्तम्यांच्च विशेषतः। धारयेत् साधक
श्रेष्ठस्त्रैलोक्यविजयी भवेत्। त्रिलौहमध्यगं कृत्वाधारये
द्दक्षिणे भुजे। शिखायामथवा कंठे सोऽपि सूर्य्यो न सं
शयः। इति ते कथितं शाम्ब त्रैलोक्यमंगलाभिधांकव
चं दुर्लभं लोके तव स्नेहात् प्रकाशितं। अज्ञात्वाकवचं
दिव्यं जपेत् सूर्य्यमनुत्तमं। सिद्धिर्न जायते तस्य क
ल्पकोटिशतैरपि। इति ब्रह्मजामले त्रैलोक्यविजयंनाम
श्री सूर्य्यकवचं समाप्तं॥

~~अथ विष्णुस्तवः~~। आदाय वेदाः सकलाः समुद्रान्निहत्य
शंखं रिपुमत्युदग्रं। दत्ताः पुरा येन पितामहाय विष्णुं
तमादिं भज मत्स्यरूपं। १। दिव्यामृतार्थं मथिते महा
ब्धौ देवासुरैर्वासुकिमन्दराद्यैः। भूमेर्महावेगविघूर्णि
तायास्तं कूर्म्ममाधारगतं स्मरामि। २। समुद्रकांची सरिदु
त्तरीया वसुन्धरा मेरुकिरीटभारा। दंताग्रतो येन समु
द्धृता भूस्तमादिलोकं शरणं प्रपद्ये। ३। भक्तार्त्तिभंजन
मया धिया य स्तम्भांतरालादुदितो नृसिंहः। रिपुं सुरा
णां निशितैर्नखाग्रैर्विदारयंतं नच विस्मरामि। ४। चतुः
समुद्राभरणा धरित्री न्यासाय नालं चरणस्य यस्य। एकस्य

नान्यस्य पदं सुराणां त्रिविक्रमं सर्वगतं नमामि। ५। त्रिस
प्तवारं नृपतीन्निहत्य यस्तर्पणं रक्तमयं पितृभ्यः। चकार
दोर्द्दण्डबलेन सम्यक् तमादिसूरं प्रणमामि विष्णुं। ६।
कुले रघूणां समवाप्य जन्म विधाय सेतुं जलधेर्जलांतः
लंकेश्वरं यः शमयांचकार सीतापतिं तं प्रणमामि भक्त्या
। ७। हलेन सर्वान्नृपतीन्निहत्य चकार चूर्णं मुषलप्रहारैः।
यः कृष्णमासाद्य बलं बलीयान् भक्त्या भजे तं बलभ
द्ररामं। ८। पुरा सुराणामसुरान् विजेतुं संभारयंश्चीवर
चिह्नवेशं। चकार यः शास्त्रममोघकल्पं तं मूलभूतं
प्रणतोऽस्मि बुद्धं। ९। कल्पावसाने निखिलैः खुराग्रैः
संघट्टयामास निमेषमात्रान्। यस्तेजसा निर्द्दहतातिभी
मोविश्वात्मकं तं तुरगं भजामः। १०। शंखं सुचक्रं सुग
दां सरोजं दोर्भिर्द्दधानं गरुडाधिरूढं। श्रीवत्सचिह्नं
जगदादिमूलं तमालनीलं हृदि विष्णुमीडे। ११। क्षीराम्बु
धौ शेषविशेषतल्पे शयानमंतः स्मितशोभिवक्त्रं। उत्
फुल्लनेत्राम्बुजमम्बुदाभमाद्यं श्रुतीनाम सकृत स्मरामि
। १२। प्रीणयेदनया स्तुत्या जगन्नाथं जगन्मयं। धर्मार्थ
काममोक्षाणामाप्तये पुरुषोत्तमं। इति विष्णुस्तवः समाप्तः।

~~अथ श्रीरामस्तोत्रं~~। श्री हनुमानुवाच। तिरश्चाम
पि राजेति समवायं समीयुषां। यथा सुग्रीवमुख्यानां यस्त
मुग्रं नमाम्यहं। सकृदेव प्रपन्नाय विशिष्टामैरयच्छ्रियं।
विभीषणायाब्धितटे यस्तं वीरं नमाम्यहं। ~~सकृदेव प्रपन्ना~~
यो महान् पूजितो व्यापी महाब्धेः करुणाभृतं। स्तुतं
जटायुना यस्य महाविष्णुं नमाम्यहं। तेजसाप्यायिता
यस्य ज्वलंति ज्वलनादयः। प्रकाशते स्वतंत्रो यस्तं ज्व
लंतं नमाम्यहं। सर्वतो मुखतो येन लीलया दर्शिता रणे।
राक्षसेश्वर योधानां तं वन्दे सर्वतोमुखं। नृभावं तु प्रप
न्नानां हिनस्ति च तथा नृषु। सिंहः सत्वेष्विवोत्कृष्टस्तं

नृसिंहं नमाम्यहं। यस्माद्विभ्यति वातार्कज्वलनेन्द्राः समृत्य
वः। भियं धिनोतु पापानां भीषणं तं नमाम्यहं। यो मृत्यु
निजदासानां मारयत्यखिलेष्टदः। तत्रोदाहृत यो वन्द्यो म
त्युमृत्युं नमाम्यहं। यत्पादपद्मप्रणतो भवेदुत्तमपूरुषः
तमीशं सर्वदेवानां नमनीयं नमाम्यहं। आत्मभावं समु
त्क्षिप्य दास्येनैव रघूद्वहं। भजेऽहं प्रत्यहं रामं ससी
तं सहलक्ष्मणं। नित्यं श्रीरामभद्रस्य किंकरा यमकिंकराः
शिवमय्यो दिशस्तस्य सिध्यस्तस्य दासिकाः। इमं हनू
मता प्रोक्तं मंत्रराजात्मकं स्तवं। पठेदनुदिनं यस्तु स रामे
भक्तिमान् भवेत्। इति हनूमत्कल्पे मंत्रराजात्मकं श्रीराम
स्तोत्रं समाप्तं॥—

~~अथ रामाष्टशतकं नाम स्तोत्रं~~। वेदव्यास उवाच। शृणु
गांगेय वक्ष्यामि रामस्याद्भुतकर्मणः। नामाष्टशतकं
पुण्यं त्रिषु लोकेषु विश्रुतं। नातः परतरं गुह्यं त्रिषु
लोकेषु विद्यते। कैलासशिखरे रम्ये नानारत्नविभूषि
ते। एकाग्रप्रयतो भूत्वा विष्णुमाराध्य भक्तिभिः। उपवि
ष्टस्ततो भोक्तुं पार्वतीं शंकरोऽब्रवीत्। पार्वति हि मया
सार्धं भोक्तुं भुवनवन्दिते। तमाह पार्वती देवी जप्यानाम
सहस्रकं। ततो भोक्ष्याम्यहं देव भुज्यतां भवता प्रभो।
ततस्तां पार्वतीं प्राह प्रहसन् परमेश्वरः। धन्यासि कृत
पुण्यासि विष्णुभक्तासि पार्वति। दुर्लभा वैष्णवी भक्ति
र्भागिधेयं विनेश्वरि। रकारादीनि नामानि शृण्वतो
मम पार्वति। ~~दुर्लभं~~ मनः प्रसन्नतामेति रामनामाभि
शंकया। रमंते योगिनोऽनंते सत्यानन्दे चिदात्मनि। इति
रामपदेनासौ परं ब्रह्माभिधीयते। रामरामेति रामेति
रमे रमे मनोरमे। सहस्रनाममध्ये तु रामनाम वरानने
रामेत्युक्त्वा महादेवि भुङ्क्ष्व सार्धं मयाधुना। ततो रामेति
नामोक्त्वा सह भुक्त्वा च पार्वति। ततो भुक्त्वा महादेवि पति

ना सह संस्थिता। प्रपच्छ श्रीमहादेवं प्रीतिप्रवणमानसा।
सहस्रनामभिस्तुल्यं रामनाम त्वयोदितं। तस्यान्यान्यपि
नामानि संति चेद्रावणद्विषः। कथ्यतां मम देवेश तत्र मे
प्रीतिरुत्तमा। श्रीशंकर उवाच। शृणु नामानि वक्ष्यामि राम
चन्द्रस्य पार्वति। लौकिका वैदिकाः शब्दा ये केचित् संति
पार्वति। नामानि रामभद्रस्य सहस्रं तेषु चाधिकं। तेषु
चात्यंतमुख्यं हि नाम्नामष्टोत्तरं शतं। विष्णोरेकैकना
मानि सर्ववेदाधिकं फलं। तादृङ्नामसहस्राणि राम
नाम परं मतं। जपतः सर्ववेदांश्च सर्वमंत्रांश्च पार्वति।
तस्मात् कोटिगुणं पुण्यं रामनाम्नैव लभ्यते। अस्य श्री
रामाष्टोत्तरशतनामस्तोत्रस्य ईश्वर ऋषिरनुष्टुप्छन्दः
श्रीरामचन्द्रो देवता श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः।
ॐ श्रीरामो रामभद्रश्च रामचन्द्रश्च शाश्वतः। राजीवलो
चनः श्रीमान् राजेन्द्रो रघुपुंगवः। जानकीवल्लभो जैत्रो
जितामित्रो जनार्द्दनः। विश्वामित्रप्रियो दांतः शरणत्राण
तत्परः। वालिप्रमथनो वाग्मी सत्यवाक् सत्यविक्रमः
सत्यव्रतो व्रतफलः सदा हनूमदाश्रयः। कौशलेयः खर
ध्वंसी विराधवधपण्डितः। विभीषणपरित्राता दशग्रीव
शिरोहरः। सप्ततालप्रभेत्ता च हरकोदण्डखण्डनः। जाम
दग्न्यमहादर्पज्वलनस्ताडकांतकः। वेदांतसारोऽमेया
त्मा भववैद्यश्च भेषजः। दूषणत्रिशिरोहंता त्रिमूर्त्ति
स्त्रिगुणस्त्रयी। त्रिविक्रमस्त्रिलोकात्मा पुण्यचारीतिकीर्त्ति
नः। त्रिलोकीरक्षको धन्वी दण्डकारण्यपुण्यकृत्। अहि
ल्यापावनश्चैव पितृभक्तो वरप्रदः। जितेन्द्रियो जितक्रोधो जित
लोभो जगद्गुरुः। ऋक्षवानरसंघाती चित्रकूटसमाश्रयः
जयंतत्राणवरदः सुमित्रापुत्रसेवितः। सर्वदेवाधिदेवश्च
मृतवानरजीवनः। मायामारीचहंता च महाभोगो महाभुजः।

सर्व्व देवस्तुतः सौम्यो ब्रह्मण्यो मुनिसंस्तुतः। महायोगी
महोदारः सुग्रीवेप्सित राज्यदः। सर्व्व पुण्याधिकफलस्तीर्थं
सर्व्वाघनाशनः। आदि पुरुषो महापुरुषः परमः पुरुषस्तथा
पुण्योदयोदयासारः पुराणः पुरुषोत्तमः। स्मित वक्त्रोमित
भाषी पूर्व्वभाषी च राघवः। अनंत गुणगम्भीरो धीरोदात्त
गुणोत्तरः। मायामानुष चारित्रो महादेवाभिपूजितः। सेतु
कृज्जितवारीशः सर्व्वतीर्थमयो हरिः। श्यामांगः सुन्दरः
शूरः पीतवासाधनुर्धरः। सर्व्वयज्ञाधिपो यज्ञो जरामर
ण वर्ज्जितः। शिवलिंगप्रतिष्ठाता सर्व्वाघगण वर्ज्जितः।
परमात्मा परं ब्रह्म सच्चिदानन्द विग्रहः। परं ज्योतिः परंधा
म पराकाष्ठा परात्परः। परेशः पारगः पारः सर्व्वदेवात्मक
शिवः। इत्येतत् रामभद्रस्य नाम्नामष्टोत्तरं शतं। गुह्याद्गु
ह्यतरं देवि तव प्रीत्या प्रकीर्त्तितं। यः पठेत् शृणुया
द्वापि भक्तियुक्तेन चेतसा। स सर्व्वैर्म्मुच्यते पापैः कल्पकोटि
शतोद्भवैः। जलानि स्थलतां यांति शत्रवो यांति मित्रतां
राजानो दासतां यांति वह्नयो यांति सौम्यतां। आनुकूल्यं
च भूतानि स्थैर्य्यं यांति चलाः श्रियः। अनुग्रहं ग्रहा यांति
नाशमायांत्युपद्रवाः। पठ्यते भक्तिभावेन जनस्य गिरिस
म्भवे। यः पठेत् परया भक्त्या तस्य वश्यं जगत्त्रयं। यद्यत्
कामयते चित्ते तत्तदाप्नोति कीर्त्तनात्। यः पठेद्रामचन्द्रस्य
नाम्नामष्टोत्तरं शतं। ज्ञाने नापि च कुर्व्वाणो न स पापेनलि
प्यते। सर्व्ववेदेषु तीर्थेषु दानेषु च व्रतेषु च। तत् फलंको
टि गुणितं स्तवेनानेन लभ्यते। पुण्यकालेषु सर्व्वेषु पठन्ना
नंत्यमश्नुते। कल्पकोटिसहस्राणि कल्पकोटिशतानि च
वैकुंठे वासमाप्नोति दश पूर्व्वैर्द्दशापरैः। रामं दूर्व्वादलश्यामं
पद्माक्षं पीतवाससं। स्तुवंति नामभिर्द्दिव्यैर्न ते संसारि
णो नराः। रामाय रामभद्राय रामचन्द्राय वेधसे। रघुनाथा
य नाथाय सीतायाः पतये नमः। इमं मंत्रं महेशानि जपन्नेव

दिवानिशं। सर्व्व पापविनिर्म्मुक्तो विष्णुसायुज्यमाप्नुयात्। इत्ये
तद्रामचन्द्रस्य माहात्म्यं वेदसम्मतं। कथितं तव गांगेय
पतस्त्वं वैष्णवोत्तमः। वन्दामहे महेशानि हरकोदण्डखण्डनं
जानकीहृदयानन्द चन्दनं रघुनन्दनं। इति पद्मपुराणे
पार्व्वतीश्वर सम्वादे श्रीरामचन्द्रस्तवराजः समाप्तं।
~~अथ श्रीरामकवचं~~। ध्यात्वा नीलोत्पलश्यामं रामं राजी
वलोचनं। जानकीलक्ष्मणोपेतं जटामुकुट मण्डितं। सासि
तूणधनुर्व्वाणपाणिं नक्तंचरांतकं। स्वलीलया जगत्त्रातु
माविर्भूतमजं विभुं। रामरक्षां पठेत् प्राज्ञः पापघ्नीं सर्व्व
कामदां। अस्य श्रीरामकवचस्य बुधकौषिक ऋषिर्गायत्री
छन्दः श्रीरामचन्द्रो देवता श्रीरामचन्द्र प्रीत्यर्थे जपे विनि
योगः। ~~अस्य श्रीरामकवचस्य~~ ॐ शिरो मे राघवः पातु भालं
दशरथात्मजः। कौशलेयो दृशौ पातु विश्वामित्रप्रियः श्रु
ती। घ्राणं पातु मखत्राता मुखं सौमित्रि वत्सलः। जिह्वां
विद्यानिधिः पातु कंठं भरत वन्दितः। स्कन्धौ दिव्यायुध
पातु भुजौ भग्नेशकार्म्मुकः। करौ सीतापतिः पातु हृदयं
जामदग्न्यजित्। वक्षः पातु कवन्धारिस्तनौ गीर्व्वाणवन्दि
तः। पार्श्वौ कुलपतिः पातु कुक्षिमिक्ष्वाकुनन्दनः। मध्यं पातु
खरध्वंसी नाभिं जाम्बुवदाश्रयः। गुह्यं जितेन्द्रियः पातु
पृष्ठं पातु रघूत्तमः। सुग्रीवेशः कटीं पातु शक्रघ्निनी हनु
मत्प्रभुः। ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत्। जा
नुनी सेतुकृत् पातु जंघे दशमुखांतकः। पादौ विभीषण
श्रीदः पातु रामोऽखिलं वपुः। एतां रामबलोपेतां रक्षां
यः सुकृती पठेत्। स चिरायुः सुखी पुत्री विजयी विनयी
भवेत्। पातालभूधर-व्योम-चारिणश्छद्मचारिणः। न
द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः। रामेति रामभद्रेति
रामचन्द्रेति वा स्मरन्। नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च
विन्दति। जगज्जैत्रैकमंत्रेण रामनाम्नाभिरक्षितं। यः कंठेधार

येत्रस्य करस्थाः सर्व्वसिद्धयः। भूर्ज्जपत्रे त्विमां विद्यां गन्ध
चन्दन चर्च्चितां। कृत्वा वै धारयेद्यस्तु सोऽभीष्टं फल
माप्नुयात्। काकवन्ध्या च या नारी मृतवत्सा च याभवे
त्। वह्वपत्या जीववत्सा सा भवेन्नात्र संशयः। वज्रपं
जरनामेदं यो रामकवचं पठेत्। अव्याहताज्ञः सर्व्वत्र ल
भते जयमंगलं। आदिष्टवान् यथा स्वप्ने रामरक्षामिमां
हरिः। तथा लिखितवान् प्रातः प्रवुद्धो वुध कौशिकः।
धन्विनौ वद्ध निस्त्रिंशौ काकपक्षधरौ शुभौ। वीरौ मां
पथि रक्षेतां तावुभौ रामलक्ष्मणौ। तरुणौ रूपसम्पन्नौ
सुकुमारौ महावलौ। पुण्डरीकविशालाक्षौ चीरकृष्ण
जिनाम्वरौ। फलमूलाशिनौ दांतौ तापसौ व्रह्मचारिणौ
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ। शरण्यौ सर्व्व
सत्वानां श्रेष्ठौ सर्व्वधनुष्मतां। रक्षःकुल निहंतारौ त्राये
तां वो रघूत्तमौ। आत्तसज्ज-धनुषा विषुस्पृशा रक्षया
शुगनिषंगसंगिनौ। रक्षणाय मम रामलक्ष्मणा वग्रतः
पथि सदैव गच्छतां। सन्नद्धः कवची खड्गी चापवाण
धरो युवा। यच्छन्मनोरथांचास्मान्रामः पातु सुलक्ष्मणः
अग्रतस्तु नृसिंहोमे पृष्ठतो गरुडध्वजः। पार्श्वयोस्तु धनु
ष्मंतौ सशरौ रामलक्ष्मणौ। रामो दाशरथिः शूरो लक्ष्मण
नुचरो वली। काकुत्स्थः पुरुषः पूर्णः कौशलेयो रघूत्तमः
वेदांतवेद्यो यज्ञेशः पुराणः पुरुषोत्तमः। जानकीवल्लभः
श्रीमान् अप्रमेय पराक्रमः। दक्षिणे लक्ष्मणो धन्वी वामे च
जानकी शुभा। पुरतो मारुतिर्यस्य तं नमामि रघूत्तमम्। आ
पदामपहर्त्तारं दातारं सर्व्वसम्पदां। गुणाभिरामं श्रीरामं
भूयोभूयो नमाम्यहं। एतानि मम नामानि मद्भक्तो यः सदा
पठेत्। अश्वमेधायुतं पुण्यं स प्राप्नोति न संशयः। इति
पद्मपुराणे वज्रपंजरं नाम श्रीरामकवचं समाप्तं।।—

अथ श्रीकृष्णस्तोत्रं। प्रसीद भगवन् मह्यमज्ञानात् कुंठितात्म
ने। तवांघ्रि पंकजरजो रागिणीं भक्तिमुत्तमां। अज प्रसीद भग
वन्नमित द्युति पंजर। अप्रमेय प्रसीदास्मद् दुःखहन् पुरु
षोत्तम। स्वसंवेद्य प्रसीदास्मदानन्दात्मन्ननामय। अचिंत्य
सार विश्वात्मन् प्रसीद परमेश्वर। प्रसीद तुंगतुंगानां
प्रसीद शिरशोभन। प्रसीद गुणगम्भीर गम्भीराणां महाद्युते
प्रसीदाव्यक्तविस्तीर्ण विस्तीर्णनाम गोचर। प्रसीदार्द्रार्द्रजा
तीनां प्रसीदानंतदायिनां। गुरोर्गरीयः सर्व्वेश प्रसीदानंत
देहिनां। जय माधव मायात्मन् जय शाश्वत शंखभृत्।
जय शंखधर श्रीमन् जयानन्दकनन्दन। जय चक्रगदापा
णे जय देवजनार्द्दन। जय रत्नवरावद्ध किरीटांत मस्तक
जय पक्षप्रतिच्छाया निरुद्धार्कक वारुण। नमस्ते नरकाराते
नमस्ते मधुसूदन। नमस्ते ललितापांग नमस्ते नरकांतक।
नमः पापहरेशान नमः सर्व्वभयापह। नमः सम्भूत सर्व्वा
त्मन् नमः सम्भृतकौस्तुभ। नमस्ते नयनातीत नमस्ते
भयहारक। नमो विभिन्नवेशाय नमः श्रुतिपथाभिग। नम
स्त्रिमूर्त्तिभेदेन सर्गस्थित्यंतहेतवे। विष्णवे त्रिदशाराति
जिष्णवे परमात्मने। चक्रभिन्नारिचक्राय चक्रिणे चक्रव
न्धवे। विश्वाय विश्ववन्द्याय विश्वभूतानुवर्त्तिने।
नमोऽस्तु योगिध्येयाय नमोऽस्त्वध्यात्मरूपिणे। भक्तिप्रद
य भक्तानां नमस्ते भक्तिदायिने। पूजनं हरणं चेष्टाध्यानं
पश्चान्नमक्रिया। देवेश कर्म्म सर्व्वं मे भवेदाराधनं तव। इति
हवनजपार्च्चा भेदतो विष्णुपूजा नियत हृदयकर्म्मा यस्तु
मंत्री चिराय। स खलु सकल कामान् प्राप्य कृष्णांगतात्मा
जननमृति विमुक्तो ह्युत्तमां भक्तिमेति। गोगोपगोपिकावी
तं गोपालं गोषु गोप्रदं। गोपैरीड्यं गोसहस्रैर्नौमि गो
कुलनायकं। प्रीणयेदनया स्तुत्या देवं तत्र जगन्मयं। धर्म्मा
र्थकाम मोक्षाणामाप्तये पुरुषोत्तमं। इति श्रीकृष्णस्तोत्रं समाप्तं।

अथ गोपालस्तोत्रं। नारद उवाच। नवीननीरदश्यामं नीले
न्दीवरलोचनं। वल्लवीनन्दनं वन्दे कृष्णं गोपालरूपिणं
स्फुरद्बर्हदलोद्बद्धनीलकुंचितमूर्द्धजं। कदम्बकुसुमोद्ब
द्धवनमालाविभूषितं। गण्डमण्डलसंसर्गिचलत्कांच
नकुण्डलं। स्थूलमुक्ताफलोदारहारद्योतितवक्षसं। हेमां
गदतुलाकोटिकिरीटोज्वलविग्रहं। मन्दमारुतसंक्षोभ
वल्गिताम्बरसंचयं। रुचिरौष्ठपुटन्यस्तवंशीमधुरनिःस्व
नैः। लसद्गोपालिकाचेतो मोहयंतं मुहुर्मुहुः। वल्लवी
वदनाम्भोज-मधुपान-मधुव्रतं। क्षोभयंतं मनस्तासां स
स्मेरापांगवीक्षणैः। यौवनोद्भिन्नदेहाभिः संशक्ताभिः
परस्परं। विचित्रहारभूषाभिर्गोपनारीभिरावृतं। प्रभि
न्नांजनकालिन्दीजलकेलिकलोत्सुकं। योधयंतं क्वचि
द्गोपान् व्याहरंतं गवां गणं। कालिन्दीजलसंसर्गि
शीतलानिलसेविते। कदम्बपादपछाये स्थितं वृन्दावने
क्वचित्। रत्नभूधरसंलग्नरत्नासनपरिग्रहं। कल्पपादप
मध्यस्थ-हेममण्डपिकागतं। वसंतकुसुमामोद सुरभी
कृतदिङ्मुखे। गोवर्द्धनगिरौ रम्ये स्थितं रासरसोत्सुकं
सव्यहस्ततलन्यस्त-गिरिवर्य्यातपत्रकं। खण्डिताखण्डलो
न्मुक्त-मुक्तासार-घनाघनं। वेणुवाद्यमहोल्लास-कृतहुंकार
निःस्वनैः। सवत्सैरुन्मुखैः शश्वद्गोकुलैरभिरक्षितं
कृष्णमेवानुगायद्भिस्तच्चेष्टावशवर्त्तिभिः। दण्डपाशो
द्यतकरैर्गोपालै-रूपशोभितं। नारदाद्यैर्मुनिश्रेष्ठैर्वेद
वेदांगपारगैः। प्रीतिसुस्निग्धया वाचा स्तूयमानं परात्
परं। य एवं चिंतयेद्देवं भक्त्या संस्तौति मानवः। त्रिस
न्ध्यं तस्य तुष्टोऽसौ ददाति वरमीप्सितं। राजवल्लभता
मेति भवेत् सर्व्वजनप्रियः। अचलां श्रियमाप्नोति स वाग्मी
जायते ध्रुवं। इति गौतमीये श्रीगोपालस्तोत्रं समाप्तं। —

अथ श्रीकृष्णकवचं। पुलस्त्य उवाच। भगवन् सर्व्वधर्म्मज्ञ
कवचं यत्प्रकाशितं। त्रैलोक्यमंगलं नाम कृपया कथय प्र
भो। सनत्कुमार उवाच। शृणु वक्ष्यामि विप्रेन्द्र कवचं परमा
द्भुतं। नारायणेन कथितं कृपया ब्रह्मणे पुरा। ब्रह्मणा
कथितं मह्यं परं स्नेहाद्वदामि ते। अति गुह्यतरं तत्त्वं
ब्रह्ममंत्रौघविग्रहं। यद्धृत्वा पठनाद्ब्रह्मा सृष्टिं वितनुते
ध्रुवं। यद्धृत्वा पठनात् पाति महालक्ष्मीर्जगत्त्रयं। पठ
नाद्धारणात् शम्भुः संहर्त्ता सर्व्वतत्त्ववित्। त्रैलोक्यजननी
दुर्गा महिषादि-महासुरान्। वरदृप्तान् जघानैव पठना
द्धारणाद्यतः। एवमिन्द्रादयः सर्व्वे सर्व्वैश्वर्य्यमवाप्नुयुः
शिष्याय भक्तियुक्ताय साधकाय प्रकाशयेत्। शठाय पर
शिष्याय दत्त्वा मृत्युमवाप्नुयात्। त्रैलोक्यमंगलस्यास्य
कवचस्य प्रजापतिः। ऋषिश्छन्दश्च गायत्री देवो नारायणः
स्वयं। धर्म्मार्थकाममोक्षेषु विनियोगः प्रकीर्त्तितः। प्रणवो
मे शिवः पातु नमो नारायणाय च। भालं पायान्नेत्रयुग्मम
ष्टार्णो भुक्तिमुक्तिदः। क्लीं पायात् श्रोत्रयुग्मं चैकाक्षरः स
र्व्वमोहनः। क्लीं कृष्णाय सदा घ्राणं गोविन्दायेति जिह्विकां
गोपीजनपदं वल्लभाय स्वाहाननं मम। अष्टाक्षरो महामंत्रः
कंठं पातु दशाक्षरः। गोपीजनपदं वल्लभाय स्वाहा भुजद्वयं
क्लीं ग्लौं क्लीं श्यामलांगाय नमः स्कन्धौ दशाक्षरः। क्लीं कृ
ष्णः क्लीं करौ पायात् क्लीं कृष्णायांगजोऽवतु। हृदयं भुवने
शानी क्लीं कृष्णाय क्लीं स्तनौ मम। गोपालायाग्निजायांतं
कुक्षियुग्मं सदावतु। क्लीं कृष्णाय सदा पातु पार्श्वयुग्ममनु
त्तमः। कृष्णगोविन्दकौ पातु स्मराद्यौ ङेयुतौ मनुः। अष्टा
क्षरः पातु नाभिं कृष्णेति द्व्यक्षरोऽवतु। पृष्ठं क्लीं कृष्णकंका
लं क्लीं कृष्णाय द्विठांतकः। सक्थिनी सततं पातु श्रीं
ह्रीं क्लीं कृष्णठद्वयं। ऊरू सप्ताक्षरः पायात्त्रयोदशाक्षरोऽवतु

श्रीं ह्रीं क्लीं पदतो गोपीजनवल्लभपदं ततः। भाय स्वाहेति
पायुं वै क्लीं ह्रीं श्रीं तद्दशार्णकः। जानुनी च सदा पातु ह्रीं
श्रीं क्लीं च दशाक्षरः। त्रयोदशाक्षरः पातु जंघे चक्राम्बुजा
युधः। अष्टादशाक्षरो ह्रीं श्रीं पूर्वको विंशवर्णकः। सर्वांगं
मे सदा पातु द्वारकानायको बली। नमो भगवते पश्चात्
वासुदेवाय तत्परं। ताराद्यो द्वादशार्णोऽयं प्राच्यां
मां सर्वतोऽवतु। श्रीं ह्रीं क्लीं दशार्णस्तु क्लीं ह्रीं श्रीं षोडशा
र्णकः। गदाद्युदायुधो विष्णुर्मामग्नेर्दिशि रक्षतु। ह्रीं
श्रीं दशाक्षरो मंत्रो दक्षिणे मां सदावतु। तारो नमो भग
वते रुक्मिणीवल्लभाय च स्वाहेति षोडशार्णोऽयं नैर्ऋत्यां
दिशि रक्षतु। क्लीं हृषीकेशपदं शाय नमो मां वारुणेऽवतु
अष्टादशार्णः कामांतो वायव्ये मां सदावतु। श्रीं माया काम
कृष्णाय गोविन्दाय द्विठौ मनुः। द्वादशार्णात्मको विष्णु
रुत्तरे मां सदावतु। वाग्भवं कामकृष्णाय ह्रीं गोविन्दा
य ततः परं। श्रीं ह्रीं गोपीजनवल्लभांते भाय स्वाहा च
सौस्ततः। द्वाविंशत्यक्षरो मंत्रो मामैशान्ये सदावतु। कालि
यस्य फणामध्ये दिव्यं नृत्यं करोति तं। नमामि देवकीपुत्रं
नृत्यराजमच्युतं। द्वात्रिंशदक्षरो मंत्रोऽप्यधो मां सर्वतो
ऽवतु। कामदेवाय विद्महे पुष्पवाणाय धीमहि। तन्नोऽनंगः
प्रचोदयादेषा मां पातु चोर्ध्वतः। इति ते कथितं विप्र ब्रह्म
मंत्रौघविग्रहं। त्रैलोक्यमंगलं नाम कवचं ब्रह्मरूपकं। ब्रह्मणा
कथितं पूर्वं नारायणमुखाच्छ्रुतं। तव स्नेहान्मयाख्यातं प्रव
क्तव्यं न कस्यचित्। गुरुं प्रणम्य विधिवत् कवचं प्रपठेत्ततः। स
कृद्द्विस्त्रिर्यथाज्ञानं सोऽपि सर्वतपोमयः। मंत्रेषु सकलेष्वेव दे
शिको नात्र संशयः। शतमष्टोत्तरं चैव पुरश्चर्याविधिः स्मृतः
मंत्रसिद्धिर्भवेत्तस्य पुरश्चर्याविधानतः। स्पर्धामुद्धूय सततं
लक्ष्मीर्वाणी वसेत्ततः। पुष्पांजल्यष्टकं दत्वा मूलेनैव पठेत्सकृत्

दशवर्षसहस्राणां पूजायाः फलमाप्नुयात्। भूर्जे विलिख्य
गुलिकां स्वर्णस्थां धारयेद्यदि। कंठे वा दक्षिणे बाहौ सोऽपि
विष्णुर्न संशयः। अश्वमेधसहस्राणि वाजपेयशतानि च।
महादानानि यान्येव प्रादक्षिण्यं भुवस्तथा। कलां नार्हंति
तान्येव सकृदुच्चारणात्ततः। कवचस्य प्रसादेन जीवन्मुक्तो
भवेन्नरः। त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत्। इदं
कवचमज्ञात्वा भजेद्यः पुरुषोत्तमं। शतलक्षप्रजप्तोऽपि मंत्र
स्तस्य न सिध्यति। इति सनत्कुमारतंत्रे त्रैलोक्यमंगलं
नाम श्रीकृष्णकवचं समाप्तं।।–

अथ नृसिंहकवचं। नारद उवाच। इन्द्रादिदेववृन्देश तातेश्वर
जगत्पते। महाविष्णोर्नृसिंहस्य कवचं ब्रूहि मे प्रभो। यस्य
प्रपठनाद्विद्वान् त्रैलोक्यविजयी भवेत्। ब्रह्मोवाच। शृणु
नारद वक्ष्यामि पुत्रश्रेष्ठ तपोधन। कवचं नरसिंहस्य त्रैलो
क्यविजयाभिधं। यस्य प्रपठनाद्वाग्मी त्रैलोक्यविजयी भवेत्
स्रष्टाहं जगतां वत्स पठनाद्धारणाद्यतः। लक्ष्मीर्जगत्त्र
यं पाति संहर्त्ता च महेश्वरः। पठनाद्धारणाद्देवा बभूवुश्च
दिगीश्वराः। ब्रह्ममंत्रमयं वक्ष्ये भूतादि-विनिवारकं। यस्य
प्रसादाद्दुर्वासा-स्त्रैलोक्यविजयी मुनिः। पठनाद्धारणाद्य
स्य शास्ता च क्रोधभैरवः। त्रैलोक्यविजयस्यापि कवचस्य
प्रजापतिः। ऋषिश्छन्दश्च गायत्री नृसिंहो देवता विभुः
क्ष्रौं बीजं मे शिरः पातु चन्द्रवर्णो महामनुः। उग्रं वीरं महा
विष्णुं ज्वलंतं सर्वतोमुखं। नृसिंहं भीषणं भद्रं मृत्युमृ
त्युं नमाम्यहं। द्वात्रिंशदक्षरो मंत्रो मंत्रराजः सुरद्रुमः। कंठं
क्ष्रौं पातु ध्रुवं [illegible] हृद्भगवते चक्षुषी मम। नरसिंहाय च ज्वा
लामालिने पातु मस्तकं। दीप्तदंष्ट्राय च तथाग्निनेत्राय च
नासिकां। सर्वरक्षोघ्नाय सर्वभूतविनाशाय च। सर्वज्वरविना
शाय दह दह फट् फट्। रक्ष रक्ष सर्वमंत्रं स्वाहा पातु मुखं
मम। तारादि-रामचन्द्राय नमः पायाद्गुदं मम। क्लीं पायात्

पार्श्वयुग्मंच तारं नमः पदंततः। नारायणाय पार्श्वंच
।आं ह्रूँ ह्रीं क्रौँ क्ष्रौँ च हुँ फट्। षडक्षरः कटिं पातु ऊँ नमो भगवते
पदं। वासुदेवाय च पृष्ठं क्लीं कृष्णाय ऊरुद्वयं। क्लीं कृष्ण
य सदा पातु जानुनी च मनूत्तमः। क्लीं ग्लौँ क्लीं श्यामलांगा
य नमः पायात् पदद्वयं। क्ष्रौँ नरसिंहाय क्ष्रौँच सर्व्वांगं मे
सदावतु। इति ते कथितं वत्स सर्व्वमंत्रौघविग्रहं। तव स्नेहा
न्मयाख्यातं प्रवक्तव्यं न कस्यचित्। गुरुपूजां विधायाथ गृ
ह्णीयात् कवचं ततः। सर्व्वपुण्ययुतो भूत्वा सर्व्वसिद्धियुतो
भवेत्। शतमष्टोत्तरंचैव पुरश्चर्य्याविधिः स्मृतः। हवना
दीन् दशांशेन कृत्वा साधकसत्तमः। ततस्तु सिद्धकवचः पु
ण्यात्मा मदनोपमः। स्पर्द्धामूद्धूय भवने लक्ष्मीर्व्वाणी वसे
ततः। पुष्पांजल्यष्टकं दत्त्वा मूलेनैव पठेत् सकृत्। अपि वर्ष
सहस्राणां पूजायाः फलमाप्नुयात्। भूर्ज्जे विलिख्य गुटि
कां स्वर्णस्थां धारयेद्यदि। कंठे वा दक्षिणे बाहौ नरसिंहो
भवेत् स्वयं। योषिद्वामभुजे चैव पुरुषो दक्षिणे करे। बिभृ
यात् कवचं पुण्यं सर्व्वसिद्धियुतो भवेत्। काकवन्ध्या च
या नारी मृतवत्सा च या भवेत्। जन्मवन्ध्या नष्टपुत्रा
बहुपुत्रवती भवेत्। कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः
त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत्। भूत प्रेत-पि
शाचाश्च राक्षसा दानवाश्च ये। तं दृष्ट्वा प्रपलायंते देशा
द्देशांतरं ध्रुवं। यस्मिन् गेहे च कवचं ग्रामे वा यदि ति
ष्ठति। तं देशंतु परित्यज्य प्रयांति चातिदूरतः। इति ब्र
ह्मसंहितायां त्रैलोक्यविजयं नाम नृसिंहकवचं समाप्तं।—

।अथ शिवस्तोत्रं। धरापोऽग्निमरुद्व्योममखेशेन्द्वर्क
मूर्त्तये। सर्व्वभूतांतरस्थाय शंकराय नमोनमः। श्रुत्यंतर्गत
वासाय श्रुतये श्रुतजन्मने। अतीन्द्रियाय महसे शाश्वताय
नमोनमः। स्थूलसूक्ष्मविभागाभ्यामनिर्द्देश्याय शम्भवे। भवाय
भवभूताय दुःखहंत्रे नमोऽस्तु ते। तर्कमार्गादिभूताय तपसां

फलदायिने। चतुर्व्वर्ग-वदान्याय सर्व्वज्ञाय नमोनमः। आदिमध्यां
तशून्याय निरस्ताशेषभीतये। योगिध्येयाय महते निर्गुणाय
नमोनमः। विश्वात्मने विचिंत्याय विलसच्चन्द्रमौलये। कन्दर्प
दर्पनाशाय कालहंत्रे नमोऽस्तु ते। विषाशनाय विहरद्वृष
स्कन्धमुपेयुषे। सरिद्धामसमाबद्धकपर्द्दाय नमोनमः।
शुद्धाय शुद्धभावाय शुद्धानामंतरात्मने। पुरांतकाय पूर्ण्णा
य पुण्यनाम्ने नमोनमः। तुष्टाय निजभक्तानां भुक्तिमुक्ति
प्रदायिने। विवाससे निवासाय विश्वशांते नमोनमः।
त्रिमूर्त्तेर्म्मूलभूताय त्रिनेत्रायादिसम्भवे। त्रिधाम्नां धाम
रूपाय जन्मघ्नाय नमोनमः। देवासुरशिरोरत्नकिरणारुणि
तांघ्रये। कांताय निजकांतायै दत्तार्द्धाय नमोनमः। स्तोत्रे
णानेन पूजायां प्रीणयेज्जगतः पतिं। भुक्ति-मुक्तिप्रदं भ
क्त्या सर्व्वज्ञं परमेश्वरं। अस्यासाध्यं त्रिभुवने न किंचिदपि
वर्त्तते। ऐहिकं किं फलं तत्र मुक्तिरेव करे स्थिता। इति
शिवस्तोत्रं समाप्तं॥—

अथ शिवस्य कवचं। भगवन् देवदेवेश सर्व्वाम्नायप्रपूजित
सर्व्वं मे कथितं देव कवचं न प्रकाशितं। प्रासादाख्यस्य मंत्र
स्य कवचं मे प्रकाशय। सर्व्वरक्षाकरं देव यदि स्नेहोऽस्ति
मां प्रति। श्रीभगवानुवाच। प्रासादमंत्रकवचस्य वामदेवऋ
षिः स्मृतः। पङ्क्तिश्छन्दश्च देवेशि सदाशिवोऽत्र देवता। साध
काभीष्टसिद्धौ च विनियोगः प्रकीर्त्तितः। शिरो मे सर्व्वदा पातु
प्रासादाख्यः सदाशिवः। षडक्षरः स्वरूपो मे वदनंतु महेश्वरः
अष्टाक्षरः शक्तिरुद्धश्चक्षुषी मे सदावतु। पंचाक्षरात्मा भग
वान् भुजौ मे परिरक्षतु। मृत्युंजयस्त्रिबीजात्मा आयू रक्ष
तु मे सदा। वटमूलसमासीनो दक्षिणामूर्त्तिरव्ययः। सदा मां
सर्व्वतः पातु षट्त्रिंशार्णस्वरूपधृक्। द्वाविंशार्णात्मकोरुद्रः
कुक्षिं मे परिरक्षतु। त्रिवर्णात्मा नीलकंठः कंठं रक्षतु सर्व्वदा—

चिंतामणि र्वीजरूपोऽर्द्धनारीश्वरोहरः। सदा रक्षतु मे गुह्यं सर्व
सम्पत्प्रदायकः। एकाक्षरस्वरूपात्मा कूटरूपी महेश्वरः। मार्त्त
ण्ड भैरवो नित्यं पादौ मे परिरक्षतु। तुम्बुराख्यो महावीज
स्वरूप-स्त्रिपुरांतकः। सदा मां रणभूमौ च रक्षतु त्रिदशाधि
पः। ऊर्द्ध्वमूर्द्धानमीशानो मम रक्षतु सर्व्वदा। दक्षिणास्यं-त
त्पुरुषोऽव्यान्मे गिरिविनायकः। अघोराख्यो महादेवः पूर्व्व
स्यां परिरक्षतु। वामदेवः पश्चिमस्यां सदा मे परिरक्षतु। उ
त्तरस्यां सदा पातु सद्योजातस्वरूपधृक्। इत्थं रक्षाकरं देवि
कवचं देवदुर्ल्लभं। प्रातःकाले पठेद्यस्तु सोऽभीष्टं फलमा
प्नुयात्। पूजाकाले पठेद्यस्तु कवचं साधकोत्तमः। की
र्त्ति श्रीकांतिमेधायुः सहितो भवति ध्रुवं। कंठे यो धारयेदे
तत् कवचं मत्स्वरूपकं। युद्धे विजयमाप्नोति द्युते वादे च
साधकः। कवचं धारयेद्यस्तु साधको दक्षिणे भुजे। देवा
मनुष्या गन्धर्व्वा वश्यास्तस्य न संशयः। कवचं शिरसा यस्तु
धारयेद्यतमानसः। करस्थास्तस्य देवेशि अणिमाद्यष्टसिद्धयः। भूर्ज्ज
पत्रे त्विमां विद्यां शुक्लपट्टेन वेष्टितां। रजतोदरसंविष्टां कृत्वा च
धारयेत् सुधीः। संप्राप्य महतीं लक्ष्मीमंते मद्रूपधृक्
यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन। शिष्याय भक्ति
युक्ताय साधकाय प्रकाशयेत्। अन्यथा सिद्धिहानिः स्या
त् सत्यमेतन्मनोरमे। तव स्नेहान्महादेवि कथितं कवचं
शुभं। न देयं कस्यचिद्भद्रे यदीच्छेदात्मनो हितं। योऽर्च्च
येद्गन्धपुष्पाद्यैः कवचं मन्मुखोदितं। तेनार्च्चिता महा
देवि सर्व्वे देवा न संशयः। इति भैरवतंत्रे श्रीसदाशिवकवचं
समाप्तं॥

अथ वटुकभैरवस्तोत्रं। कैलासशिखरासीनं देवदेवं जगद्
गुरुं। शंकरं परिपप्रच्छ पार्व्वती परमेश्वरं। श्रीपार्व्वत्युवाच
- भगवन् सर्व्वधर्म्मज्ञ सर्व्वशास्त्रागमादिषु। आपदुद्धारणं
मंत्रं सर्व्वसिद्धिप्रदं नृणां। सर्व्वेषांचैव भूतानां हितार्थं वांछि

तं मया। विशेषतस्तु राज्ञां वै शांतिपुष्टिप्रसाधनं। अंगन्यास
करन्यास वीजन्याससमन्वितं। वक्तुमर्हसि देवेश मम हर्षविव
र्द्धनं। श्रीभगवानुवाच। शृणु देवि महामंत्रमापदुद्धारहेतुकं
सर्व्वदुःखप्रशमनं सर्व्वशत्रुनिवर्हणं। अपस्मारादिरोगाणां ज्वरादी
नां विशेषतः। नाशनं स्मृतिमात्रेण मंत्रराजमिमं प्रिये। ग्रहराजभ
यानांच नाशनं सुखवर्द्धनं। स्नेहाद्वक्ष्यामि ते मंत्रं सर्व्वसारमिमं
प्रिये। सर्व्वकामार्थदं मंत्रं राज्यभोगप्रदं नृणां। आपदुद्धारणं
मंत्रं वक्ष्यामीति विशेषतः। प्रणवं पूर्व्वमुच्चार्य्य देवीप्रणवमु
द्धरेत्। वटुकायेति वै पश्चादापदुद्धारणाय च। कुरुद्वयं त
तः पश्चाद्वटुकाय पुनः क्षिपेत्। देवीप्रणवमुद्धृत्य मंत्रोद्धार
मिमं प्रिये। मंत्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्ल्लभं। अप्र
काश्यमिमं मंत्रं सर्व्वशक्तिसमन्वितं। स्मरणादेव मंत्रस्य भूत
प्रेतपिशाचकाः। विद्रवंति भयार्त्ता वै कालरुद्रादिव प्रजाः
पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकं। नाग्निचौरभयं वा
पि ग्रहराजभयं तथा। न च मारीभयं तस्य सर्व्वत्र सुखवा
न् भवेत्। आयुरारोग्यमैश्वर्य्यं पुत्रपौत्रादिसम्पदः।
भवंति सततं तस्य पुस्तकस्यापि पूजनात्। श्रीपार्व्वत्युवा
च। य एष भैरवो नाम आपदुद्धारको मतः। त्वयाच
कथितो देव भैरवः कल्प उत्तमः। तस्य नामसहस्राणि
अयुतान्यर्बुदानि च। सारमुद्धृत्य तेषां वै नामाष्टशत
कं वद। श्रीभगवानुवाच। यस्तु संकीर्त्तयेदेतत् सर्व्वदुष्टनि
वर्हणं। सर्व्वान् कामानवाप्नोति साधकः सिद्धिमेव च। शृणु
देवि प्रवक्ष्यामि भैरवस्य महात्मनः। आपदुद्धारकस्येह
नामाष्टशतमुत्तमं। सर्व्वपापहरं पुण्यं सर्व्वापद्विनिवारकं। स
र्व्वकामार्थदं देवि साधकानां सुखावहं। देहांगन्यासनं चैव
पूर्व्वं कुर्य्यात् समाहितः। भैरवं मूर्ध्नि विन्यस्य ललाटे
भीमदर्शनं। अक्ष्णोर्भूताश्रयं न्यस्य वदने तीक्ष्णदर्शनं। क्षेत्र
पं कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत्। क्षेत्राख्यं नाभिदेशे

नु कस्यां सर्व्वाघनाशनं। त्रिनेत्रं भ्रुवोर्व्विन्यस्य जंघयोरक्त
पाणिकं। पादयोर्द्देवदेवेशं सर्व्वांगे वटुकं न्यसेत्।। एवं न्यास
विधिं कृत्वा तदनंतरमुत्तमं। नामाष्टशतकस्यापि छन्दो
ऽनुष्टुबुदाहृतं। बृहदारण्यको नाम ऋषिश्च परिकीर्त्तितः
देवता कथिता चेह सद्भिर्व्वटुकभैरवः। भैरवो भूतनाथश्च
भूतात्मा भूतभावनः। क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो
विराट्। श्मशानवासी मांसाशी खर्पराशी मखांतकृत्।। रक्तपः
प्राणपः सिद्धः सिद्धिदः सिद्धसेवितः। करालः कालशम
नः कलाकाष्ठातनुः कविः। त्रिनेत्रो बहुनेत्रश्च तथा पिंगल
लोचनः। शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः।
अभीरु भैरवो भीमो भूतपो योगिनीपतिः। धनदो धनहा
री च धनपः प्रतिभाववान्।। नागहारो नागकेशो व्योमके
शः कपालभृत्।। कालः कपालमाली च कमनीयः कला
निधिः। त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपात्।।
त्रिवृत्तनयनो डिम्भः शांतः शांतजनप्रियः। वटुको व
टुकेशश्च खट्वांगवरधारकः। भूताध्यक्षः पशुपतिर्भि
क्षुकः परिचारकः। धूर्त्तो दिगम्बरः शौरिर्हरिणः पाण्डु
लोचनः। प्रशांतः शांतिदः शुद्धः शंकरः प्रियबान्धवः
अष्टमूर्त्तिर्निधीशश्च ज्ञानचक्षुस्तपोमयः।। अष्टाधारः क
लाधारः सर्पयुक्तः शशीशिखः। भूधरो भूधराधीशो भूपति
र्भूधरात्मकः। कंकालधारी मुण्डी च नागयज्ञोपवीतवान्
जृम्भणो मोहनस्तम्भी मारणः क्षोभणस्तथा। शुद्धनीलां
जनप्रख्यदेहो मुण्डविभूषितः। बलिभुक् बलिभूतात्मा
कामी कामपराक्रमः। सर्व्वापत्तारको दुर्गो दुष्टभूतनिषे
वितः। कामी कलानिधिः कांतः कामिनीवशकृद्वशी।सर्व्व
सिद्धिप्रदो वैद्यः प्रभविष्णुः प्रभाववान्।। अष्टोत्तरशतं
नाम भैरवस्य महात्मनः। मया ते कथितं देवि रहस्यं सर्व्व
कामिकं। य इदं पठते स्तोत्रं नामाष्टशतमुत्तमं। न तस्य दुरितं

किंचिन्न रोगेभ्यो भयं तथा। न शत्रुभ्यो भयं किंचित्
प्राप्नोति मानवः क्वचित्।। पातकानां भयं नैव पठेत् स्तोत्रमन
न्यधीः। मारीभये राजभये तथा चौराग्निजभये। औत्पातिके
महाघोरे तथा दुःस्वप्नजे भये। बन्धने च महाघोरे पठेत्
स्तोत्रं समाहितः। सर्व्वे प्रशमनं यांति भयाद् भैरवकीर्त्तनात्
एकादश सहस्रंतु पुरश्चरणमिष्यते। त्रिसन्ध्यं यः पठेद्देवि
सम्वत्सरमतन्द्रितः। स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि
मानवः। षण्मासाद्भूमिकामस्तु स जप्त्वा लभते महीं।राजा
शत्रुविनाशाय जपेन्मासाष्टकं पुनः। रात्रौ वारत्रयंचैव नाश
यत्येव शात्रवान्।। जपेन्मासत्रयं रात्रौ राजानं वशमानयेत्
धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः। पठेद्वारत्रयं
यद्वा वारमेकं तथा निशि। धनं पुत्रांस्तथा दारान् प्राप्नुया
न्नात्र संशयः। भीतो भयात् प्रमुच्येत देवि सत्यं न संशयः
यान् यान् समीहते कामान् तांस्तान् प्राप्नोति नित्यशः।।अप्र
काश्यमिदं गुह्यं न देयं यस्य कस्यचित्।। सुकुलीनाय शां
ताय ऋजवे दम्भवर्ज्जिते। दद्यात् स्तोत्रमिदं पुण्यं सर्व्वकाम
फलप्रदं। ध्यानं वक्ष्यामि देवस्य यथा ध्यात्वा पठेन्नरः। शुद्ध
स्फटिकसंकाशं सहस्रादित्यवर्च्चसं। अष्टबाहुं त्रिनयनं चतुर्ब्बा
हुं द्विबाहुकं। भुजंगमेखलं देवमग्निवर्णशिरोरुहं। दिगम्बं
कुमारीशं वटुकाख्यं महाबलं। खट्वांगमसिपाशंच शूलंचैव
तथा पुनः। डमरुंच कपालंच वरदं भुजगं तथा। नीलजी
मूतसंकाशं नीलांजनसमप्रभं। दंष्ट्राकरालवदनं नूपुरांगसं
कुलं। आत्मवर्णसमोपेतं सारमेयसमन्वितं। ध्यात्वा जपेत् सु
संहृष्टः सर्व्वान् कामानवाप्नुयात्।। एतत् श्रुत्वा ततो देवी नामा
ष्टशतमुत्तमं। भैरवाय प्रहृष्टाभूत् स्वयंचैव महेश्वरी। इति
विश्वसारोद्धारे आपदुद्धारकल्पे वटुकभैरवस्तवराजः समाप्तः।

।अथ भैरवीस्तोत्रं। स्तुत्यानया त्वां त्रिपुरे स्तोष्येऽभीष्टफलाप्तये।
यया व्रजंति तां लक्ष्मीं मनुजाः सुरपूजितां। ब्रह्मादयः स्तुति
शतैरपि सूक्ष्मरूपां जानंति नैव जगदादिमनादिमूर्त्तिं। तस्माद्वयं
कुचनतां नवकुंकुमाभां स्थूलां स्तुमः सकलवाङ्मयमातृभूतां
सद्यः समुद्यत सहस्रदिवाकराभां विद्याक्षसूत्र वरदाभयचिह्न
हस्तां। नेत्रोत्पलैस्त्रिभिरलंकृतवक्त्रपद्मां त्वां तारहाररुचिरां
त्रिपुरे भजामः। सिन्दूरपूररुचिरं कुचभारनम्रं जन्मांतरेषु कृत
पुण्यफलैकगम्यं। अन्योन्यभेदकलहाकुलमानसास्ते जानंति
किं जडधियस्तव रूपमम्ब। स्थूलां वदंति मुनयः श्रुतयो गृणंति
सूक्ष्मां वदंति वचसामधिवासमन्ये। त्वां मूलमाहुरपरे जगतां
भवानि मन्यामहे वयमपारकृपाम्बुराशिं। चन्द्रावतंसकलितां
शरदिन्दुशुभ्रां पंचाशदक्षरमयीं हृदि भावयंति। त्वां पुस्तकं
जपवटीममृताढ्यकुम्भं व्याख्यां च हस्तकमलैर्दधतीं त्रिने
त्रां। शम्भुस्त्वमद्रितनया कलितार्द्धभागो विष्णुस्त्वमम्ब कम
लापरिबद्धदेहः। पद्मोद्भवस्त्वमसि वागधिवासभूमिस्तेषां
क्रियाश्च जगति त्रिपुरे त्वमेव। आश्रित्य वाग्भव भवांश्चतुरः
पराद्यान् भावान् पदेषु विहितान् समुदीरयंती। कंठादिभिश्च
करणैः परदेवतां । त्वां संविन्मयीं हृदि कदापि न विस्मरामि
आकुंच्य वायुमवजित्य च वैरिषट्कमालोक्य निश्चलधिया
निजनासिकाग्रं। ध्यायंति मूर्ध्नि कलितेन्दुकलावतंसं तद्रूप
मद्यकृतिनस्तरुणार्कमित्रं। त्वं प्राप्य मन्मथरिपोर्वपुर
र्द्धभागं सृष्टिं करोषि जगतामिति वेदवादः। सत्यं तदद्रित
नये जगदेकमातर्नो चेदशेषजगतः स्थितिरेव न स्यात्। पूजां
विधाय कुसुमैः सुरपादपानां पीठे तवाम्ब कनकाचलगह्व
रेषु। गायंति सिद्धवनिताः सह किन्नरीभिरास्वादितासवर
सारुणनेत्रपद्माः। विद्युद्विलासवपुषः श्रियमुद्वहंतीं यांतीं
स्ववासभवनाच्छिवराजधानीं। सौसुषुम्नकमलानि विकाश
यंतीं देवीं भजे हृदि परामृतसिक्तगात्रीं। आनन्दजन्मभव
नं भवनं श्रुतीनां चैतन्यमात्रतनुमुग्धतराश्रयामि। ब्रह्मे

शविष्णुभिरुपासित पादपद्मां सौभाग्यजन्मवसतिं त्रिपुरे यथा
वत्। शब्दार्थभावि भुवनं सृजतीन्दुरूपा मातर्बिभर्त्ति पुनरर्क
तनुं स्वशक्त्या। वह्न्यात्मिका हरति तत् सकलं युगांते तां
शारदां मनसि जातु न विस्मरामि। नारायणीति नरकार्णवता
रिणीति गौरीति खेदशमनीति सरस्वतीति। ज्ञानप्रदेति न
यनत्रयभूषितेति त्वामद्रिराजतनये बहुधा भजंति। ये स्तु
वंति जगन्मातः श्लोकैर्द्वादशभिः क्रमात्। त्वामथ प्राप्य वा
क्सिद्धिं प्राप्नुयुस्ते परां गतिं। इति भैरवीस्तवराजः समाप्तः
।अथास्याः कवचं। देव्युवाच। भैरव्याः सकला विद्याः
श्रुताश्चाधिगता मया। साम्प्रतं श्रोतुमिच्छामि कवचं यत्
पुरोदितं। त्रैलोक्यविजयं नाम शस्त्रास्त्रविनिवारकं। त्वत्तः
परतरो नाथ कः कृपां कर्त्तुमर्हति। ईश्वर उवाच। शृणु पार्व
ति वक्ष्यामि सुन्दरि प्राणवल्लभे। त्रैलोक्यविजयं नाम कवचं
मंत्रविग्रहं। पठित्वा धारयित्वेदं त्रैलोक्यविजयी भवेत्। जघान
सकलान् दैत्यान् यद्धृत्वा मधुसूदनः। ब्रह्मा सृष्टिं वितनुते
यद्धृत्वाभीष्टसिद्धयः। धनाधिपः कुबेरोपि वासवस्त्रिदशेश्वरः
यस्य प्रसादादीशोऽहं त्रैलोक्यविजयी भुवि। न देयं परशिष्ये
भ्योऽसाधकेभ्यः कदाचन। पुत्रेभ्यः किमुतान्येभ्यो दत्त्वा मृत्यु
मवाप्नुयात्। भैरव्याः कवचस्य ऋषिर्दक्षिणामूर्त्तिरेव च।
विराट् छन्दो जगद्धात्री देवता बालभैरवी। धर्मार्थकाममो
क्षेषु विनियोगः प्रकीर्त्तितः। अधरोबिन्दुमालाढ्यः कामः
शक्री शशीयुतः। भृगुर्मनुस्वरयुतः सर्गी बीजत्रयात्मिका।
बालैषा मे शिरः पातु बिन्दुनादयुतापि सा। भालं पातु कुमारी
च सर्गहीना कुमारिका। दृशौ पातु च वाग्बीजं कर्णयुग्मं सदावतु
कामबीजं सदा पातु घ्राणयुग्मं परावतु। सरस्वतीप्रदा बालाजिह्वां
पातु शुचिप्रभा। हस्रैं हसकलरीं स्कन्धौ पातु हस्रौं भुजौ। पंच
मी भैरवी पातु करौ हसैं सदावतु। हृदयं सकलरीं वक्षः पातु
हस्रौः स्तनौ। पातु मां भैरवी देवी चैतन्यरूपिणी मम। हसैं
पातु सदा पार्श्वयुग्मं सकलरीं सदा। कुक्षिं पातु हसौर्मध्यं

भैरवी भुवि दुर्लभा। ऐँ ईँ औँ मे मध्यदेशं बीजविद्या सदावतु
हसैं पृष्ठं सदा पातु नाभिं सकलरीं तथा। पातु हसौः कटीदेशं
षट्कूटा भैरवी मम। हसरैं शक्तिथनी पातु हसकलरीं सदाव
तु। गुह्यदेशं हसौः पातु जानुनी भैरवी मम। सम्प्रत प्रदास
दापातु जंघे हसकलरीं पदं। पातु हसौः सर्वदेहं भैरवीसर्व
दावतु। हसैं मामवतु प्राच्यां हसकलरीं पावकेऽवतु। ह
सौः। मे दक्षिणे पातु भैरवी चक्रमास्थिता। ह्रैँ ह्लीँ ह्लूँ मां
सदा पातु नैरृत्यां चक्रभैरवी। सौः हसकल ह्रीं हसरौः
पश्चिमे पातु भैरवी। क्रौँ क्रौँ क्रौँ पातु वायव्यां हुँ हुँ पातु
सदोत्तरे। ह्रौँ ह्रौँ पातु सदैशान्ये दक्षिणे कालिकेऽवतु।
ऊर्ध्वं प्रागुक्तबीजानि रक्षंतु मामधःस्थले। दिग्विदिक्षु
स्वाहा पातु कालिका खड्गधारिणी। ॐ ह्रीँ स्त्रीँ हुँ फट् सा
तारा सर्वत्र मां सदावतु। संग्रामे कानने दुर्गे तोये तरंग
दुस्तरे। खड्गकर्त्तृधरा सोग्रा सदा मां परिरक्षतु। इति ते क
थितं देवि सारात् सारतरं महत्। त्रैलोक्यविजयं नाम कवचं
परमाद्भुतं। यः पठेत् प्रयतो भूत्वा पूजायाः फलमाप्नुयात्
स्पर्धामूधूय भवने लक्ष्मीर्वाणी वसेत्ततः। यः ~~पठेत् प्रय~~
~~तो भूत्वा~~ यत्रुभीतो रणे कानने वा भीतो वने वा सलिला
लये वा। वादे सभायां प्रतिवादिनो वा राज्ञः प्रकोपात्
ग्रहसंकुलाद्वा। प्रचण्डवाताद्यमनाच्च भीतो गुरोः प्रकोपा
दपि कृच्छ्रसाध्यात्। अभ्यर्च्य देवीं प्रपठेत्त्रिसन्ध्यं स
स्यात्महेशप्रतिमो जयी च। त्रैलोक्यविजयं नाम कवचं
मन्मुखोदितं। विलिख्य भूर्जे गुलिकां स्वर्णस्थां धारयेद्
यदि। कंठे वा दक्षिणे बाहौ त्रैलोक्यविजयी भवेत्। तद्गात्रं
प्राप्य शस्त्राणि भवंति कुसुमानि च। लक्ष्मीः सरस्वती तस्य
निवसेद्भवने सुखे। एतत् कवचमज्ञात्वा यो जपेत् भैरवीं प
रां। बालां वा प्रजपेद्विद्वां दरिद्रो मृत्युमाप्नुयात्। इति रुद्र
जामले देवीश्वरसंवादे त्रैलोक्यविजयं नाम भैरवीकवचं समा
प्तः॥ —

।अथ श्रीविद्यास्तोत्रं। कल्याणवृष्टिभिरिवामृतपूरिताभिर्लक्ष्मीः
स्वयंवरणमंगलदीपिकाभिः। सेवाभिरम्ब तव पादसरोजमू
ले नाकारि किं मनसि भक्तिमतां जनानां।१। एतावदेव जननि
स्पृहनीयमास्ते त्वद्वन्दनेषु सलिलस्थ-सरोजनेत्रे। सान्निध्य
मुद्यदरुणाम्बुज सोदरस्य त्वद्विग्रहस्य सुधया परयाप्लुतस्य
।२। ईषत् स्वभावकलुषाः कति नाम संति ब्रह्मादयः प्रतिदिनं
प्रलयाभिभूताः। एकः स एव जननि स्थिरसिद्धिरास्ते यः पाद
योस्तव सकृत् प्रणतिं करोति।३। लब्ध्वा सकृत्त्रिपुरसुन्दरि ता
वकीनं कारुण्यकन्दलितकांतिभरं कटाक्षं। कन्दर्पभावसुभ
गास्त्वयि भक्तिभाजः संमोहयंति तरुणीर्भुवनत्रयेऽपि।४।
ह्रीँकारमेव तव नाम गृणन्ति देवा मातस्त्रिकोणनिलये त्रिपुरे
त्रिनेत्रे। त्वत्संस्मृतौ यमभटाभिभवं विहाय दीव्यंति न
न्दनवने सह लोकपालैः।५। हंतुः पुरामधिगलं परिपूर्य
मानः क्रूरः कथं न भविता पवनस्य वेगः। नाश्वासनाय
यदि मातरिदं तवार्धं देहस्य शश्वदमृताप्लुत शीतलस्य
।६। सर्वज्ञतां सदसि वाक्पटुतां प्रसूते देवि त्वदंघ्रि-सरसी
रुहयोः प्रणामः। किंच स्फुरन्मुकुटमुज्ज्वलमातपत्रं द्वे चाम
रे च महतीं वसुधां ददाति।७। कल्पद्रुमैरभिमत-प्रतिपाद
नेषु कारुण्य-वारिधिभिरम्ब भवत्कटाक्षैः। आलोकय त्रिपु
रसुन्दरि मामनाथं त्वय्येव भक्तिभरितं त्वयि बद्धदृष्टिं।८।
हंतेतरेष्वपि निधाय मनांसि चान्ये भक्तिं वहंति किल पामर
दैवतेषु। त्वामेव देवि मनसाहमनुस्मरामि त्वामेव नौमि श
रणं जननि त्वमेव।९। लक्षेषु सत्स्वपि तवाक्षि विलोकनाना
मालोकय त्रिपुरसुन्दरि मां कथंचित्। नूनं मया च सदृशं
करुणैकपात्रं जातो जनिष्यति जनो च जायते वा।१०। ह्रीँ
ह्रीमिति प्रतिदिनं जपतां तवाख्यं किं नाम दुर्लभमिह त्रिपुरा
धिवासे। मालाकिरीटमदवारण-माननीयां तान् सेवते मधु
मती स्वयमेव लक्ष्मीः।११। सम्पत्कराणि सकलेन्द्रिय-नन्दनानि
साम्राज्यदानकुशलानि सरोरुहाक्षि। त्वद्वन्दनानि दुरिताहरणे

यतानि मामेव मातरनिशं कलयंतु नान्यं।१२। कल्पोपसंहरण
कल्पित ताण्डवस्य देवस्य खण्डपरशोः परभैरवस्य। पाशांकु
शैक्षर शरासन पुष्पबाण सा साक्षिणी विजयते भवमूर्त्ति
रेका।१३। लग्नं सदा भवतु मातरिदं त्वदीयं तेजः परं वहल
कुंकुम पंकशोणं। भास्वत्किरीटमभृतांशुकलावतंशं रूपं
त्रिकोणमुदितं परमामृताक्तं।१४। ह्रींकार त्रय संपुटेन महता
मंत्रेण संदीपितं स्तोत्रं यः प्रतिवासरं तव पुरो मातर्जपेन्मं
त्रवित्। तस्य क्षौणिभुजो भवंति वशगा लक्ष्मीश्चिरस्थायि
नी वाणी निर्म्मलमुक्तिभावभविता जागर्त्ति दीर्घं यशः। इति
श्रीकल्याणीस्तोत्रं समाप्तं॥—

अथ किंकिनीस्तोत्रं। किं किं दुःखं सकलजननि क्षीयते न स्मृ
तायां का का कीर्त्तिः कुलकमलिनि प्राप्यते नार्च्चितायां
किं किं सौख्यं सुरवरनुते प्राप्यते न स्तुतायां कं कं योगं
त्वयि न तनुते चित्तमालम्बितायां। स्मृता भव भयं हंसि पू
जितासि शुभंकरि। स्तुता त्वं वांछितं देवि ददासि करुणाकरे
परमानन्द बोधाब्धि रूपे तेजः स्वरूपिणि। देव वृन्दशिरोरत्ननि
घृष्ट चरणाम्बुजे। चिद्विभ्रान्ति महासत्ता मात्रे मात्रे नमोऽ
स्तु ते। सृष्टिस्थित्युपसंहार-हेतुभूते सनातनि। गुणत्रया
त्मिकासि त्वं जगतः कारणेच्छया। अनुग्रहाय भूतानां गृही
तदिव्यविग्रहे। भक्तस्य मे नित्यपूजायुक्तस्य परमेश्वरि। देहि
कामुष्मिकीं सिद्धिं देहि त्रिदशवन्दिते। तापत्रय परिम्लानमा
जनं त्राहि मां शिवे। नान्यं वदामि न शृणोमि न चिन्तयामि
नान्यं स्मरामि न भजामि न चाश्रयामि। त्यक्ता त्वदीयचर
णाम्बुजमादरेण मां त्राहि देवि कृपया मयि देहि सिद्धिं। अज्ञा
नाद्वा प्रमादाद्वा वैकल्यात् साधनस्य च। यन्न्यूनमतिरिक्तं
वा तत्सर्वं क्षन्तु मर्हसि। द्रव्यहीनं क्रियाहीनं श्रद्धामंत्रवि
वर्ज्जितं। तत्सर्वं कृपया देवि क्षमस्व त्वं दयानिधे। यन्मया
क्रियते कर्म्म तन्महत्स्वल्पसेवया। तत्सर्वंच जगद्धात्रि क्षंत
व्य मयमंजलिः। इति किंकिनीस्तोत्रं समाप्तं॥—

अथ श्रीविद्याकवचं। देव्युवाच। देव देव महादेव भक्तानां
प्रीतिवर्द्धनं। सूचितं यन्महादेव्याः कवचं कथयस्व मे। श्रीम
हादेव उवाच। शृणु देवि प्रवक्ष्यामि कवचं मंत्र विग्रहं। अप्र
काश्यं परं गुह्यं सकलाभीष्टसिद्धिदं। कवचस्य ऋषिर्द्देवि
दक्षिणामूर्त्तिरव्ययः। छन्दः पङ्क्तिः समुद्दिष्टं देवी त्रिपुरसु
न्दरी। धर्म्मार्थकाममोक्षाणां विनियोगश्च साधने। वाग्भवं
कामराजंच शक्तिबीजं सुरेश्वरि। वाग्भवः पातु शीर्षे मां
कामराजस्तथा हृदि। शक्तिबीजं सदा पातु नाभौ गुह्ये च
पादयोः। ऐं क्लीं सौः वदने पातु वाला मां सर्व्वसिद्धये। हसैं
हसकलरीं हसौः पातु भैरवी कंठदेशतः। सुन्दरी नाभि
देशेऽव्याच्छीर्षे कामकला सदा। भ्रूनासयोरंतराले महा
त्रिपुर सुन्दरी। ललाटे सुभगा पातु भगा मां कंठदेशतः
भगोदया तु हृदये उदरे भगसर्पिणी। भगमाला नाभि
देशे लिंगे पातु मनोभवा। गुह्ये पातु महादेवी राजराजे
श्वरी शिवा। चैतन्यरूपिणी पातु पादयोर्ज्जगदम्बिका।
नारायणी सर्व्वगात्रे सर्व्वकार्य्ये शुभंकरी। ब्रह्माणी पातु
मां पूर्व्वे दक्षिणे वैष्णवी तथा। पश्चिमे पातु वाराही उत्तरे
तु महेश्वरी। आग्नेय्यां पातु कौमारी महालक्ष्मीश्च नैर्ऋते
वायव्यां पातु चामुण्डा इन्द्राणी पातु ईशके। जले पातु
महामाया पृथिव्यां सर्व्वमंगला। आकाशे पातु वरदा स
र्व्वत्र भुवनेश्वरी। इदंतु कवचं देव्या देवानामपि दुर्ल्लभं
पठेत् प्रातः समुत्थाय शुचिः प्रयतमानसः। नाधयो व्या
धयस्तस्य न भयंच क्वचिद्भवेत्। नच मारीभयं तस्य
पातकानां भयं तथा। न दारिद्र्यवशं गच्छेत्तिष्ठेन्मृत्यु
वशे नच। गच्छेच्छिवपुरं देवि सत्यं सत्यं वदामि ते।
इदं कवचमज्ञात्वा श्रीविद्यां यो जपेत् प्रिये। स नाप्नोति
फलं तस्य प्राप्नुयाच्छस्त्रघातनं। इति सिद्धयामले श्री
विद्याकवचं समाप्तं॥—

अथ महात्रिपुरसुन्दरीकवचं। देव्युवाच। भगवन् देवदेवेश
लोकानुग्रहकारक। त्वत्प्रसादान्महादेव श्रुता मंत्रास्त्वनेक
धा। साधनं विविधं देव कीलकोद्धारणं तथा। शापादि
दूषणोद्धारः श्रुतस्तत्रो मया प्रभो। राजराजेश्वरीदेव्याः क
वचं सूचितं मयि। श्रोतुमिच्छामि तत्तत्त्वतः कथयस्व मयि
प्रभो। यत् पृष्टं त्रिपुरानाथ किमर्थं न प्रकाशितं। राजरा
जेश्वरीदेव्या स्त्रिपुरायाः सुखावहं। कवचं यदि मे प्रीतः
कथयस्व मयि प्रभो। ईश्वर उवाच। लक्षवारसहस्राणि वा
रितासि पुनः पुनः। स्त्रीस्वभावात् पुनर्देवि पृच्छसि त्वं
मयि प्रिये। अत्यंतगुह्यं कवचं सर्वकामफलप्रदं। प्रीतये
तव देवेशि कथयामि शृणुष्व तत्। अस्य राजराजेश्वरीश्री
महात्रिपुरसुन्दरीषोडशीविद्याकवचस्य महादेव ऋषिः
प्रस्तारपङ्क्तिश्छन्दो राजराजेश्वरी महात्रिपुरसुन्दरी देवता
पुरुषार्थसाधने विनियोगः। पूर्वे मां भैरवी पातु बाला
मां पातु दक्षिणे। मालिनी पश्चिमे पातु वासिनी तूत्तरेऽवतु
ऊर्ध्वं पातु महादेवी महात्रिपुरसुन्दरी। अधस्तात् पातु दे
वेशि पातालतलवासिनी। आधारे वाग्भवः पातु कामराज
स्तथा हृदि। डामरः पातु मां नित्यं मस्तके सर्वकामदः।
ब्रह्मरन्ध्रे सर्वगात्रे छिद्रस्थाने च सर्वदा। महाविद्या भग
वती पातु मां परमेश्वरी। ऐँ क्लीं ललाटे मां पायात् ह्री
ब्लूँ सः पातु नेत्रयोः। नासायां कर्णयोश्चैव ह्रैं ह्रौं ह्रौं चिबु
के तथा। सौः पातु च गले हसक्लीं हृदये नाभिदेशके।
कलह्रीं क्लीं गुह्यदेशे सह्रींच पातु पादयोः। स क्लीं मां
सर्वतः पातु कलह्रीं पातु सन्धिषु। जले स्थले तथाकाशे
दिक्षु राजगृहे तथा। हूँ दे मां त्वरिता पातु सह्रीं सक्लीं
मनोभवा। हसः पायान्महादेवी परं निष्कलदेवता। विजया
मंगला दूती कल्याणी भगमालिनी। ज्वाला च मालिनी
नित्या सर्वदा पातु मां शिवा। इत्येवं कवचं देवि देवानामपि

दुर्लभं। तव प्रीत्या मया ख्यातं गोपनीयं प्रयत्नतः। इदं रहस्यं
परमं गुह्याद्गुह्यतरं प्रिये। धनं यशस्यमायुष्यं भोगमो
क्षप्रदं शिवं। दुःस्वप्ननाशनं पुंसां नरनारीवशंकरं। आकर्ष
णकरं देवि स्तम्भोच्चाटकरं शिवे। इदं कवचमज्ञात्वा राजरा
जेश्वरीं शिवां। योऽर्चयेद् योगिनीवृन्दैः स भक्तो नात्र संशयः
न तस्य मंत्रसिद्धिः स्यात् कदाचिदपि शांकरि। इहलोके च
दारिद्र्यं रोगदुःखभयानि च। परत्र नरकं गत्वा पशुयोनि
मवाप्नुयात्। तस्मादेतत् सदाभ्यस्येदधिकारी भवेन्नतः।
मद्वक्त्रनिर्गतमिदं कवचं सुपुण्यं पूजाविधेश्च पुरतो विधि
ना पठेद्यः। सौभाग्यभोगललितानि शुभानि भुक्त्वा देव्याः
पदं भजति तत् पुनरंतकाले। इति कुलानन्दसंहितायां श्री
त्रिपुरसुन्दरी षोडशीविद्याकवचं समाप्तं॥—

अथ प्रचण्डचण्डिकास्तोत्रं। नाभौ शुद्धसरोजवक्त्रवि
लसद्बन्धूकपुष्पारुणं भास्वद्भास्करमण्डलं तदुदरे तद्यो
निचक्रं महत्। तन्मध्ये विपरीतमैथुनरतप्रद्युम्नतत्कामि
नीपृष्ठस्थां तरुणार्ककोटिविलसत्तेजःस्वरूपां शिवां।
वामे छिन्नशिरोधरां तदितरे पाणौ महत्कर्त्रिकां प्रत्या
लीढपदां दिगंतवसनामुन्मुक्तकेशव्रजां। छिन्नात्मीयशि
रः समुल्लसदसृग्धारां पिबंती परां बालादित्यसमप्रका
शविलसन्नेत्रत्रयोद्भासिनीं। वामादन्यत्र नालं बहुबहल
गलद्रक्तधाराभिरुच्चैः पायंतीमस्थिभूषां करकमललस
त्कर्त्रिकामुग्ररूपां। रक्तामारक्तकेशीमपगतवसनां वर्णि
नीमात्मशक्तिं प्रत्यालीढोरुपादामरुणिततनयनां योगिनीं
योगनिद्रां। दिग्वस्त्रां मुक्तकेशीं प्रलयघनघटाघोररूपां
प्रचण्डां दंष्ट्रादुष्प्रेक्ष्यवक्त्रोदरविवरलसल्लोलजिह्वाग्रभासां
विद्युल्लोलाक्षियुग्मां हृदयतटलसद्भोगिभीमां सुमूर्तिं
सद्यश्छिन्नात्मकंठप्रगलितरुधिरैर्डाकिनीं वर्धयंतीं। ब्रह्मे

शानाच्युताद्यैः शिरसि विनिहितामन्दपादारविन्दैरात्मज्ञैर्यो
गिमुख्यैः प्रतिदिनमनिशं चिंतिताचिंत्यरूपां। संसारे सार
भूतां त्रिभुवनजननीं छिन्नमस्तां प्रशस्तामिष्टां तामिष्टदा
त्रीं कलिकलुषहरां चेतसा चिंतयामि। उत्पत्तिस्थितिसंहृ
तीर्घटयितुं धत्ते त्रिरूपां तनुं त्रैगुण्याज्जगतो मदीयविकृ
ति ब्रह्माच्युतः शूलभृत्। तामाद्यां प्रकृतिं स्मरामि मनसा स
र्वार्थसंसिद्धये यस्याः स्मेरपदारविन्दयुगले लाभं भजंतेऽम
राः। शालिपिशितपरस्त्रीयोगपूजापरोऽहं बहुविधजडभावार
म्भसम्भावितोऽहं। पशुजनविरतोऽहं भैरवीसंस्थितोऽहं गुरुचरण
परोऽहं भैरवोऽहं शिवोऽहं। इदं स्तोत्रं महापुण्यं ब्रह्मणा भाषि
तं पुरा। सर्वसिद्धिप्रदं साक्षान्महापातकनाशनं। यः पठेत्
प्रातरुत्थाय देव्याः सन्निहितोपि वा। तस्य सिद्धिर्भवेद्देवि
वांछितार्थप्रदायिनी। धनं धान्यं सुतं जायां हयं हस्तिन
मेव च। वसुन्धरां महाविद्यामष्टमुण्डावलीमण्डिते। कर्त्री
कुन्दरुचिं विचित्ररचितां ज्ञानं दधाने पदे मातर्भक्तजनानुक
म्पित महामायेऽस्तु तुभ्यं नमः। इति प्रचण्डचण्डिकास्तोत्रं समाप्तं।

अथ प्रचण्डचण्डिकाकवचं। देव्युवाच। कथिता
छिन्नमस्तायाः या या विद्याः सुगोपिताः। त्वया नान्येन जी
वेश श्रुतास्ताश्चाधिगता मया। इदानीं श्रोतुमिच्छामि कवचं
पूर्वसूचितं। त्रैलोक्यविजयं नाम कवचं कथ्यतां प्रभो।
भैरव उवाच। शृणु वक्ष्यामि देवेशि सर्वदेवनमस्कृते। त्रैलो
क्यविजयं नाम कवचं सर्वमोहनं। सर्वविद्यामयं साक्षात्
सुरासुरजयप्रदं। धारणात् पठनादीशा त्रैलोक्यविजयी वि
भुः। ब्रह्मा नारायणो रुद्रो धारणात् पठनाद्यतः। कर्त्ता
पाता च संहर्त्ता भुवनानां सुरेश्वरि। न देयं परशिष्येभ्यो
ह्यभक्तेभ्यो विशेषतः। देयं शिष्याय भक्ताय प्राणेभ्यो
ऽप्यधिकाय च। देव्याश्च छिन्नमस्तायाः कवचस्य च भैरवः
ऋषिर्विराट् छन्दश्च देवता छिन्नमस्तका त्रैलोक्यविजये मुक्तौ

विनियोगः प्रकीर्त्तितः। हुँकारो मे शिरः पातु छिन्नमस्तानलप्रभा
ह्रीँ हुँ ऐँ त्र्यक्षरी पातु भालं वक्त्रं दिगम्बरी। श्रीँ ह्रीँ हुँ ऐँ दृशौ
पातु ~~छिन्नमस्ता~~ मुण्डकर्त्तृधरापि सा। सा विद्या प्रणवाद्यंता
श्रुतियुग्मं सदावतु। वज्रवैरोचनीये हुँ फट् स्वाहा च ध्रुवा
दिका। घ्राणं पातु छिन्नमस्ता स्वमुण्डकर्त्तृधारिणी। श्रीमा
या कूर्च्चवाग्बीजैर्वज्रवैरोचनीये हुँ। हुँ फट् स्वाहा महाविद्या
षोडशी ब्रह्मरूपिणी। स्वपार्श्वे वर्णिकां चासृग्धारां पाययती
मुदा। वदनं सर्वतः पातु छिन्नमस्ता स्वशक्तिका। मुण्डकर्त्तृधरा
रक्ता साधकाभीष्टदायिनी। वर्णिनीडाकिनीयुक्ता सापि माम
भितोऽवतु। रमाद्या पातु जिह्वां च लज्जाद्या पातु कंठकं। कूर्च्चा
द्या हृदयं पातु वागाद्या स्तनयुग्मकं। रमया पुटिता विद्या
पार्श्वौ पातु सुरेश्वरी। मायया पुटिता पातु नाभिदेशं दिग
म्बरी। कूर्च्चेन पुटिता देवी पृष्ठदेशं सदावतु। वाग्बीजपुटिता
चैषा मध्यं पातु सशक्तिका। ईश्वरी कूर्च्चवाग्बीजे वज्रवैरो
चनीये हुँ। हुँ फट् स्वाहा महाविद्या सूर्य्यकोटिसमप्रभा
छिन्नमस्ता सदा पायादूरुयुग्मं सशक्तिका। ह्रीँ हुँ वर्णिनी जा
नुं श्रीँ ह्रीँ हुँ हुँ च डाकिनी पदं। सर्वविद्यास्थिता नित्या स
र्वांगं मे सदावतु। प्राच्यां पायादेकलिंगा योगिनी पावके
ऽवतु। डाकिनी दक्षिणे पातु श्रीमहाभैरवी च मां। नैर्ऋत्यां
सततं पातु भैरवी पश्चिमेऽवतु। इन्द्राक्षी पातु वायव्येऽसि
तांगी पातु चोत्तरे। संहारिणी सदा पातु शिवकोणे सकर्त्तृ
का। इत्यष्टशक्तयः पांतु दिग्विदिक्षु सकर्त्तृकाः। क्रीँ क्रीँ क्रीँ मां
पातु पूर्वे हुँ हुँ मां पातु पावके। ह्रीँ ह्रीँ मां दक्षिणे पातु
दक्षिणे कालिकेऽवतु। क्रीँ क्रीँ क्रीँ चैव नैर्ऋत्यां हुँ हुँ मां
पश्चिमेऽवतु। ह्रीँ ह्रीँ पातु मरुत्कोणे स्वाहा पातु सदोत्तरे
महाकाली खड्गहस्ता रक्षःकोणे सदावतु। तारो माया वधूः
कूर्च्चं फट्कारोऽयं महामनुः। खड्गकर्त्तृधरा तारा चोर्ध्वदेशं

सदावतु। ~~नमो माया वधूः कूर्च्च फट्~~ ह्रीं स्त्रीं हुँ फट् पाताले मां
चैकजटा सती। तारास्त्रा रति तारवेऽव्यान्महानीलसरस्वती। इति ते
कथितं देव्याः कवचं मंत्रविग्रहं। यद्धृत्वा पठनाद्भीमः क्रोधाख्यो
भैरवः प्रभुः। सुरासुरमुनीन्द्राणां कर्त्ता हर्त्ता भवेत् स्वयं। यस्या
ज्ञया मधुमती याति सा साधकांतिकं। भूतिन्याद्याश्च योगिन्यो
यक्षिण्याद्याश्च खेचराः। आज्ञां गृह्णंति तास्तस्य कवचस्य प्रसा
दतः। एतदेव परं ब्रह्म कवचं मन्मुखोदितं। देवीमभ्यर्च्य गन्धा
द्यैर्मूलेनैव पठेत् सकृत्। सम्वत्सर कृतायास्तु पूजायाः फलमा
प्नुयात्। भूर्ज्जे विलिखितं चैव गुलिकां कांचने स्थितां। धारयेद्द
क्षिणे वाहौ कंठे वा यदि वा गतः। सर्व्वैश्वर्य्ययुतो भूत्वा त्रैलोक्यं
वशमानयेत्। तस्य गेहे वसेल्लक्ष्मीर्व्वाणी च वदनाम्बुजे। ब्रह्मा
स्त्रादीनि शस्त्राणि तद्गात्रे यांति सौम्यतां। इदं कवचमज्ञात्वा
यो भजेच्छिन्नमस्तकां। सोऽपि शस्त्रप्रहारेण मृत्युमाप्नोति सत्वरं
इति भैरवतंत्रे छिन्नमस्ताकवचं समाप्तं॥—

अथ श्यामास्तोत्रं। कर्पूरं मध्यमांत स्वरपरिरहितं सेन्दु वामाक्षि
युक्तं वीजंते मातरेतत् त्रिपुरहरवधु त्रिःकृतं ये जपंति। तेषां
गद्यानि पद्यानि च मुखकुहरादुल्लसंत्येव वाचः स्वच्छन्दं
ध्वांतधाराधररुचिरुचिरे सर्व्वसिद्धिं गतानां।१। ईशानः से
न्दुवामश्रवणपरिगतो वीजमन्यन्महेशि द्वन्द्वंते मन्दचेता य
दि जपति जनोवारमेकं कदाचित्। जित्वा वाचामधीशंधन
दमपि चिरं मोहयन्नम्बुजाक्षीवृन्दं चन्द्रार्द्धचूडे प्रभवति
स महाघोरवाणावतंसे।२। ईशो वैश्वानरस्थः शशधर
विलसद्वामनेत्रेण युक्तो वीजंते द्वन्द्वमन्यद्विगलितचिकुरे
कालिके ये जपंति। द्वेष्टारं घ्नंति ते च त्रिभुवनमपि ते
वश्यभावं नयंति सृक्कद्वन्द्वास्रधाराद्वयधरवदने दक्षिणे का
लिकेति।३। ऊर्ध्वे वामे कृपाणं करकमलतले छिन्नमुण्डं त
थाधः सव्ये चाभीर्व्वरंच त्रिजगदघहरे दक्षिणे कालिके चाज्जप्ये
तन्नाम ये वा तव मनुविभवं भावयंत्येतदन्व तेषामष्टौ कर
स्थाः प्रकटितवदने सिद्धयस्त्र्यम्बकस्य।४। वर्गाद्यं वह्नियुक्तं

विधुरतिवलितं तत्त्रयं कूर्च्चयुग्मं लज्जाद्वन्द्वंच पश्चात्
स्मितमुखि तदधष्ठद्वयं योजयित्वा। मातर्ये ये जपंति स्मरहर
महिले भावयंतः स्वरूपं ते लक्ष्मीलास्यलीलाकमलदल
दृशः कामरूपा भवंति।५। प्रत्येकं वा त्रयं वा द्वयमपि च
परं वीजमत्यंतगुह्यं त्वन्नाम्ना योजयित्वा सकलमपि स
दा भावयंतो जपंति। तेषां नेत्रारविन्दे विहरति कमला व
क्त्रशुभ्रांशुविम्वे वाग्देवी देवि मुण्डस्रगतिशयलसत्कंठि
पीनस्तनाढ्ये।६। गतासूनां वाहुप्रकरकृतकांचीपरिलस
न्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनां। श्मशानस्थे
तल्पे शवहृदि महाकालसुरतप्रसक्तां त्वां ध्यायन् जननि
जडचेता अपि कविः।७। शिवाभिर्घोराभिः शवनिवहमुण्डा
स्थिनिकरैः परं संकीर्णायां प्रकटितचितायां हरवधूं।
प्रविष्टां संतुष्टामुपरिसुरतेनातियुवतीं सदा त्वां ध्यायंति
क्वचिदपि न तेषां परिभवः।८। वदामस्ते किं वा जननि वय
मुच्चैर्ज्जडधियो न धाता नापीशो हरिरपि न ते वेत्ति प
रमं। तथापि त्वद्भक्तिर्म्मुखरयति चास्माकमसिते तदेतत्
क्षंतव्यं न खलु पशुरोषः समुचितः।९। समंतादापीनस्तन
जघनधृग्यौवनवती रतासक्तो नक्तं यदि जपति भक्तस्त
व मनुं विवासास्त्वां ध्यायन् गलितचिकुरास्तस्य वशगाः
समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः।१०। समाः
सुस्थीभूतो जपति विपरीताः यदि सदा विचिन्त्य त्वां
ध्यायन्नतिशयमहाकालसुरतां। तदा तस्य क्षौणीतल
विहरमाणस्य विदुषः कराम्भोजे वश्याहरवधु महासि
द्धिनिवहाः।११। प्रसूते संसारं जननि जगतीं पालयति
च समस्तं क्षित्यादि प्रलयसमये संहरति च। अतस्त्वां धा
तापि त्रिभुवनपतिः श्रीपतिरहो महेशोऽपि प्रायः सकल
मपि किं स्तौमि भवतीं।१२। अनेके सेवंते भवदधिकगीर्वा

ण्निवहान् विमूढ़ास्ते मातः किमपि न हि जानंति परमं। स
माराध्यामाद्यां हरिहरविरिंचादि-विबुधैः प्रपन्नोऽस्मि स्वैरं
रतिरसमहानन्दरसिकां।१३। धरित्री कीलालं शुचिरपि समीरोऽपि
गगणं त्वमेका कल्याणी गिरिशरमणि कालि सकलं। स्तुतिः का ते
मातस्तव करुणया मामगतिकं प्रसन्ना त्वं भूया भवमनु न भूयान्म
म जनुः।१४। श्मशानस्थः सुस्थो गलितचिकुरो दिक्पटधरः।
सहस्रन्त्वर्कानां निजगलितवीर्य्येण कुसुमं। जपंस्त्वत् प्रत्येकं
मनुमपि तव ध्याननिरतो महाकालि स्वैरं स भवति धरित्रीपरि
वृढ़ः।१५। गृहे सम्मार्ज्जन्या परिगलितवीजं हि चिकुरं समूलं म
ध्याह्ने वितरति चितायां कुजदिने। समुच्चार्य्य प्रेम्णा मनुमपि स
कृत् कालि सततं गजारूढ़ो याति क्षितिपरिवृढ़ः सत्कविवरः।
१६। सुपुष्पै राकीर्णं कुसुमधनुषो मन्दिरमहो पुरो ध्यायन् ध्या
यन् यदि जपति भक्तस्तव मनुं। स गन्धर्व्वश्रेणी पतिरपि कवि
त्वामृतनदी नदीनः पर्य्यन्ते परमपदलीनः प्रभवति।१७। त्रिपं
चारे पीठे शवशिवहृदि स्मेरवदनां महाकालेनोच्चैर्म्मदनरस
लावण्यनिरतां समासक्तो नक्तं स्वयमपि रतानन्दनिरतोजनो
यो ध्यायेत्त्वामयि जननि स स्यात् स्मरहरः।१८। स लोमास्थि स्वै
रं पललमपि मार्ज्जारमसिते परंचौष्ट्रं मैषं नरमहिषयोश्छा
गमपि वा। वलिंते पूजायामयि वितरतां मर्त्यवसतां स तां
सिद्धिः सर्व्वा प्रतिपदमपूर्व्वा प्रभवति।१९। वशी लक्षं मंत्रंप्रज
पति हविष्याशनरतो दिवा मातर्युष्मच्चरणयुगल-ध्याननि
पुणः। परं नक्तं नग्नो निधुवनविनोदेन च मनुं जपेल्लक्षं स
म्यक् स्मरहर समानः क्षितितले।२०। इदं स्तोत्रं मातस्तव मनु
समुद्धारणजनु स्वरूपाख्यं पादाम्बुज युगल-पूजाविधियुतं
निशार्द्धं वा पूजासमयमथवा यस्तु पठति प्रलापस्तस्यापि प्रस
रति कवित्वामृतरसः।२१। कुरंगाक्षीवृन्दं तमनुसरति प्रेमतरलं
वशास्तस्य क्षौणीपतिरपि कुवेर प्रतिनिधिः। रिपुः कारागारं कलय
ति च तत् केलिकलया चिरं जीवन्मुक्तः स भवति च भक्तः प्रतिजनु
।२२। इति महाकालविरचितं श्यामास्तोत्रं समाप्तं॥—

~~श्यामायाः कवचं~~। भैरव्युवाच। कालीपूजा श्रुता नाथ भावाश्च
विविधाः प्रभो। इदानीं श्रोतुमिच्छामि कवचं पूर्व्वसूचितं। त्वमेव
शरणं नाथ त्राहि मां दुःखसंकटात्। भैरव उवाच। रहस्यं शृ
णु वक्ष्यामि भैरवी प्राणवल्लभे। श्री जगन्मंगलं नाम कवचं
मंत्रविग्रहं। पठित्वा धारयित्वा वा त्रैलोक्यं मोहयेत् क्षणात्
नारायणोऽपि यद्धृत्वा नारी भूत्वा महेश्वरं। योगेशं क्षोभ
मनयद्यद्धृत्वा च रघूद्वहः। वरदृप्तान् जघानैव रावणादि
निशाचरान्। यस्य प्रसादादीशोऽहं त्रैलोक्यविजयी प्रभुः।
धनाधिपः कुवेरोऽपि सुरेशोऽभूच्छचीपतिः। एवं हि सक
ला देवाः सर्व्वसिद्धीश्वराः प्रिये। श्री जगन्मंगलस्यास्य क
वचस्य ऋषिः शिवः। छन्दोऽनुष्टुब् देवता च कालिका द
क्षिणेरिता। जगतां मोहने दुष्टनिग्रहे भुक्तिमुक्तिषु। यो
षिदाकर्षणे चैव विनियोगः प्रकीर्त्तितः। शिरो मे कालिका
पातु क्रीं कारैकाक्षरी परा। क्रीं क्रीं क्रीं मे ललाटं च कालि
का खड्गधारिणी। हूँ हूँ पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुती
मम। दक्षिणे कालिके पातु घ्राणयुग्मं महेश्वरी। क्रीं क्रीं क्रीं
रसनां पातु हूँ हूँ पातु कपोलकं। वदनं सकलं पातु ह्रीं
ह्रीं स्वाहा स्वरूपिणी। द्वाविंशत्यक्षरी स्कन्धौ महाविद्या
सुखप्रदा। खड्गमुण्डधरा काली सर्व्वांगमभितोऽवतु। क्रीं
हूँ ह्रीं त्र्यक्षरी पातु चामुण्डा हृदयं मम। ऐं हूँ ओँ ऐं स्तन
द्वन्द्वं ह्रीं फट् स्वाहा ककुत्स्थलं। अष्टाक्षरी महाविद्या भुजौ
पातु सकर्त्तृका। क्रीं क्रीं हूँ हूँ ह्रीं ह्रीं करौ पातु षडक्षरी मम
क्रीं नाभिं मध्यदेशं च दक्षिणे कालिकेऽवतु। क्रीं स्वाहा पातु
पृष्ठं तु कालिका सा दशाक्षरी। ह्रीं क्रीं दक्षिणे कालिके हूँ ह्रीं
पातु कटीद्वयं। काली दशाक्षरी विद्या स्वाहा पातूरुयुग्मकं
ओँ ह्रूँ क्रीं मे स्वाहा पातु कालिका जानुनी मम। काली हृन्ना
मविद्येयं चतुर्व्वर्गफलप्रदा। क्रीं हूँ ह्रूँ पातु सा गुल्फं दक्षि

ऐं कालिकेऽवतु। क्रीं हूँ ह्रीं स्वाहा पातु चतुर्द्दशाक्षरी मम। खड्गमुण्डधरा काली वरदाभयधारिणी। विद्याभिः सकलाभिः सा सर्व्वांगमभितोऽवतु। काली कपालिनी कुल्लाकुरुकुल्ला विरोधिनी। विप्रचित्ता तथोग्रोग्रप्रभा दीप्ता घनत्विषः नीला घना वलाका च मात्रामुद्रा मिता च मां। एताः सर्व्वाः खड्गधरा मुण्डमाला विभूषिताः। रक्षंतु दिग्विदिक्षु मां ब्राह्मी नारायणी तथा। माहेश्वरी च चामुण्डा कौमारी चापराजिता। वाराही नारसिंही च सर्व्वाश्चामितभूषणाः। रक्षंतु स्वायुधैर्द्दिक्षु विदिक्षु मां यथा तथा। इत्येवं कथितं दिव्यं कवचं परमाद्भुतं। श्री जगन्मंगलं नाम महा मंत्रौघविग्रहं त्रैलोक्याकर्षणं ब्रह्म कवचं मन्मुखोदितं। गुरुपूजां विधायाथ गृह्णीयात् कवचं ततः। कवचं त्रिः सकृद्वापि यावज्जीवं च वा पुनः। एतच्छताद्धर्मावृत्य-त्रैलोक्य विजयी भवेत्। त्रैलोक्यं क्षोभयत्येव कवचस्य प्रसादतः। महा कविर्भवेन्मासात् सर्व्वसिद्धीश्वरो भवेत्। पुष्पांजलीन् कालिकायै मूलेनैव पठेत् सकृत्। शत वर्षसहस्राणां पूजायाः फलमाप्नुयात्। भूर्ज्जे विलिखितं चैतत् स्वर्णस्थं धारयेद् यदि। शिखायां दक्षिणे बाहौ कंठे वा धारयेद् यदि। त्रैलोक्यं मोहयेत् क्रोधात् त्रैलोक्यं चूर्णयेत् क्षणात्। बह्वपत्या जीववत्सा भवत्येव न संशयः। न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः। शिष्येभ्यो भक्तियुक्तेभ्यश्चान्यथा मृत्युमाप्नुयात्। स्पर्द्धामुद्धूय कमला वाग्देवी मन्दिरे मुखे। पौत्रांतं स्थैर्य्यमास्थाय निवसत्येव निश्चितं। इदं कवचमज्ञात्वा यो जपेत् कालिदक्षिणां। शतलक्षप्रजप्तापि तस्य विद्या न सिध्यति। स शस्त्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात्। इति भैरवतंत्रे भैरवीभैरवसम्वादे कालीकल्पे श्यामाकवचं समाप्तं॥—

अथ तंत्रांतरे। भैरव उवाच। कालिका या महाविद्या कथिता भुवि दुर्लभा तथापि हृदये शल्यमस्ति देवि कृपां कुरु। कवचं तु महादेवि कथयस्वानुकम्पया। यदि नो

कथ्यते मातर्व्विमुंचामि तदा तनुं। श्रीदेव्युवाच। शंकापि जायते वत्स तव स्नेहात् प्रकाशितं। न वक्तव्यं न द्रष्टव्यमतिगुह्यतरं महत्। कालिका जगतां माता शोकदुःखविनाशिनी। विशेषतः कलियुगे महापातकहारिणी। काली मे पुरतः पातु पृष्ठतश्च कपालिनी। कुल्ला मे दक्षिणे पातु कुरुकुल्ला तथोत्तरे। विरोधिनी शिरः पातु विप्रचित्ता तु चक्षुषी। उग्रा मे नासिकां पातु कर्णौ चोग्रप्रभा मता वदनं पातु मे दीप्ता नीला च चिबुकं सदा।

ॐ श्रीगणेशाय नमः।

तंत्रसारः।

अष्टाविंशखण्ड।

घना ग्रीवां सदा पातु वलाका बाहुयुग्मकं। मात्रा पातु करद्वन्द्वं वक्षोमुद्रा सदावतु। मिता पातु स्तनद्वन्द्वं योनिमखलदेवता। ब्राह्मी मे जठरं पातु नाभिं नारायणी तथा। उरू माहेश्वरी नित्यं चामुण्डा पातु लिंगकं। कौमारी च कटीं पातु तथैव जानुयुग्मकं। अपराजिता च पादौ मे वाराही पातु चांगुलीन्। सन्धिस्थानं नारसिंही पत्रस्था देवतावतु। रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु। तत्सर्वं रक्ष मे देवि कालिके घोरदक्षिणे। ऊर्ध्वमधस्तथा दिक्षु पातु देवी स्वयं वपुः हिंस्रेभ्यः सर्वदा पातु साधकंच जलाधिकात्। दक्षिण कालिका देवी व्यापकत्वे सदावतु। इदं कवचमज्ञात्वा यो जपेद्देव दक्षिणां। न पूजाफलमाप्नोति विघ्नस्तस्य पदे पदे। कवचेनावृतो नित्यं यत्र तत्रैव गच्छति। तत्र तत्राभयं तस्य न क्षोभं विद्यते क्वचित्। इति कालीकुलसर्वस्वे दक्षिणकालिका कवचं समाप्तं॥—

अथ तारास्तोत्रं। मातर्नीलसरस्वति प्रणमतां सौभाग्य
सम्पत्प्रदे प्रत्यालीढ़-पदस्थिते शवहृदि स्मेराननाम्भो
रुहे। फुल्लेन्दीवरलोचनत्रययुते कर्त्रीकपालोत्पले खड्
गंचादधती त्वमेव शरणं त्वामीश्वरी माश्रये।१। वाचा
मीश्वरि भक्तकल्पलतिके सर्व्वार्थसिद्धीश्वरि गद्यप्रा
कृतपद्यजातरचनासार्व्वज्ञसिद्धिप्रदे। नीलेन्दीवरलोचन
त्रययुते कारुण्यवारां निधे सौभाग्यामृतवर्षणेन कृप
या सिंच त्वमस्मादृशं।२। खर्व्वे गर्व्वसमूहपूरिततनो स
र्पादिवेशोज्ज्वले व्याघ्रत्वक्परिवीतसुन्दरकटि व्याधूत
घंटांकिते। सद्यः कृत्तगलद्रजःपरिमिलन्मुण्डद्वयीमूर्द्ध
जग्रंथिश्रेणीनृमुण्डदामललिते भीमे भयं नाशय।३। भ
मायानंगविकाररूपललनाबिन्द्वर्द्धचन्द्रांकिते हुँफट्
कारमयी त्वमेव शरणं मंत्रात्मिके मादृशः। मूर्त्तिस्ते जन
नि त्रिधा सुघटिता स्थूलातिसूक्ष्मा परा वेदानां नहि गो
चरा कथमपि प्राप्तां नुतामाश्रये।४। त्वत्पादाम्बुजसेव
या सुकृतिनो गच्छन्ति सायुज्यतां तस्य श्रीपरमेश्वरि त्रिन
यनब्रह्मादि-साम्यात्मनः। संसाराम्बुधिमज्जने पटुतनून्
देवेन्द्रमुख्यान् सुरान् मातस्त्वत्पदसेवने हि विमुखान्
किं मन्दधीः सेवते।५। मातस्त्वत्पदपंकजद्वयरजोमुद्रां
क कोटी-किरणस्ते देवाजयसंगरे विजयिनो निःशंकसं
के गताः। देवोऽहं भुवनेन मे सम-इति स्पर्द्धां वहंतः
परैस्त्वत्तुल्यां नियतं यथा शुचिवरीनाशं व्रजंति स्वयं
।६। त्वन्नामस्मरणात् पलायनपरा द्रष्टुंच शक्तानते भू
तप्रेत-पिशाचराक्षसगण्य यक्षाश्च नागाधिपाः। दै
त्या दानवपुंगवाश्च खचरा व्याघ्रादिका जंतवो डाकिन्याः कुपि
तांतकाश्च मनुजं मातः क्षणं भूतले।७। लक्ष्मीः सिद्धग
णाश्च पादुकमुखाः सिद्धास्तथा वैरिणां स्तम्भश्चापि

रणंगने गजघटास्तम्भ-स्तथा मोहनं। मातस्त्वत्पद
सेवया खलु नृणां सिध्यंति ते ते गुणाः क्रांतिः कांत
मनोभवस्य भवति क्षुद्रोऽपि वाचस्पतिः।८। ताराष्टकमि
दं पुण्यं भक्तिमान् यः पठेन्नरः। प्रातर्मध्याह्नकाले च
सायाह्ने नियतः शुचिः। लभते कवितां दिव्यां सर्व्वशा
स्त्रार्थविद्भवेत्। लक्ष्मीमनश्वरां प्राप्य भुक्त्वा भोगान्
यथेप्सितान्। कीर्त्तिं कांतिश्च वैरुल्यं सर्व्वेषां प्रियतां
व्रजेत्। विख्यातिं चापि लोकेषु प्राप्यांते मोक्षमाप्नुयात्
इति नीलतंत्रे ताराष्टकं समाप्तं।।-

अथ ताराकवचं। ईश्वर उवाच। कोटितंत्रेषु गोप्याहि वि
द्यातिभयमोचनी। दिव्यं हि कवचं तस्याः शृणुष्व स
र्व्वकामदं। ताराकवचस्याक्षोभ्य ऋषिस्त्रिष्टुप्छन्दो भग
वती तारा देवता सर्व्वमंत्रसिद्धिसमृद्धये विनियोगः
प्रणवो मे शिरः पातु ब्रह्मरूपा महेश्वरी। ह्रींकारः पा
तु ललाटे बीजरूपा महेश्वरी। स्त्रींकारः पातु वदने
लज्जारूपा महेश्वरी। हुँकारः पातु हृदये तारिणी श
क्तिरूपधृक्। फट्कारः पातु सर्व्वांगे सर्व्वसिद्धिफलप्रदा
खर्व्वा मां पातु देवेशी गण्डयुग्मे भयापहा। लम्बोदरी
सदा स्कन्धयुग्मे पातु महेश्वरी। व्याघ्रचर्म्मावृतकटी
पातु देवी शिवप्रिया। पीनोन्नतस्तनी पातु पार्श्वयुग्मे
महेश्वरी। रक्तवर्त्तुलनेत्रा च कटिदेशे सदावतु। लल
जिह्वा सदा पातु नाभौ मां भुवनेश्वरी। करालास्या सदा
पातु लिंगे देवी हरप्रिया। पिंगोग्रैकजटा पातु जंघायां
विघ्ननाशिनी। प्रेतखर्परधरा देवी जानुचक्रे महेश्वरी
नीलवर्णा सदा पातु जानुनी सर्व्वदा मम। नागकुण्ड
लधरा देवी सर्व्वांगं पातु सर्व्वदा। नागांगदधरा देवी पातु

प्रांतरदेशतः। चतुर्भुजा सदा पातु गमने शत्रुनाशिनी
खड्गहस्ता महादेवी पातु मां विजयप्रदा। नीलाम्बर
धरा देवी पातु मां विघ्ननाशिनी। कर्त्रीहस्ता सदा पातु
विवादे शत्रुमध्यतः। ब्रह्मरूपधरा देवी संग्रामे पातु सर्व्वदा
नागनूपुरधरा देवी भोजने पातु सर्व्वदा। शवकर्णा महा
देवी शयने पातु सर्व्वदा। वीरासनधरा देवी निद्रायां पातु स
र्व्वदा। धनुर्व्वाणधरा देवी पातु मां विघ्नसंकुले। नागांचित
कटी पातु देवी मां सर्व्वकर्म्मसु। छिन्नमुण्डधरा देवी कानने पातु
सर्व्वदा। चितामध्यस्थिता देवी मारणे पातु सर्व्वदा। द्वीपिचर्म्मधरा
देवी पुत्रदारधनादिषु। अलंकारान्विता देवी पातु मां हरवल्ल
भा। रक्त रक्त नदीकुंजे हुँ हुँ फट् समान्विता। बीजरूपा महादेवी
पर्व्वते पातु सर्व्वदा। मणिधारि वज्रिणि देवि महाप्रतिसरे तथा
रक्त रक्त सदा हुँ हुँ ॐ ह्रीं स्वाहा महेश्वरी। पुष्पकेतुराजार्हते
कानने पातु मां सदा। ॐ ह्रीं वज्रपुष्पे हुँ फट् प्रांतरे सर्व
कामदा। ॐ पुष्पे पुष्पे महापुष्पे पातु पुत्रान् महेश्वरी।
हुँ स्वाहा शक्तिसंयुक्ता दारान् रक्षंतु सर्व्वदा। ॐ आं हुँ
फट् स्वाहा महेशानी पातु द्यूते हरप्रिया। ॐ ह्रीं सर्व्व
विघ्नोत्सारिणी देवी विघ्नान्मां सर्व्वतोऽवतु। ॐ स्वाहा
पवित्र वज्रभूमे ॐ फट् स्वाहा समान्विता। पृथिव्यां पातु मां
देवी सर्व्व विघ्नविनाशिनी। ॐ आः सुरेखे हुँ फट् स्वाहा सम
न्विता। पाताले पातु मां देवी नागिनी नागसंज्ञिका। ह्रींकारी
पातु मां पूर्व्वे शक्तिरूपा महेश्वरी। स्त्रींकारी दक्षिणे पातु
वधूरूपा महेश्वरी। हुँ स्वरूपा महादेवी पातु मां क्रोधरूपिणी
फट्स्वरूपा महामाया पश्चिमे पातु सर्व्वदा। उत्तरे पातु मां देवी
ढस्वरूपा हरप्रिया। मध्ये मां पातु देवेशी हुँ स्वरूपा नगात्मि
का। त्वरिता पातु मां देवी सर्व्वविघ्नविनाशिनी। नीलवर्णा सदा
पातु सर्व्वत्र वाग्भवी सदा। भवानी पातु भवने सर्व्वैश्वर्य्य
प्रदायिनी। विद्यादानरता देवी पातु वक्त्रे सरस्वती। शास्त्रवादे

च संग्रामे जले च विषमे गिरौ। भीमरूपा सदा पातु श्मशाने
भयनाशिनी। भूतप्रेतालये घोरे दुर्गा मां भीषणावतु। पातु
नित्यं महेशानी सर्व्वत्र शिवदूतिका। कवचस्य च माहात्म्यं
नाहं वर्षशतैरपि। शक्नोमि कथितुं देवि भवेत्तस्य फलंच
यत्। पुत्रदारार्थबन्धूनां सर्व्वदेशेच सर्व्वदा। न विद्यते
फलं तस्य नृपपूज्यो भवेच्च सः। शुचिर्भूत्वाशुचिर्व्वापि कव
चं सर्व्वकामदं। प्रपठन् वा स्मरन्मर्त्यो दुःखशोकविवर्ज्जि
तः सर्व्वशास्त्रे महेशानि कविराट् भवति ध्रुवं। सर्व्ववागी
श्वरो मर्त्यो लोकवश्यो धनेश्वरः। रणे द्यूते विवादे
च जयस्तस्य भवेद्ध्रुवं। पुत्रपौत्रान्वितो मर्त्यो विलासी
सर्व्व योषितां। शत्रवो दासतां यांति सर्व्वेषां वल्लभः स
दा। गर्व्वी खर्व्वी भवत्येव वादी स्खलति दर्शनात्। मृत्यु
श्च वशतां याति दासस्तस्यावनीभुजः। प्रसंगात् कथितं
सर्व्वं कवचं सर्व्वकामदं। प्रपठन् वा स्मरन्मर्त्यः शापानु
ग्रहक्षमः। आनन्दवृन्दवन्धूनामधिपः कविवाग्भवेत्
सर्व्ववागीश्वरो मर्त्यो लोकवश्यः सदा सुखी। गुरोः प्रसाद
मासाद्य विद्यां प्राप्य सुगोपिता। तत्रापि कवचं देवि दु
र्लभं भुवनत्रये। गुरुर्द्देवो हरः साक्षात् पत्नी तस्य हर
प्रिया। अभेदेन यजेद्यस्तु तस्य सिद्धिरदूरतः। मंत्राचा
रा महेशानि कथिताः पूर्व्वतः प्रिये। नभोज्योतिस्तथा वक्त्रं
हृदयोपरि चिंतयेत्। ऐश्वर्य्यं सुकवित्वंच महावागीश्वरो
नरः। नित्यं तस्य महेशानि महिला संगमं चरेत्। पंचा
चाररतो मर्त्यः सिद्धो भवति नान्यथा। शक्तियुक्तो भवे
न्मर्त्यः सिद्धो भवति नान्यथा। ब्रह्मा विष्णुश्च रुद्रश्च ये
देवाः ~~सर्व्वे~~ सुरसत्तमाः। तं दृष्ट्वा साधकं देवि लज्जायु
क्ता भवंति ते। स्वर्गे मर्त्ये च पाताले ये देवाः सिद्धिदायकाः

प्रशंसंति सदा देवि तं दृष्ट्वा साधकोत्तमं। विघ्नात्मकाश्च
ये देवाः स्वर्गे मर्त्ये रसातले। प्रशंसंति सदा सर्वे तं दृ
ष्ट्वा साधकोत्तमं। इतिते कथितं देवि मया सम्यक् प्रकी
र्त्तितं। भुक्ति मुक्तिकरं साक्षात् कल्प वृक्षस्वरूपकं। आसा
द्याद्य गुरुं प्रसाद्य य इदं कल्पद्रुमालम्बनं मोहे नापि
मदेन वापि रहितो जाड्येन मुह्यत्यसौ। सिद्धोऽसौ
भुवि सर्वदुःख विपदां पारं प्रयात्यंतको मित्रं तस्य न
पाश्च देवि विपदो नश्यति तस्याशुभं। तद्गात्रं प्राप्य शा
स्त्राणि ब्रह्मास्त्रादीनि वै भुवि। माल्यानि कुसुमान्येव
भवंति सुखदानि च। तस्य गेहे स्थिरा लक्ष्मीर्वाणी वक्त्रे
वसेद्ध्रुवं। इदं कवचमज्ञात्वा तारां यो भजते नरः।
अल्पायुर्निर्धनो मूर्खो भवत्येव न संशयः। लिखित्वा
धारयेद्यस्तु कंठे वा मस्तके भुजे। तस्य सर्वार्थसिद्धिः
स्याद्यद्यन्मनसि वर्त्तते। गोरोचनाकुंकुमेन रक्तचन्द
नकेन वा। यावकैर्वा महेशानि लिखेद्यंत्रं समाहितः।
अष्टम्यां मंगलदिने चतुर्दश्यामथापि वा। सन्ध्यायां
देवदेवेशि लिखेद्यंत्रं समाहितः। मघायां श्रवणायां वा
रेवत्यां वा विशेषतः। सिंहराशौ गते चन्द्रे कर्कटस्थे
दिवाकरे। मीनराशौ गुरौ याति वृश्चिकस्थे शनैश्चरे।
लिखित्वा धारयित्वा च उत्तराभिमुखो भवन्। श्मशाने
प्रांतरे वापि शून्यागारे विशेषतः। निशायां यो लिखेद्यंत्रं त
स्य सिद्धिरचंचला। भूर्जपत्रे लिखेद्यंत्रं गुरुणा च महेश्व
रि। ध्यानधारणयोगेन धारयेद्यस्तु भक्तितः। अचिरात्तस्य
सिद्धिः स्यान्नात्र कार्या विचारणा। इति रुद्रजामले उग्रतारा
कवचं समाप्तं॥—

अथ त्रैलोक्यमोहनं नाम ताराकवचं। देव्युवाच। नानापूजा
श्रुता नाथ विद्याश्च सकलास्ततः। साम्प्रतं श्रोतुमिच्छामि कवचं
मंत्रविग्रहं। त्रैलोक्यमोहनं नाम सर्वापद्विनिवारकं। पूरैव सूचितं
नाथ कृपया मे प्रकाशय। भैरव उवाच। देवदानव-विद्याधरपूजि
ते प्राणवल्लभे। त्रैलोक्यमोहनं नाम श्रूयतां कवचं परं। सर्व
विद्यामयं देवि सर्वमंत्रमयं ध्रुवं। सर्वरक्षाकरं सर्वसिद्धि
विद्याप्रदायकं। वेदव्यासोऽपि यद्धृत्वा सर्वज्ञः पठनाद्यतः
यद्धृत्वा पठनादीशस्त्रैलोक्यविजयी प्रभुः। धनाधिपः कुबे
रोऽपि देवाधिपः शचीपतिः। पठनाद्धारणात् सत्यं यतः
सर्वे दिगीश्वराः। सर्वसिद्धियुताः संतः सर्वैश्वर्यमवा
प्नुयः। यस्य प्रसादादीशोऽहं भैरवाणां सुरेश्वरि। क्रोधा
धिपो महाभीमो देवेषु कथितः प्रभुः। न दद्यात् परशि
ष्येभ्यो दद्याच्छिष्येभ्य एव च। अभक्तेभ्योऽपि पुत्रेभ्यो
दत्वा मृत्युमवाप्नुयात्। त्रैलोक्यमोहनस्यापि कवचस्य ऋषिः
शिवः। छन्दो विराट् देवता च सोग्रतारा प्रकीर्त्तिता। चतुर्वर्गे
षु विद्यायां विनियोगः प्रकीर्त्तितः। ॐ ह्रीं स्त्रीं मे शिरः पातु
हुं फट् पातु ललाटकं। सार्द्ध पंचाक्षरी तारा पायान्नेत्रयुगं मम
ॐ ह्रीं स्त्रीं हुं श्रुती पायान्नमः पातु च नासिकां तारा षडक्षरी
पायाद्वदनं मुखभूषणा। ह्रीं स्त्रीं हुं च फट् वदनं पातु जिह्वां
महेश्वरी। ह्रीं स्त्रीं हूं मे गलं पायात् सापि नीलसरस्वती
स्त्रीं स्कन्धौ पातु नियतं तारैकाक्षररूपिणी। हुं घाटां मां
सदा पातु बीजैकाक्षररूपिणी। ऐं ह्रीं स्त्रीं हुं च फट् तारका
मे भुजद्वयं। श्रीं ह्रीं स्त्रीं हुं च फट् पायात् श्रीतारा मे स्तनद्वयं
ह्रीं ह्रीं स्त्रीं हुं च फट् पायात् तारा च हृदयं मम। हुं ह्रीं स्त्रीं
हुं च फट् बीजं तारा पृष्ठं सदावतु। क्लीं ह्रीं स्त्रीं हुं च फट् पायात्
पार्श्वे कामस्वरूपिणी। ॐ ह्रीं स्त्रीं हुं नमः पायात् कुक्षिं महा

षडक्षरी। ऐँ सौः ॐ ऐँ ह्लीँ फट् स्वाहा कटिदेशं सदावतु। ,अष्टाक्ष
री महाविद्या साक्षाद्ब्रह्मस्वरूपिणी। स्त्रं हुँ हौँ ॐ ऐँ श्रीँ ह्रीँ सा
गुह्यदेशं सदावतु। सप्ताक्षरी चोग्रतारा मूलविद्यास्वरूपिणी। ॐ
ह्रीँ हौँ हुँ नमस्तारायै सकलपदंततः। दुस्तरं तारयपदं तरय प्र
णवद्वयं। स्वाहेति च महाविद्या जानुनी सर्व्वदावतु। ऐँ सौः
ॐ ऐँ क्लीँ फट् स्वाहा जंघे पातु परात्मिका। ॐ ह्रीँ स्त्रीँ हुं च
फट् तारा हंसाद्यंता नवाक्षरी। महोग्रतारा पादौ मे पातु नित्यं
महेश्वरि। ऐँ ह्रीँ स्त्रीँ श्रीँ हसौः सहौः वद वद वाग्वादिनीति
च। कामवीजत्रयं नीलसरस्वतीस्वरूपकं। ऐँ ऐँ ऐँ काहि काहि
कलरंी स्वाहेति च। चतुस्त्रिंशल्लिपिमयी पातु ताराखिलं वपुः
इन्द्रो वामाक्षियुक् पृथ्वी सरस्वत्यनलप्रिया। कूर्च्चाद्यंता पातु
चोर्ध्वं मूलविद्याप्दशाक्षरी। तारं माया वधूः कूर्च्चं काली
कामकला ततः। उग्रतारे भगं कामः परा लक्ष्मीः शिवांकुशौ
सा महाषोडशी प्रोक्ता तारादेव्या मयाधुना। विधिवद्ग्रह
णादस्य मृत्युं मृत्युपथं नयेत्। एषा विद्या मया गुप्ता
तंत्रादि जामलेषु च। साम्प्रतं कथितं दिव्यं कवचांग तयाप्रिये
इति ते कथितं देवि गुह्याद्गुह्यतरं परं। त्रैलोक्यमोहनं
नाम कवचं मंत्रविग्रहं। ब्रह्मविद्यामयं भद्रे केवलं ब्रह्मरू
पिणं। मंत्रविद्यामयंचैतत् कवचं मन्मुखोदितं। गुरुमभ्य
र्च्य विधिवत् कवचः प्रपठेद्यदि। त्रिःसकृद्वा यथाज्ञानं
भैरवस्तत्क्षणाभवेत्। सर्व्वपापविनिर्म्मुक्तः कुलकोटीः समु
द्धरेत्। गुरुः स्यात् सर्व्वविद्यास्वप्यधिकारी जपादिषु।
शतमष्टोत्तरं जप्त्वा साक्षाद्भूमि पुरन्दरः। त्रैलोक्यं विचरे
द्वीरो गणनाथो यथा गुहः। पुष्पांजल्यष्टकं दत्त्वा मूलेनै
व पठेत्ततः। पंचवर्षसहस्राणां पूजायाः फलमाप्नुयात्।
भूर्ज्जे विलिख्य गुलिकां स्वर्णस्थां धारयेद् यदि। पुरुषो

दक्षिणे वाहौ योषिद्वामभुजे तथा। वहुपुत्रवती नारी पुरुषो
धनपुत्रवान्। सर्व्वसिद्धीश्वरो भूत्वा विचरेद्भैरवो यथा
तद्गात्रं प्राप्य शस्त्राणि ब्रह्मास्त्रादीनि भैरवि। माल्यानि
कुसुमान्येव भवंति सुखदानि च। तस्य गेहे चिरं लक्ष्मीर्वा
णी वक्त्रे वसेद्ध्रुवं। इदं कवचमज्ञात्वा तारां यो भजते
ऽधमः। ,अल्पायु निर्धनो मूर्खो भवत्येव न संशयः। इति भै
रवीभैरवसम्वादे तारा कल्पे त्रैलोक्यमोहनं नाम ताराकवचं
समाप्तं।। —

,अथ वगलामुखीस्तोत्रं। चलत्कनककुण्डलोल्लसितचारु
गण्डस्थलीं लसत्कनकचम्पकद्युतिमदिन्दु विम्बाननां।
गदाहतविपक्षकां कलितलोलजिह्वां चलां स्मरामि वगला
मुखीं विमुखसन्मनःस्तम्भिनीं।१। पीयूषोदधिमध्यचारु
विलसद्रक्तोत्पले मण्डपे यत्सिंहासनमौलिपातितरिपुप्रे
तासनाध्यासिनीं। स्वर्णाभां करपीड़ितारिरसनां भ्राम्य
द्गदाविभ्रमां इत्थं ध्यायति यांति तस्य सहसा सद्योऽथ
सर्व्वापदः।२। देवि त्वच्चरणाम्बुजार्च्चनकृते यः पीतपुष्पां
जलिं भक्त्या वामकरे निधाय च मनुं मंत्री मनोज्ञाक्षरं। पीठध्यान
परोऽथ कुम्भकवशाद्वीजं स्मरेत् पार्थिवं तस्यामित्रमुखस्य वाचि
हृदये जाड्यं भवेत् तत्क्षणात्।३। वादी मूकति रंकति क्षितिपति
र्वैश्वानरः शीतति क्रोधी शाम्यति दुर्ज्जनं सुजनति क्षिप्रानुगः
खंजति। गर्व्वी खर्व्वति सर्व्वविच्च जडति त्वन्मंत्रिणामं त्रितः श्रीनि
त्ये वगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः।४। मंत्रस्ता
वदलं विपक्षदलने स्तोत्रं पवित्रंच ते यंत्रं वादिनि यंत्रणं त्रिजगतां
जैत्रंनु चित्रं नुते। मातः श्रीवगलेति नाम ललितं यस्यास्ति जंतो
र्मुखे तन्नामग्रहणेन संसदि मुखस्तम्भो भवेद्वादिनां।५। दुष्टस्त
म्भनमुग्रविघ्नशमनं दारिद्र्यविद्रावणं भूभृद्भूशमनं चल
न्मृगदृशां चेतः समाकर्षणं। सौभाग्यैकनिकेतनं मम दृशोः का
रुण्यपूर्णामृतं मृत्योर्मारणमाविरस्तु पुरतो मातस्त्वदीयं वपुर्भद्

मातर्भंजय मे विपक्षवदनं जिह्वां चलां कीलय ब्राह्मीमुद्रय
नाशयाशु धिषणामुग्रां गतिं स्तम्भय। शत्रूं चूर्णय देवि
तीक्ष्णगदया गौरांगि पीताम्बरे विघ्नौघं बगले हर प्रणमतां
कारुण्यपूर्णेक्षणे।७। मातर्भैरवि भद्रकालि विजये वाराहि
विश्वाश्रये श्रीविद्ये समये महेशि बगले कामेशि रामे रमे।
मातंगि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे दासोऽहं शर
णागतः करुणया विश्वेश्वरि त्राहि मां।८। संरम्भे चौरसं
घे प्रहरणसमये बन्धने व्याधिमध्ये विद्यावादे विवादे प्र
कुपितनृपतौ दिव्यकाले निशायां। वश्ये वा स्तम्भने वा
रिपुवधसमये निर्जने वा वने वा गच्छंस्तिष्ठंस्त्रिका
लं यदि पठति शिवं प्राप्नुयादाशु धीरः।९। नित्यं स्तोत्रमिदं
पवित्रमिह यो देव्याः पठत्यादरात् धृत्वा यंत्रमिदं तथैव सम
ये बाहौ करे वा गले। राजानोऽप्यरयो मदान्धकरिणः सर्पाम
गेन्द्रादिकास्ते वै यांति विमोहिता रिपुगणा लक्ष्मीः स्थिराः सि
द्धयः।१०। त्वं विद्या परमा त्रिलोकजननी विघ्नौघसंछेदिनी
योषाकर्षणकारिणी जनमनःसम्मोहसन्दायिनी। स्तम्भोत्सा
रणकारिणी पशुमनःसम्मोहसंदायिनी जिह्वाकीलनभैरवी
विजयते ब्रह्मादिमंत्रो यथा।११। विद्यां लक्ष्मीं सर्वसौभाग्य
मायुः पुत्रैः पौत्रैः सर्वसाम्राज्यसिद्धिं। मानं भोगो वश्यमारो
ग्यसौख्यं प्राप्तं तत्तद्भूतलेऽस्मिन्नरेण।१२। यत्कृतं जपसन्नाहं
गदितं परमेश्वरि। दुष्टानां निग्रहार्थाय तं गृहाण नमोऽस्तु ते
।१३। ब्रह्मास्त्रमिति विख्यातं त्रिषु लोकेषु दुर्लभं। गुरुभक्ताय
दातव्यं न देयं यस्य कस्यचित्।१४। पीताम्बरां द्विभुजांच
त्रिनेत्रां गात्रकोज्ज्वलां। शिला मुद्गरहस्तांच स्मरेत्तां बग
लामुखीं।१५। प्रातर्मध्याह्नकाले स्तवपठनमिदं कार्यसिद्धि
प्रदं स्यात्। इति रुद्रयामले श्रीबगलामुखीस्तोत्रं समाप्तं।—

अथ मातंगीकवचं। शिरो मातंगिनी पातु भुवनेशी तु चक्षुषी
तोतला कर्णयुगलं त्रिपुरा वदनं मम। पातु कंठे महामा
या हृदि माहेश्वरी तथा। त्रिपुरा पार्श्वयोः पातु गुदे का
मेश्वरी मम। ऊरुद्वये तथा चण्डी जंघायांच रतिप्रिया।
महामाया पदे पायात् सर्वांगेषु कुलेश्वरी। य इदं धार
येन्नित्यं जायते सर्वदानवित्। परमैश्वर्यमतुलं प्राप्नो
ति नात्र संशयः। इति मत्स्यसूक्ते महातंत्रे मातंगीकव
चं समाप्तं। इति स्तवकवचपरिच्छेदः।
अथ प्रसंगादुपचारादयो निरूप्यंते। तत्र चतुःषष्ट्युप
चाराः। सर्वोपचारमंत्रास्त्रितारीपूर्वाः। कल्पयामि नम
इत्यंताः कार्याः। यथा ऐं ह्रीं श्रीं पाद्यं कल्पयामि नमः
एवं अर्घ्यं कल्पयामि नमः। इत्यादिक्रमेण। तथाच सिद्ध
यामले — त्रितारींच मुखे कृत्वा

अनंतर प्रसंगतः देवपूजाका उपचारनिर्णय करता है। तन्मध्ये प्रथ
मतः चतुःषष्टि उपचार कहा जाता है। सर्व प्रकार उपचार प्रदानके समय
मे पहिले त्रितारी बीज अर्थात् ऐं ह्रीं श्रीं यह बीजत्रय उच्चारण करके
पीछे देयद्रव्यका उल्लेख पूर्वक कल्पयामि नमः ऐसा वाक्य द्वारा उपचार
निवेदन करेगा। इसविषयका प्रमाण सिद्ध

देवताप्रीतये स्नानमहं करिष्ये॥ इति संकल्पं कुर्य्यात्॥ तथा च कुलचूडा
मणौ॥ ताम्रपात्रे सदुर्व्वञ्च सतिलं सजलं तथा॥ गृहीत्वामुक देवस्य
प्रीतये स्नानमाचरेत्॥ ततः षडङ्गन्यास प्राणायामौ कृत्वा॥ ॐ गङ्गे च
यमुने चैव गोदावरी सरस्वती॥ नर्म्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं
कुरु॥ इत्यनेनाङ्कुशमुद्रया सूर्य्यमण्डलात्तीर्थमावाह्य वामांत धेनुमुद्रया
अमृती कृत्य कवचेनावगुण्ठ्य मन्त्रेण संरक्ष्य मूलेनैकादशधाभिमन्त्र्य सू
र्य्याभिमुखं द्वादशवारिधारां निक्षिप्य तास्मिन् इष्टदेवताचरणारविन्द
निःसृते॥ जले त्रिर्निमज्य इष्टदेवतां ध्यायन् मूलमन्त्रं यथा॥ शाक्ते जपन्
उन्मज्य उदकेन त्रिवार जप्तेन कलसमुद्रया त्रिवारमात्मानमभिषि
च्य वैदिक संध्यादिकं कृत्वा सूर्य्यायार्घं दत्वा तान्त्रिकाघमर्षणादि
वारिधारान्तं कर्म्म कुर्य्यात्॥ यथा जामले॥ ध्यात्वा जलाञ्जलीन् क्षि
प्त्वा तर्प्पयेदिष्टदेवतां॥ तत्र क्रममाह॥ ॐ देवांस्तर्प्पयामि ऋषींस्त
र्प्पयामि पितॄन् स्तर्प्पयामि॥ इति सन्तर्प्य॥ गुरुं परमगुरुं परापरगुरुं
परमेष्ठिगुरुञ्च तर्प्पयेत्॥ तथा च॥ देवान् ऋषीन् पितॄंश्चैव तन्त्रो
क्तविधानतः॥ गुरुपङ्क्तिं पुरा तर्प्य तर्प्पयेदिष्टदेवतां॥ वैष्णवेतु विशे
षः॥ नारदं पर्व्वतं जिष्णुं निशठोद्धव दारुकं॥ विष्वक्सेनञ्च शैनेयं गु
रुञ्च तर्प्पयेल्लिशः॥ वाक्यन्तु ॐ नारदं तर्प्पयामि॥ इत्यादि क्रमेण प्रयोगः॥

जामले॥ स्नानमूलाः क्रियाः सर्व्वाः श्रुतिस्मृत्युदितान्नृणां॥ तस्मात्स्ना
नं निषेवेत श्रीपुष्ट्यारोग्यवर्द्धनं॥ राघवभट्टेन॥ यतश्चाशुचिवस्त्रम
स्नानमनलङ्कारं पुरुषं देवता नाधितिष्ठन्तीति॥ स्नानभेदमाह॥
रुद्रजामले॥ स्नानन्तु द्विविधं प्रोक्तं मज्जनं गात्रमार्जनं॥ मन्त्रज
लादिभिः स्नानमुत्तमं परिकीर्त्तितं॥ तत्प्रकारं शृणु प्राणवल्लभ
प्रियकारणं॥ विश्वसारतन्त्रे॥ मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमे
व च॥ वारुणं मानसञ्चैव सप्तस्नानं प्रकीर्त्तितं॥ एवं स्नात्वा विधानेन
शुचिर्भवति नान्यथा॥ तत्र मान्त्रस्नानादिकं विशेषयति॥ तत्रैव॥
आपोहिष्ठादिभिर्म्मान्त्रं भौमं देहप्रमार्जनं॥ आग्नेयं भस्मना स्नानं
वायव्यं गोरजः स्मृतं॥ यत्तदातपवर्षेण स्नानं दिव्यमहोच्यते॥
वारुणञ्चावगाहः स्यान्मानसं विष्णुचिन्तनं॥ ओं नत्वादित्य सङ्काशं
वामदेवं चतुर्भुजं॥ शङ्खचक्रगदापद्म मुकुटं वनमालिनं॥

द्वादशारसरोम्बुजगतं ध्यायेत्तारारणं विभुं॥ विश्वसारतन्त्रे॥ स्वाङ्घ्रि
तं पुण्डरीकाक्षं मूर्त्तिमन्तं प्रभुं स्मरन्॥ तत्पादोदकजां धारां निप
तन्तीं स्वमूर्द्धनि॥ चिन्तयेद्ब्रह्मरन्ध्रेण प्रविशन्तीं स्वकां तनुं॥ तया
संक्षालयेत् सर्व्वमन्तर्देहगतं मलं॥ तत्क्षणाद्विरजो मन्त्री जायते
स्फटिकोपमः॥ इदं स्नानवरं मात्रात् सहस्रमधिकं स्मृतमिति॥
इति वैष्णवान्तरस्नानं॥ शाक्तमाभ्यन्तरं स्नानमुक्तं श्रीपञ्चमीमते॥ =
स्नानप्रकारो द्विविधो वाह्याभ्यन्तरभेदतः॥ आन्तरं स्नानमत्यन्तं र
हस्यमपि सादरं॥ कथयामि भवध्वंसि चतुर्वर्गफलाप्तये॥ साम्विं त्व
यमनुस्मृत्य चरणत्रयमध्यतः॥ स्ववक्त्रं सच्चिदानन्दप्रवाहं भावगोच
रं॥ विमुक्तिसाधनं पुंसां स्मरणाद्देवयोषितः॥ तेन स्नातं तमात्मानं
भावयेद्बाह्यशान्तये॥ इति शाक्ते आन्तरस्नानं॥ शैवागमे उक्तं॥ मनसा
मूलमन्त्रेण प्राणायामपुरःसरं॥ कुर्वीत मानसं स्नानं सर्व्वत्र विहित
ञ्च यत्॥ स्नानञ्च त्रिविधं प्रोक्तं सन्ध्या चात्रिविधा स्मृता॥ आन्तरञ्च भ
वेद्द्विविवाह्यं मानसमेव च॥ मानसं वै भवेत् स्नानं यः सदा शुद्धमानसः
स्पर्शालेपादिके वापि निर्व्विकल्पः स देव हि॥ वाह्यमन्त्रैव संप्रोक्त
मान्तरं श्रृणु सांम्प्रतं॥ प्रागुक्तक्रमयोगेन प्राणायामपरो वुधः॥ श
क्तिं पराशिवेनैव संगमय्य विधानतः॥ तदुद्भवामृते शम्भोर्निमज्य पु
नरेव हीति॥ अथ नित्यस्नानफलं॥ मत्स्यसूक्ते॥ याम्यं हि यातनादुःखं
नित्यस्नायी न पश्यति॥ नित्यस्नानेन पूयन्ते येपि पापकृतो जनाः॥
अगम्यागमनात् पापात् पापिभ्यश्च प्रतिग्रहात्॥ रहस्याचरितात् पा
पान्मुच्यते स्नानमाचरेत्॥ अथ वाह्यस्नानं॥ रुद्रयामले पूर्व
खण्डे द्वितीयपटले॥ नदीसरस्तडागेषु कूपवापीषु वा पुनः॥ प्रा
तर्म्मध्याह्नसायाह्ने नरः स्नायाद्यथाविधि॥ विश्वसारतन्त्रे॥ वि
धिना स्नानमुद्दिश्य कुर्य्यात् पूर्व्वाह्णिकीं क्रियां॥ नदीं वा देवखातं
वा दीर्घिकां सागरं तथा॥ एतान्प्राप्य स्नानमुद्दिश्य पौर्व्वाह्णिकीं क्रि
यां कुर्य्यादित्यन्वयः॥ नद्यादीनामुद्धृतजलापेक्षया स्थानस्य जलस्य
प्राशस्त्यमुक्तं॥ तत्रैव॥ गङ्गाद्याः सरितः सर्व्वाः शस्यान्ते स्थानतो वु
धैः॥ काश्यादि सर्व्वतीर्थानि भावतेयानि सन्निवे॥ तानि स्थाने प्रश
स्यन्ते सर्व्वपापहराणि वै॥ नीलतन्त्रे॥ म्लकुशानपि संगृह्य गत्वा जलं

मलापकर्षणं स्नात्वा मन्त्रस्नानं समाचरेत्॥ शाक्ते कुशान् विशेषयति श्या
मारहस्ये॥ तेन तज्जीन्यारजतं धार्य्यं स्वर्णं धार्य्यमनामया॥ एवमेव कुशाः
शाक्ते नद्भर्भो वन सम्भवाः॥ इति शाक्ते कुशाः॥ महानिर्व्वाणतन्त्रे पञ्चमो
ल्लासे॥ आदावप उपस्पृश्य प्रविशेद्सलिले ततः॥ नाभिमात्रे जले
स्थित्वा मलानामपनुत्तये॥ सकृत् स्नात्वा तथोन्मज्ये मन्त्रस्नानमथाच
रेत्॥ नीलतन्त्रे॥ विद्याया त्रिनिमज्जैव मार्चामेत्या पृसान्तपा॥ पुनर्निमज्य
पयसि सङ्कल्पञ्च समाचरेत्॥ इष्टदेव्याः पूजनार्थं कुर्य्यात् स्नानं जला
शये॥ यन्त्रतन्त्रप्रकाशे॥ अहरेनु दिते मन्त्री तीर्थे वा विमले जले॥ वैदिकं
स्नानमाचार्य्य तान्त्रिकं स्नानमाचरेत्॥ इति वैदिकस्नानानन्तरं तान्त्रिकस्ना
नं॥ गन्धर्व्वतन्त्रे॥ प्रणवं पूर्व्वमुच्चार्य्य तद्दिने परतस्ततः॥ तद्दिने तत्समाभाष्य
कर्म्म कुर्य्याद्विचक्षणः॥ स्मरणात् कर्म्मणामाद्ये ब्रह्मभूयाय कल्पते॥ इति
तत्सदिति निर्द्देशफलं॥ तोडलतन्त्रे॥ अद्येत्यादि समुच्चार्य्य सौरमासं
समुच्चरेत्॥ देवताप्रीतये पश्चात् ब्रूयाच्च शुद्धवारि पा॥ कुलचूडामणौ॥
कुम्भरक्ते हरिनीला विविधा मम मूर्त्तयः॥ तत्रयः कुलगाः प्रोक्ताः सततु
पे परामृषन्॥ दिव्यं सर्व्वमयो यच्च पातालेम्भूत सम्भवं॥ आवान्तः कु
लद्रव्येण सद्भर्भकुलपुण्डकं॥ कुलपात्रं सदुर्व्वञ्च सतिलं सजलं ततः॥
गृहीत्वा कुलदेवस्य प्रीतये स्नानमाचरेत्॥ कृतसङ्कल्प एवादौ कुलेच
क्रे जलेन्यसेत्॥ कुलपात्रं ताम्रपात्रं॥ कुलचक्रं त्रिकोणमिति सङ्क
ल्पविधिः॥ मत्स्यसूक्ते॥ नित्ये नैमित्तिके काम्ये पित्र्ये दैवतकर्म्मणि
सङ्कल्पपूर्व्वकं कर्म्म अन्यथा न फलं स्मृतं॥ इति संकल्पाकरणे
दोषः॥ सङ्कल्पार्थं निषिद्ध विहितपात्रमपि तत्रैव॥ शाक्ते शङ्खं महा
सेश्च कांश्यरौप्यादिभिस्तथा॥ सङ्कल्पो नैव कर्त्तव्यो मृन्मयेश्च क
दाचन॥ इति सङ्कल्पे निषिद्धपात्रं॥ गृहीत्वोदुम्बरं पात्रं सौवर्णञ्च
विशेषतः॥ सङ्कल्पन्तु वुधः कुर्य्यान्मेध्यपात्रपुटेन वा॥ इति सङ्कल्पे
विहितपात्रं॥ तत्रैव॥ स्नानकालेतु हस्तेन ताम्रपात्रेण वा ततः॥ पे
त्के श्राद्धपात्रेण दैवे शङ्खः प्रशस्यते॥ इति कर्म्मविशेषे पात्रविशेषः

ततो मूलमुच्चार्य्य अमुकदेवतां तर्प्पयामि नमः॥ इति विष्णुविधि॥ तथा
च गौतमीये॥ आदौ मन्त्रं समुच्चार्य्य श्रीपूर्व्वं कलमित्यपि॥ तर्प्पया
मि पदञ्चोक्त्वा नमोन्तं तर्प्पयेत्ततः॥ अन्यत्र मूलमुच्चार्य्य अमुक =
देवतां तर्प्पयामि॥ तथा च॥ तर्प्पयामि पदं योज्यं मन्त्रान्ते षेषु नाम

द्वितीयान्तेषु चेत्येवं तर्पणस्य मनुर्म्मतः ॥ शक्तिविषयेपुनः ॥ मूलमुच्चार्य्य
अमुकदेवीं तर्प्पयामि स्वाहा ॥ होमतर्प्पणयोः स्वाहेतितन्त्रवचनात्
तथाच नीलतन्त्रे ॥ मन्त्रान्तेनमउच्चार्य्य तर्प्पयामिततः परं ॥ स्वाहान्तं
तर्प्पणन्त्वेवं पञ्चविंशति संख्यया ॥ विशुद्धेश्वरे ॥ विद्यांपूर्वं समुच्चार्य्य
तदन्तेदेवताभिधां ॥ तर्प्पयामीतिसंप्रोक्ता स्वाहान्त स्तर्प्पणेमतः ॥ पञ्चविं
शतिसंख्या वा दशधा वा त्रिधापि वा ॥ मूलमन्त्रं समुच्चार्य्य श्रीकलसं
तर्प्पयेत्सुधीः ॥ इतिगौतमीयात् पञ्चविंशतिवारं दशधा त्रिधा वा ।
सन्तर्प्पयेत् ॥ अत्रश्रीकलसमित्युपलक्षणं ॥ शक्तिविषयेत्रिधातर्प्पणं ॥
स्नानकर्म्मणि संप्राप्ते मूर्ध्निमन्त्री जलाञ्जलिं ॥ विदधयाच्च त्रिशः कुर्यात्
पूतात्स्त्रिरपः पिबेत् ॥ तर्प्पणञ्च त्रिधाभूयस्त्रिधा च प्रोक्षणं ततोरि
तिकुलामृतवचनात् ॥ ततआवरणदेवता प्रत्येकेन सकृत्तर्पयेत् ॥ तत्राश
तथाच कुलार्णवे ॥ एकैकमञ्जलिन्तोयं परिवारान्प्रतर्प्पयेत् ॥ तत्राश
क्तश्चेन्मूलमन्त्रमुच्चार्य्य इष्टदेवतामात्रं सन्तर्प्पयेत् ॥ तथाच ॥ अश
क्तौ मूलमुच्चार्य्य देवीमात्रं प्रतर्प्पयेत् ॥ ततो जलादुत्थाय धौतवाससीप
रिधायाचम्य ह्रीं हंसः इदमर्घ्यं सूर्य्याय स्वाहा ॥ तारादौ तु ह्रीं हंसः
मार्त्तण्डभैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं स्वाहा ॥ तन्त्रान्तरे ॥
सूर्य्यमन्त्रं समुच्चार्य्य मार्त्तण्डभैरवाय च ॥ प्रकाशशक्तिसहिताय इदमर्घ्यं
ततः पठेत् ॥ स्वाहान्तं मन्त्रमुच्चार्य्य अर्घ्यं दत्वा जपेन्मनुं ॥ श्रीविद्याविषयेतु ॥ ऐं ह्रीं श्रीं ह्रौं ह्रीं सः मार्त्तण्डभैरवाय प्रकाशशक्तिस
हिताय ग्रहराशिनक्षत्रतिथियोगकरणपरिवारसहिताय इद
मर्घ्यं स्वाहा ॥ इत्यर्घ्यंदत्वा तत्तदेवतागायत्री शतधा दशधा वा ज
पेत् ॥ तथाच तन्त्रान्तरे ॥ अष्टोत्तरशतावृत्या गायत्री प्रजपेत्सुधीः ॥
महापातकयुक्तोपि प्रजपेद्दशधा यदि ॥ सत्यं सत्यं महादेवि मुक्तोभ
वतितत्क्षणात् ॥ इतिशाक्तशाक्तभेदेन गायत्री जपानन्तरं तर्प्पणं वा ॥
तथाच ॥ सूर्य्यमण्डलवासिन्यै देवतायै ततः परं ॥ अर्घ्यमञ्जलिमादा
य गायत्र्या वा त्रिरुत्क्षिपेत् ॥ यथाशक्ति जपेद्देवीं गायत्रीं परमाक्ष
रीं ॥ तर्प्पणार्थं समाचम्य प्राणानायम्य साधकः ॥ ध्यात्वा जलाञ्जलिं क्षि
प्त्वा तर्प्पयेदिष्टदेवतां ॥ इतियामलवचनात् ॥ गायत्रीतु ॥ त्रैलोक्य
मोहनाय विद्महे कामदेवाय धीमही तन्नो विष्णुः प्रचोदयात् ॥
इतिविष्णुगायत्री ॥ नारायणाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्र
चोदयात् ॥ इतिनारायणगायत्री ॥

वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि तन्नो नरसिंहः प्रचोदयात्
इतिनरसिंहगायत्री ॥ वागीश्वराय विद्महे हयग्रीवाय धीमहि तन्नो हं
सः प्रचोदयात् ॥ इतिहयग्रीवगायत्री ॥ गोपालगायत्रीतु ॥ कृष्णाय वि
द्महे दामोदराय धीमहि तन्नो विष्णुः प्रचोदयादिति ॥ दाशरथाय विद्म
हे सीतावल्लभाय धीमहि तन्नो रामः प्रचोदयात् ॥ इतिरामगायत्री ॥
तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥ इतिशिव
गायत्री ॥ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात् ॥ इ
तिगणेशगायत्री ॥ दक्षिणामूर्त्तये विद्महे ध्यानस्थाय धीमहि तन्नो धीशः
प्रचोदयात् ॥ इतिदक्षिणामूर्त्तिगायत्री ॥ आदित्याय विद्महे मार्त्तण्डा
य धीमहि तन्नः सूर्य्यः प्रचोदयात् ॥ इतिसूर्य्यगायत्री ॥ कामदेवाय
विद्महे पुष्पबाणाय धीमहि तन्नोनङ्गः प्रचोदयात् ॥ इतिकामदेवगा
यत्री ॥ सर्व्वसंमोहिन्यै विद्महे विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदया
त् ॥ इतिशक्तिगायत्री ॥ त्वरितायै विद्महे महानित्यायै धीमहि तन्नो देवी प्र
चोदयात् ॥ इतित्वरितागायत्री ॥ ऐं वागीश्वर्य्यै विद्महे क्लीं कामेश्वर्य्यै धी
महि सौस्तन्नः शक्तिः प्रचोदयात् ॥ इतिबालाभैरवीगायत्री ॥ ऐं त्रिपुरा
देव्यै विद्महे क्लीं कामेश्वर्य्यै धीमहि सौस्तन्नः क्लिन्ने प्रचोदयात् ॥ इतित्रिपु
रासुन्दरीगायत्री ॥ त्रिपुरायै विद्महे भैरव्यै धीमहि तन्नो देवी प्रचोदयादि
ति ॥ इतिभैरवीगायत्री ॥ महादेव्यै विद्महे दुर्गायै धीमहि तन्नो देवी प्रचो
दयात् ॥ इतिदुर्गागायत्री ॥ नारायण्यै विद्महे दुर्गायै धीमहि तन्नो गौरी
प्रचोदयात् ॥ इतिजयदुर्गागायत्री ॥ महालक्ष्म्यै विद्महे महाश्रियै धी
महि तन्नः श्रीः प्रचोदयात् ॥ इतिलक्ष्मीगायत्री ॥ वाग्देव्यै विद्महे
कामराजाय धीमहि तन्नो देवी प्रचोदयात् ॥ इतिसरस्वतीगायत्री ॥
नारायण्यै विद्महे भुवनेश्वर्य्यै धीमहि तन्नो देवी प्रचोदयादिति ॥ इति
भुवनेश्वरीगायत्री ॥ भगवत्यै विद्महे माहेश्वर्य्यै धीमहि तन्नोन्नपूर्णा प्र
चोदयात् ॥ इतिअन्नपूर्णागायत्री ॥ महिषमर्द्दिन्यै विद्महे दुर्गायै धीम
हि तन्नो देवी प्रचोदयादिति ॥ इतिछिन्नमस्तागायत्री ॥ कालिकायै विद्महे श्मशा
नवासिन्यै धीमहि तन्नो घोरे प्रचोदयात् ॥ इतिकालिगायत्री ॥ तारायै वि
द्महे महोग्रायै धीमहि तन्नो देवी प्रचोदयात् ॥ इतितारागायत्री ॥ गरु
डाय विद्महे सुपर्णाय धीमहि तन्नो गरुडः प्रचोदयात् ॥ इतिगरुड
गायत्री ॥ ध्यानञ्च प्रातः ॥ उद्यदादित्यसङ्काशां पुस्तकाक्षकरां स्मरेत् ॥

कृष्णाजिनधरां ब्राह्मीं ध्यायेत्तारकितेम्बरे ॥ मध्याह्ने श्यामवर्णां चतु
र्भुजां शङ्खचक्रलसत्करां ॥ गदापद्मधरां देवीं सूर्य्यासनकृताश्रयां ॥ सायाह्ने वरदां देवीं गायत्रीं संस्मरेद्यतिः ॥ शुक्लां शुक्लाम्ब
रधरां वृषासनकृताश्रयां ॥ त्रिनेत्रां वरदां पाशं शूलं च नृकरो
टिकां ॥ सूर्य्यमण्डलमध्यस्थां ध्यायन् देवीं समभ्यसेत् ॥ त्रिपु
रादौ ध्यानविशेषो यथा ॥ प्रातराधारकमले हुतभुङ्मण्डलो
परि ॥ वाग्बीजरूपां विद्यायाविद्युद्द्युत्पलभास्वरां ॥ पुष्पबाणेक्षुको
दण्डपाशाङ्कुशलसत्करां ॥ स्वेच्छाशमहीजवपुषीं गुरुविद्याक्षरान्वि
कां ॥ मध्याह्ने हृदयाम्भोजकर्णिके सूर्य्यमण्डले ॥ कामबीजात्मि
कां देवीं मल्लिकाकवसारुणां ॥ प्रसून बाणपुण्ड्रेक्षु चापपाशाङ्कुशा
न्वितां ॥ परितः स्वात्ममुख्याभिः षट्त्रिंशत्तत्वशक्तिभिः ॥ सायं मात्रा
सरोजस्थे चन्द्रे चन्द्रसमद्युतिं ॥ शक्तिबीजात्मिकां चापबाणपाशा
ङ्कुशान्वितां ॥ युगनित्याक्षराकारां कटिकावरणान्वितां ॥ चिन्त
यित्वा भगवतीं नित्याभिः परिवारितां ॥ तारादौ तु ॥ ह्रीं हंसः इति
सूर्य्यार्घ्यं दत्वा ताम्रादिपात्रे चन्दनार्ककुसुमापराजितापुष्पाणि
निःक्षिप्य उद्यदादित्यमण्डलमध्यवर्त्तिन्यै नित्यचैतन्योदिता
यै श्रीमदेकजटायै स्वाहा ॥ इत्यर्घ्यं दत्वा गायत्रीं जपेदिति वि
शेषः ॥ तदुक्तं नीलतन्त्रे ॥ उद्यदादित्यमण्डलमध्यवर्त्तिन्यै च स
मुद्धरेत् ॥ नित्यचैतन्योदितायै स्वाहेति च मनुः स्मृतः ॥ अन्यत्र
कालिकामन्त्रे एकजटापदस्थाने कालिपदप्रयोगः ॥ ततः सूर्य्यमण्ड
ले देवतां विभाव्य मूलमन्त्रं यथाशक्ति जप्त्वा संहारमुद्रया देवतां
स्वहृदयमानीय तीर्थं नमस्कृत्य वासस्थानमाविशेदिति
स्नानविधिः ॥ ततः सामान्यार्घ्यस्थापनादि ॥ आसनोपवेशान्तं दीक्षा
पद्धत्युक्तकर्म्म समाप्य वामे ॥ ॐ गुरुभ्यो नमः ॐ परमगुरुभ्यो नमः
ॐ परापरगुरुभ्यो नमः ॥ दक्षिणे ॥ ॐ गणेशाय नमः ॥ मूर्ध्नि मूल
तथा च गौतमीये ॥ कृताञ्जलिमुच्चार्य्य अमुकदेवतायै नमः ॥ तथा च गौतमीये ॥ कृताञ्जलि
पुटो भूत्वा वामे गुरुत्रयं यजेत् ॥ गुरुञ्च परमादिञ्च परापरगुरुं त
था ॥ दक्षपार्श्वे गणेशञ्च मूर्ध्नि देवं विभावयेत् ॥ ततः फडिति
मन्त्रेण गन्धपुष्पाभ्यां करौ संशोध्य ऊर्द्ध्वोर्द्ध्वतालत्रयं दत्वा छो
टिकाभिर्दशदिग्बन्धनं कृत्वा रमिति जलधारया वह्निप्रकारं विचि

[illegible]

मज्जनप्रकारमाह ॥ तत्रैव ॥ स्रोतसोऽभिमुखो मज्जेत् सूर्य्याभिमुखतो
ऽथवा ॥ स्मरेन्नारायणं गङ्गां इष्टदेवं ततः परं ॥ मज्जनं मुक्तकेशेन बध्नीया
च्च शिखां पुनः ॥ ततः कृताञ्जलिर्भूत्वा तीर्थान्यावाहयेत्ततः ॥ ॐ गङ्गे च
यमुने चैव गोदावरि सरस्वति ॥ नर्म्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं
कुरु ॥ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ तेन सत्येन मे देव तीर्थं
देहि दिवाकर ॥ प्रियव्रतानि तीर्थानि सूर्य्यरश्मिस्थितानि च ॥ आगत्य
र्घ्यं गृहीत्वा च सर्व्वसिद्धिं प्रयच्छ मे ॥ चतुरस्रं विनिर्म्माय तत्र स्नानं दिशेत्सु
धीः ॥ राघवभट्टधृतं ॥ आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि ॥ एहि गङ्गे
नमस्तुभ्यं सर्व्वतीर्थसमन्विते ॥ इति मन्त्रैरङ्कुशमुद्रयादिमण्डलात्तीर्थमावाह्य
वह्नित्वम्भासि संयोज्य सोमसूर्य्याग्निमण्डलानि ॥ तत्र सञ्चिन्त्य वह्निमायेन्मन्त
बीजेन द्वादशधाभिमन्त्र्य कवचेनावगुण्ठ्यास्त्रेण संरक्ष्य मूलमन्त्रेणै
कादशधाऽभिमन्त्रयेत् ॥ तन्त्रमाणिक्ये वाशिष्ठसंहितायां ॥ हृन्मन्त्राङ्कुशमु
द्राभ्यां तीर्थमाकृष्य मण्डलात् ॥ अवाह्याम्भसि संयोज्य सोमसूर्य्याग्नि
मण्डले ॥ सञ्चिन्त्य मन्त्री तन्मध्ये निमज्जेत्सु समाहितः ॥ मूलमन्त्रं समा
वर्त्य मनसो लिख्य चाकृतिं ॥ ज्ञानार्णवे ॥ विन्यस्याङ्गे षडङ्गानि प्राणा
यामपुरःसरं ॥ श्रीसूर्य्यमण्डलात्तीर्थमाकृष्याङ्कुशमुद्रया ॥ वामित्वेने
न चाप्लाव्य कवचेनावगुण्ठयेत् ॥ संरक्ष्यास्त्रेण मूलेन मन्त्रयेत् रुद्रसंख्यया
निमज्य तस्मिन् श्रीदेवं ध्यायेच्छक्त्या जपेन्मनुं ॥ मत्स्यसूक्तेऽपि ॥ रुद्रसं
ख्यं जपेन्मन्त्रमाच्छाद्य मीनमुद्रया ॥ सूर्य्यायाभिमुखं तोयं निःक्षि
प्य रविसंख्यया ॥ मूलमन्त्रं समुच्चार्य्य क्षालयेच्च करद्वयं ॥ चरणं निः
स्पृत्य तोये त्रिर्निमज्य जपेन्मनुं ॥ अथ मृदालम्भनं विश्वसारतन्त्रे ॥
मृदोदकञ्च गङ्गायां प्रक्षाल्य त्वा विधानतः ॥ स्नानं कुर्व्वीत विधिना महाका
लवचो यथा ॥ मृत्तिकालम्भनप्रकारस्तु ॥ मन्त्रतन्त्रप्रकाशे ॥ मूलेनानी
य मृत्स्नां तु त्रिभागेन तत्र कारयेत् ॥ भागमेकं जले नैव क्षिपेन्मन्त्रं समु
च्चरन् ॥ एवं मूर्धादिनाभ्यन्ते तथैव परिलेपयेत् ॥ तथैव भागान्तरेण परि
लेपयेदधोभागमिति शेषः ॥ लेपनप्रकारो मत्स्यसूक्ते ॥ नासाभाले
च गण्डे च चिबुके पार्श्वयोः पदे ॥ पृष्ठे नाभ्युरुजङ्घासु निरग्ने मृत्ति
काविधिः ॥ लेपनमन्त्रस्तु तत्रैव ॥ इदं विष्णुरिति मन्त्रस्य मेधातिथि
ऋषिर्गायत्री छन्दो विष्णुर्देवता तोये मृत्तिकालम्भने विनियोगः
ॐ इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदं ॥ समूढमस्य पांसुले ॥ ॥

गोत्रलेपनमन्त्रस्तु विश्वसारे॥ ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसु
न्धरे॥ मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतं॥ ॐ उद्धृतासि वराहेण कृष्णे
ण शतबाहुना॥ नमस्ते सर्वदेवानां प्रभवारणि सुव्रते ततः॥ ॐ आधा
रः सर्वरूपस्य विष्णोरतुलतेजसः॥ तदुपाश्रयतो जाता अग्नेर्गाः प्रण
माम्यहं॥ इत्युपदिश्याम्भसि चत्रिर्निमज्जेत्ततो बुधः॥ वाशिष्ठसंहितायां॥
उत्थायाचम्य तत्पश्चात् षडङ्गन्याससंयुतः॥ आत्मानं मूलमन्त्रेण
मुद्रया कलसाख्यया॥ सप्तकृत्वाभिषिच्याथ मूलेनाभिमन्त्रितैर्जलैः
कलसमुद्रा यथा ज्ञानार्णवे॥ वामहस्ते कृतां मुष्टिं दक्षहस्तस्य पार्व्वति॥
कलसाख्या भवेन्मुद्रा सर्वपापहरा शुभा॥ सारदायां॥ कृत्वाञ्जलिपुटो
भूत्वा वामदक्षिणपार्श्वयोः॥ नत्वा गुरुं गणेशानं भूतशुद्धिं समाचरे
त्॥ करशुद्धिं समापाद्य कुर्य्यात्तालत्रयं ततः॥ ऊर्द्ध्वोर्द्ध्वमस्त्रमन्त्रेण वि
घ्नध्वमपि दीपकः॥ तेन संज्वलितं तेजो रक्षां कुर्य्यात्समन्ततः॥ चतु
र्थपटले॥ सुषुम्नावर्त्मनात्मानं परमात्मनि योजयेत्॥ योगयुक्तेन
विधिना चिन्मन्त्रेण समाहितः॥ सारदायां॥ कारणे सर्वभूतानां तत्त्वा
न्यपि विचिन्तयेत्॥ बीजभावेन लीनानि पुष्टत्क्रमात्परमात्मनि॥
तदुक्तं पिङ्गलामते॥ सङ्कल्प्यैवं ततो न्यासस्थानाद्दर्भांश्च संहरेत्॥ प्र
तिलोमेन सलयोलकारस्य हकारके॥ हलयश्च सकारेथ सलयश्च
षकारके॥ क्रमेणैवमपर्य्यन्तं लयमुत्पाद्य यत्नतः॥ अकारं ब्रह्मरन्ध्रे च स
हस्रारे नियोजयेदिति॥ सारदायां॥ ततः संशोषयेद्देहं वायुबीजेन वायु
ना॥ वह्निबीजेन तत्तेनैव सन्दहेत्सकलां तनुं॥ वायुबीजेन यकारेण वा
युना तद्रुत्य वायुना॥ तथाच भट्टहरिः॥ नीलं पटं विधेहीति लोके
पि द्वयमीक्षते॥ क्वचित्तु नीलगुणस्यैव विशिष्टस्य विधिः क्वचित्॥ गु
प्तसाधनतन्त्रे॥ भूतशुद्धिं महादेव यदि देहं न नाशयेत्॥ कुत्र स्था
ने भवेत्सृष्टिः रभूतं कुत्र सञ्चयेदिति॥ देवीसन्देहप्रश्नस्योत्तरे॥
महादेव उवाच॥ वामकुक्षौ स्थितं पापपुरुषं कज्जलप्रभं॥ तस्य सं
हरणार्थाय भूतशुद्धिः प्रकटीकृता॥ लिङ्गादेहो महेशानि तत्स्वदे
होन संशयः॥ पापदेहं भवेद्दग्धं स्वदेहं नैव नाशयेत्॥ इति शिवव
चनं॥ पापपुरुषध्यानन्तु राघवभट्टधृतं॥ ब्रह्महत्याशिरस्कं
तु स्वर्णस्तेयभुजद्वयं॥ सुरापानहृदायुक्तं गुरुतल्पकटिद्वयं।
तत्संसर्गिपदद्वन्द्वं अङ्गप्रत्यङ्गपातकं॥ उपपातकरोमाणं रक्त

खड्गचर्मधरं पापमङ्गुष्ठपरिमाणकं॥ अधोमुखं कृष्णवर्णं वा
मकुक्षौ विचिन्तयेत्॥ सारदायां॥ विश्लेषयेत्तदा दोषानम्भजेनाम्भ
ताम्भसा॥ आपादशश्चाविधेद्देहमापादतलमस्तकं॥ दोषस्वरूपपाप
पुरुषभस्म विश्लेषयेदपि वायुबीजेनैव॥ तथाच॥ गणेशविमर्शिन्यां॥ तद्भ
स्मकूटमखिलं वायुबीजोत्थवायुना॥ विकीर्य्यामृतबीजेन स्वदेहं
प्लावयेत्ततः॥ सारदायां॥ आत्मलीनानि तत्त्वानि स्वस्थाने प्रापयेत्तदा
आत्मानं हृदयाम्भोजमानयेत्परमात्मनः॥ मनुनाहं सदेवस्य कुर्य्या
न्न्यासादिकं ततः॥ तदुक्तं वाशिष्ठसंहितायां॥ सोहंमन्त्रेणजामन्त्री नादा
न्तोसिद्धिभावितः॥ ध्यात्वैवं ब्रह्मरन्ध्राच्च हृदि जीवं न्यसेदिति॥ तन्त्रगुरू
पदेशतः प्रकारो लिख्यते॥ ॐ मद्येत्यादि श्रीदेवपूजाद्यधिकारसिद्ध
ये भूतशुद्धिमहं करिष्ये॥ इति सङ्कल्प्य॥ मूलाधारादुत्थितां विद्युत्स
हस्रप्रभाभास्वरां॥ विसतन्तुरूपां सुषुम्नामार्गेण हृदयकमलग
तां कुण्डलिनीं विभाव्य हृदयकमलाद्यावत् प्रदीपकलिका
कारं मुखेन्ह्रीं ब्रह्मादशार्णाम्बुजे सहस्रदलगतं विभाव्य तत्र जी
वात्मानं हंसमन्त्रेण परमात्मनि योजयेत्॥ ततः पादादिजानु प
र्य्यन्तं चतुरस्रं पृथिवीमण्डलं विभाव्य तत्र पादगमनक्रिया
गन्तव्या॥ गन्धघ्राणपार्थिवीब्रह्मनिवृत्तिसमानवायुसम्मत्य
ॐ ल्हीं ब्रह्मणे पृथिव्यधिपतये निवृत्तिकलात्मने हुँ फट् स्वाहा इत्यमुं
मन्त्रमुच्चार्य्य तान्॥ कुण्डलिनीद्वारा॥ अप्सु प्रविलापयेदित्यप्स्था
ने संहरेत्॥ जान्वादिनाभिपर्य्यन्तं शुक्लमर्द्धचन्द्राकारं जलमण्डलं
विभाव्य तत्र हस्तादानदातव्य रस रसना जलाधिलु प्रतिष्ठेदानि
लस्य॥ ॐ ल्हीं विष्णवे जलाधिपतये प्रतिष्ठाकलात्मने हुँ फट् स्वा
हा॥ इत्यमुं मन्त्रमुच्चार्य्य॥ तान्सर्वान् कुण्डलीद्वारा॥ अग्नौ प्रवि
लापयामीत्यग्निस्थाने संहरेत्॥ नाभ्यादिहृदपर्य्यन्तं त्रिकोणं व
ह्निमण्डलं॥ रक्तवर्णं विभाव्य तत्र वायुविसर्जनीयरूप चक्षुस्ते
जो रुद्रविद्याख्यानानिलं संस्मृत्य॥ ॐ ह्रूँ रुद्राय तेजोधिपतये विद्या
कलात्मने हुँ फट् स्वाहा॥ इत्यमुं मन्त्रमुच्चार्य्य तान् सर्वांश्च कुण्ड
लिनीद्वारा॥ वायौ प्रविलापयामीति वायुस्थाने संहरेत्॥ ततो हृद
यादिभ्रुपर्य्यन्तं कृष्णवर्त्तुलं षड्बिन्दुलाञ्छितं वायुमण्डलं विभाव्य

तद्यथा ॥ स्वाङ्के उत्तानौ करौ कृत्वा सोऽहमिति जीवात्मानं हृदयस्थं दीपकलिकाकारं मूलाधारस्थितकुलकुण्डलिन्या सह सुषुम्नावर्त्मना मूलाधारस्वाधिष्ठानमणिपूरकानाहतविशुद्धाज्ञाख्य षट् चक्राणि भित्वा शिरोऽरस्थिताधोमुखसहस्रदलकमलकर्णिकान्तर्गतपरमात्मनि संयोज्य तत्रैव पृथिव्यप्तेजोवाय्वाकाशगन्धरसरूपस्पर्शशब्दनासिकाजिह्वाचक्षुस्त्वक्श्रोत्रपाणिपादपायूपस्थप्रकृतिमनोबुद्ध्यहङ्काररूपचतुर्विंशतितत्त्वानि विलीनानि विभाव्य यमिति वायुबीजं धूम्रवर्णं वामनासापुटे विचिन्त्य ॥ तस्य षोडशवारजपेन वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा वामकुक्षिस्थकृष्णवर्णपापपुरुषेण सह देहं संशोष्य तस्य द्वात्रिंशद्वारजपेन दक्षिणनासया वायुं रेचयेत् ॥ दक्षिणनासापुटे रमिति वह्निबीजं रक्तवर्णं ध्यात्वा तस्य षोडशवारजपेन

तत्रापस्थानं तद्विषय स्पर्शप्रत्यय वायवीव शान्त्यपानान् संस्मृत्य ॐ हौं ईशानाय वाय्वधिपतये शान्तिकलात्मने हुं फट् स्वाहा ॥ इत्यमुं मन्त्रमुच्चार्य्य तान् सर्वान् कुण्डलिनीद्वारा आकाशे प्रविलापयामीत्याकाशस्थाने संहरेत् ॥ ततो भ्रूमध्यादि ब्रह्मरन्ध्रान्तपर्यन्तं शुक्लवर्त्तुलमाकाशमण्डलं विभाव्य तत्र वाग्वदनवक्त्रश्रोत्रशब्दश्रोत्राकाश सदाशिव शान्त्यतीत प्राणान् संस्मृत्य ॐ हौं सदाशिवाय आकाशाधिपतये शान्त्यतीतकलात्मने हुं फट् स्वाहा ॥ इत्यमुं मन्त्रमुच्चार्य्य तान् सर्वान् कुलकुण्डलिनीद्वारा अहङ्कारे प्रविलापयामीत्यहङ्कारे प्रविलाप्य महत्तत्त्वं मायाकालसंज्ञक शब्दब्रह्मस्वरूपायां कुण्डलिन्यां प्रकृतौ प्रविलापयामीति प्रविलाप्य तां तथाविधां नित्यशुद्धस्वभावे परमब्रह्मणि ॥ प्रविलापयामीति प्रविलापयेत् ॥ तदुक्तं मन्त्रतन्त्रप्रकाशे ॥ गन्धादिघ्राणसंयुक्तां पृथिवीमप्सु संहरेत् ॥ रसादिजिह्वया सार्धं जलमग्नौ विलापयेत् ॥ रूपादि चक्षुषा सार्धं मग्निं वायौ विलापयेत् ॥ समीरमीश्वरे विद्वान् स्पर्शादित्वक् समन्वितं ॥ अहङ्कारे हवे व्योमसशब्दं तन्महत्यपि ॥ महत्त्व सत्वेशात्मानमव्यक्ते कारणे परे ॥ सच्चिदानन्दरूपं यत्त्वे सत्वं परमं पदं ॥

वायुना देहमापूर्य्य नासापुटौ धृत्वा तस्य चतुःषष्टिवारजपेन कुम्भकं कृत्वा पापपुरुषेण सह देहं मूलाधारस्थितवह्निना दग्ध्वा तस्य द्वात्रिंशद्वारजपेन वामनासया भस्मना सह वायुं रेचयेत् ॥ ठमिति चन्द्रबीजं शुक्लवर्णं वामनासिकायां ध्यात्वा तस्य षोडशवारजपेन ललाटे चन्द्रं नीत्वा नासापुटौ धृत्वा वमिति वरुणबीजस्य चतुःषष्टिवारजपेन तस्माल्ललाटचन्द्राद्गलितसुधया मातृकावर्णात्मिकया समस्तदेहं विरच्य लमिति पृथ्वीबीजस्य द्वात्रिंशद्वारजपेन देहं सुदृढं विचिन्त्य दक्षिणेन वायुं रेचयेत् ॥ मात्रासंख्याप्यत्रैवा ॥ तदुक्तं गौतमीये ॥ सुषुम्नावर्त्मना सोऽहमिति मन्त्रेण योजयेत् ॥ सहस्रारे शिवस्थाने परमात्मनि दीपिकः ॥ धूम्रवर्णं ततो वायुबीजं षड्बिन्दुलाञ्छितं ॥ पूरयेदिडया वायुं सुधीः षोडशमात्रया ॥ मात्रया तु चतुःषष्ट्या कुम्भयेच्च सुषुम्नया ॥

पार्थिव्यादिक्रमात् सर्वं तत्र लीनं विचिन्तयेत् ॥ ततः शरीरस्थपापपुरुषस्य ऋषिः सत्यं देवता प्रकृतिपुरुषं छन्दः शोधने विनियोगः ॥ इत्युक्त्वा ॥ वामकुक्षिस्थितं कृष्णरूपं पापपुरुषं विचिन्त्य यमिति वायुबीजस्याकिञ्चिन्द ऋषिर्वायुर्देवता जगती छन्दः शरीरपापपुरुषशोधने विनियोगः ॥ इत्युक्त्वा ॥ नाभिमूले बिन्दुद्वयलाञ्छितमण्डले यं विचिन्तयेत् ॥ तद्वायुबीजं धूम्रवर्णं चञ्चलध्वजसंयुक्तं धं धं शब्दयुतं सर्वशोषणं हे सदेवतमिति ध्यात्वा पूरकप्रयोगेण षोडशवारं बीजमुच्चार्य्य तद्बीजोत्थवायुना स्वशरीरस्थं पापपुरुषं शोधितं विभावयेत् ॥ ततो रमित्यग्निबीजस्य कश्यप ऋषिरग्निर्देवता त्रिष्टुप् छन्दः तद्दाहे विनियोगः ॥ इत्युक्त्वा ॥ हृदये रक्तं त्रिकोणं वह्निमण्डलं विद्याकलायुतं रुद्रदैवतमिति ध्यात्वा प्रयोगेण चतुःषष्टिवारं बीजमावर्त्य तद्बीजोत्थाग्निना तद्भस्मीभूतं विभावयेत् ॥ ततो रेचकेन द्वात्रिंशन्मात्रया पूर्वोक्तरूपं वायुबीजमावर्त्य पापपुरुषभस्म रेचयेत् ॥ ततो वमिति वरुणबीजस्य हिरण्यगर्भ ऋषिर्हंसो देवता त्रिष्टुप् छन्दः प्लावने विनियोगः ॥ इत्युक्त्वा ॥ वारुणं मण्डलं मूर्ध्नि शुभ्रं चन्द्रार्धसन्निभं ॥ सितपङ्कजयुग्माभयकरं स्याद्वरुणदेवतामिति ध्यात्वा तद्बीजोत्थसुधामृतेन तच्छरीरभस्म पिण्डीभूतं विभावयेत् ॥ ततो लमिति पृथिवीबीजस्य ब्रह्मऋषिरिन्द्रो देवता गायत्री छन्दः काठिनीकरणे विनियोगः ॥ इत्युक्त्वा ॥ धारमण्डले पृथिवीमण्डलं वज्रलाञ्छितं चतुष्कोणञ्च कठिनं पीतवर्णं इन्द्रदैवतं लं बीजेन समायुतं ध्यायन् मनसि पूर्ववत् ॥

द्वात्रिंशन्मात्रया मन्त्री रेचयेत्॥ पिङ्गलाख्यया॥ पूरयेदनया चैव सञ्चिन्त्य
नीलमारुतं॥ रक्तवर्णं वह्निबीजं त्रिकोणं स्वस्तिकान्वितं॥ तेन पूरकयो
गेन मात्रया षोडशाख्यया॥ चतुःषष्ट्या मात्रया च निर्दहेत् कुम्भकेन तु
वामपार्श्वस्थितं पापपुरुषं कज्जलप्रभं॥ ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभु
जद्वयं॥ सुरापानहृदा युक्तं गुरुतल्पकटिद्वयं॥ तत्संसर्गिपदद्वंद्वमङ्गप्रत्य
ङ्गपातकं॥ उपपातकरोमाणं रक्तश्मश्रुविलोचनं॥ खड्गचर्म्मधरं क्रुद्धमेवं
कुक्षौ विचिन्तयेत्॥ मूलाधारोत्थितेनैव वह्निना निर्दहेच्च तत्॥ एवं संद
ह्य परितो द्वात्रिंशन्मात्रया ततः॥ भस्मना संहितं मन्त्री रेचयेदिडया पुनः
वामनाड्यां चन्द्रबीजं कुन्देन्दुयुतसप्रभं॥ भालेन्दुराजे संयोज्य ततः षोड
शमात्रया॥ सुषुम्नया चतुःषष्टिमात्रया तोयबीजकं॥ ध्यात्वामृतमयीं
सृष्टिं पश्चाद्धारणरूपिणीं॥ तयो देहं विचिन्त्यैवं मनसा पिङ्गलाध्वना॥
द्वात्रिंशन्मात्रया मन्त्री लंबीजेन दृढं नयेत्॥ स्वस्थाने हंसमन्त्रेण तनसे
इति ध्यात्वा॥ तद्बीजोत्थकाठिन्येन तनुं दृढां भावयेत्॥ ततोहमित्याकाशबीज
स्य ब्रह्मर्षिराकाशं देवता पंक्तिश्छन्दः व्यूहने विनियोगः॥ इत्युक्त्वाकाश
मण्डले वृत्ते द्वादशान्ते ह्यनुज्वले॥ शान्त्यतीतात कलायुक्तं विचिन्त्याका
शदैवतमिति ध्यात्वा तद्गुण्येनाकाशेनाकाशं विभावयेत्॥ तदहमिति बीजे
नावाश्रीकरणं भवेदिति॥ एवं स्वशरीरं विचिन्त्य परमात्मनः सकाशात्सृष्टि
क्रमेण तत्त्वानि स्वस्वस्थाने प्रापयेदिति॥ ततः परमात्मनः सकाशात्सोहं मन्त्रे
ण जीवं हृदयमानयेदिति संक्षेपः॥ इयं च भूतशुद्धिरावश्यकी॥ पञ्चशु
द्धिविहीनेन कृता पूजाभिचारवेत्॥ विपरीतफलं दद्यादभक्त्या पूजनं
यथा॥ निष्कृतिर्विधिहीनानां फलं हन्ति हि कर्म्मणां॥ निशाचरोधिपत्यं च कु
रुते शङ्कराज्ञयेति॥ शैवागमोक्तेः॥ देहकारणभूतानां भूतानां यद्विशोध
नं॥ अव्ययं ब्रह्मसंयोगो भूतशुद्धिरियं मता॥ भूतशुद्धिं विना कर्म्म जप
होमार्च्चनादिकं॥ भवेत्तु निष्फलं सर्वं प्रकारेणाप्यनुष्ठितमिति॥ मत्स्यसू
क्ते॥ नत्वा गुरुं गणेशानं भूतशुद्धिं समाचरेत्॥ उभाभ्यामपि पाणिभ्या
तर्ज्जन्यङ्गुष्ठयोगतः॥ गृहीत्वायं क्षमं देवि यामित्याघ्राय निःक्षिपेत्॥
महानिर्वाणतन्त्रे॥ अङ्के निधाय च करौ उत्तानौ साधकोत्तमः॥ मनो निवे
श्य मूले च ॐकारेणैव कुण्डलीं॥ उत्थाप्य हंसमन्त्रेण पृथिव्या सहितां
ततो॥ स्वाधिष्ठाने समानीय तत्त्वं तत्त्वे नियोजयेत्॥ घ्राणादि घ्राणसं
युक्तां पार्थिवीमप्सु संहरेत्॥ रसादि जिह्वया सार्द्धं जलमग्नौ विलापयेत्॥

नैव वर्त्मना॥ जीवं तत्त्वानि चानीय स्वस्थाने स्थापयेत्ततः॥ इति कृत्वा भूत
शुद्धिं मातृकान्यासमाचरेत्॥ ततः हंस इति बीजं हृदयमानीय कुलकुण्ड
लिनीं पृथिव्यादीनि यथास्थाने स्थापयेत्॥ विशेषस्तु शाक्तविषये॥ हंस
इति जीवादिकं परमशिवसंयोज्य सोहमिति मन्त्रेण स्वस्थाने नयेत्॥ त
रूपादि चक्षुषा सार्द्धं अग्निं वायौ विलाप्य च॥ स्पर्शादित्वगयुक्तं वायुमा
काशे प्रविलापयेत्॥ अहङ्कारे हरेद्व्योम सशब्दं तन्महत्यपि॥ महत्त
त्त्वं च प्रकृतौ तां ब्रह्मणि विलापयेत्॥ एवं विलाप्य मतिमान् वामकुक्षौ
विचिन्तयेत्॥ पुरुषं कृष्णवर्णं च रक्तश्मश्रुविलोचनं॥ खड्गचर्म्मध
रं क्रुद्धमङ्गुष्ठपरिमाणकं॥ सर्वपापस्वरूपं च सर्वदाधोमुखस्थि
तं॥ ततस्तु वामनासायां यंबीजं धूम्रवर्णकं॥ संचिन्त्य पूरयेत्तेन वायुं
षोडशमात्रया॥ तेन पापात्मकं देहं शोधयेत्साधकाग्रणीः॥ नाभौ रं
रक्तवर्णं च ध्यात्वा तज्जातवह्निना॥ चतुःषष्ट्या कुम्भकेन दहेत्पापव
तीं तनुं॥ ललाटे वरुणं बीजं शुक्लवर्णं विचिन्त्य च॥ द्वात्रिंशता रेचकेन
प्लावयेदमृताम्भसा॥ आपादशीर्षपर्यन्तं भावयन्तदनन्तरं॥ उत्प
न्नं भावयेद्देहं नवीनं देवतामयं॥ पृथ्वीबीजं पीतवर्णं मूलाधारे वि
चिन्तयेत्॥ तेन दिव्यविलोकेन दृढीकुर्यान्निजां तनुं॥ हृदये हस्तमा
दाय ॐ ह्रीं क्रौं हंस उच्चरन्॥ सोहं मन्त्रेण तद्देहे देव्याः प्राणान्प्रति
ष्ठयेत्॥ भूतशुद्धिं विधायेत्थं देवीभावपरायणः॥ नीलतन्त्रे॥ भूतशुद्धिं
ततो कुर्य्याच्छृणु सावहितानघे॥ आपनमूर्द्धगं कृत्वा दिव्यतत्त्वैः प्रपूर्य्य च
हंसमन्त्रेण चाधाराच्छक्तिं कुण्डलिनीं परां॥ क्रमाच्च कारणान्निर्भिद्य जी
वात्मानं ततो बुधः॥ सहस्रारं ततो नीत्वा परब्रह्मणि योजयेत्॥ इन्द्रिया
णि दशैकं च महत्तत्त्वानि तद्गुणान्॥ शुद्धं करोति चित्तानि तत्त्वानि प्रक
तेर्वपुः॥ चतुर्विंशतितत्त्वानि बीजभावेन योजयेत्॥ ततः शून्ये शरीरे
च वामभागे विचिन्तयेत्॥ निर्लेपं निर्गुणं शुद्धं स्वात्मानं तारिणीमयं
अनन्तश्लिष्टे ततो ध्यायेदाःकाराद्रक्तपङ्कजं॥ भूजस्तस्योपरि ध्यायेत्
ऊँकारं नीलसन्निभं॥ ततो ऊँकारबीजेन कर्णिकाबीजभूषितं॥ कर्णपरि
गतं ध्यायेदात्मानं तारिणीमयं॥ तथा॥ वक्ष्यादौ रक्तवर्णं तन्मात्रकं शोपी
तरूपिणं॥ मारणाच्च अटधूम्रं कृष्णं तत्तदपेक्षया॥ एवं भूतं स्वमात्मा
नं ध्यायेच्च तारिणीमयं॥ विश्वसारतन्त्रे॥ यमिति वायुबीजेन षोडशेन तु
पूरयेत्॥ चतुःषष्ट्या च तेनैव पापदेहं प्रशोधयेत्॥ तेन बीजेन विधिना

याच तन्त्रान्तरे॥ सोहमेवं समाभाष्य जीवं हृदि समानयेत्॥ शूद्रे तु विशेषो
वाराहीतन्त्रे॥ हंसाख्यं न स्मरेत् शूद्रो भूतशुद्धौ कदाचन॥ स्मरणान्नरकं
याति दीक्षा च विफला भवेत्॥ सारदायां॥ जीवं तेजोमयं ध्यात्वा नमो मन्त्रे
णयोजयेत्॥ भूतशुद्धिपदव्युत्पत्तिमाह विशुद्धेश्वरे॥ शरीराकारभूतानां
भूतानां यद्विशोधनं॥ अव्ययब्रह्मसंयोगाद्भूतशुद्धिरियं मतेति॥ वाराहीये॥
मूलाधारात्ततो जीवं ब्रह्ममार्गेण देशिकः॥ हंसेन पुष्करे स्थाने परमात्मनि नियो
जयेत्॥ ब्रह्ममार्गः सुषुम्ना त्रिपुरासारसमुच्चये संयोज्य जीवमथ तुर्ग
ममध्यनाडीमार्गेण पुष्करनिविष्टशिवे सुषुम्ना॥ तत्र ओं सोहं इति पं
ठित्वा हृदि हस्तं दत्वा प्राणप्रतिष्ठां कुर्यात्॥ ज्ञानार्णवे॥ प्राणप्रतिष्ठा
यापश्चाज्जीवं देहे नियोजयेत्॥ मुखबन्ध्वं समुच्चार्य्य हंसस्तु विपरीतकं
उद्धरेत्परमेशानि विद्येयं त्र्यक्षरी मता॥ प्राणप्रतिष्ठा मन्त्रोयं सर्वकर्म्मा
णि साधयेत्॥ तेनैव विधिना देवी स्थिरीकुर्यात्त्रिजन्तुं॥ पुरश्चर
णचन्द्रिकायां॥ अथवान्यप्रकारेण भूतशुद्धिर्विधीयते॥ धर्म्मकन्दसमु
द्भूतं ज्ञाननालं सुशोभनं॥ ऐश्वर्य्याष्टदलोपेतं परं वैराग्यकर्णिकं॥
स्वीयहृत्कमले ध्यायेत्प्रणवेन प्रकाशितं॥ कृत्वा तत्कर्णिकासंस्थं प्र
दीपकलिकानिभं॥ जीवात्मानं हृदि ध्यात्वा मूलेसञ्चिन्त्य कुण्डलीं
सुषुम्नावर्त्मनात्मानं परमात्मनि योजयेत्॥ ततो मातृकान्यासः॥=

पिङ्गलायां च रेचयेत्॥ द्वात्रिंशन्मात्रया भस्म श्वासमार्गेण वै शनैः॥ ए
वं वारत्रयं कृत्वा भूतानां शोधनं स्मृतं॥ पूरयेत्प्रतिलोमेन वह्निवीजे
न देशिकः॥ षोडशेन चतुःषष्ट्या कुम्भयेद्रेचयेत्ततः॥ द्वात्रिंशन्मात्र
या चैव दहनं परिकीर्त्तितं॥ चतुर्द्धा च प्रजप्याथ तद्वर्णं प्रजपेत्क्रमा
त्॥ शोषणं दहनं चैव प्लावनं परिकीर्त्तितं॥ किञ्चिन्दुः कश्यपश्चैव
हिरण्यगर्भस्ततः परं॥ वीजानां ऋषयः प्रोक्ताः शृणु षट्कमले
क्षणे॥ प्राणायामं ततः कुर्यात्क्रमेण देशिकोत्तमः॥ सहस्रारे
महापद्मे चिन्तयेदिष्टदेवतां॥ यथाध्यानेयथोक्तेन गुरुमार्गेण दे
शिकः॥ तदा भूतानि तज्ज्ञानि सुगुणानि विधानतः॥ सकलाशक्ति
युक्तानि वर्णमात्रक्रमेण च॥ प्रतिलोमेन संस्थाप्य तत्त्व स्वधातु संयु
तैः॥ मूलाधारं सहस्रारं षट्चक्रक्रमयोगतः॥ व्युत्क्रमेण विचि
न्त्याथ सहस्रारं ततो बुधः॥ ओंमन्त्रे चालयेद्बीजं षट्चक्रक्रमयोगतः

तत्र मातृकाया ऋष्यादिन्यासः॥ अस्य मातृकामन्त्रस्य ब्रह्मऋषिर्गा
यत्री छन्दो मातृका सरस्वती देवता हलो बीजानि स्वराः शक्तयो मा
तृकान्यासे विनियोगः॥ शिरसि ओं ब्रह्मणे ऋषये नमः॥ मुखे ओं गाय
त्री छन्दसे नमः॥ हृदि ओं मातृकासरस्वत्यै देवतायै नमः॥ गुह्ये ओं
व्यञ्जनेभ्यो नमः॥ पादयोः स्वरेभ्यः शक्तिभ्यो नमः॥ तथा च ज्ञानार्णवे॥
मातृकां शृणु देवेशि न्यासं त्पापनिकृन्तनीं॥ ऋषिर्ब्रह्मास्य मन्त्रस्य
गायत्री छन्द उच्यते॥ देवता मातृका देवी बीजं व्यञ्जनमुच्यते॥ श
क्तयस्तु स्वरा देवी षडङ्गन्यासमाचरेत्॥ ततः कराङ्गन्यासौ॥ अं कं
खं गं घं ङं आं अङ्गुष्ठाभ्यां नमः॥ इं चं छं जं झं ञं ईं तर्ज्जनी
भ्यां स्वाहा॥ उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट्॥ एं तं थं दं
धं नं ऐं अनामिकाभ्यां हुं॥ ओं पं फं बं भं मं औं कनिष्ठाभ्यां
वौषट्॥ अं यं रं लं वं शं षं सं हं लं क्षं अः करतलपृष्ठाभ्यां फट्
एवं हृदयादिषु॥ अं कं खं गं घं ङं आं हृदयाय नमः इत्यादि॥
तथा च ज्ञानार्णवे॥ अं आं मध्ये कवर्गं तु इं ईं मध्ये चवर्गकं उं ऊं
मध्ये टवर्गं तु॥ एं ऐं मध्ये तवर्गकं॥ ओं औं मध्ये पवर्गं तु॥ विन्दुयु
क्तं न्यसेत्प्रिये॥ अनुस्वारविसर्गान्तो यशवर्गो सलक्षको॥ हृदय

एकं विभाव्य तत्स्थाने मन्त्रमेकं समभ्यसेत्॥ सोहं मन्त्रं समुच्चार्य्य सू
क्ष्मब्रह्म विचिन्तयेत्॥ तत्क्षणं निर्म्मलं देहे निर्द्वन्द्वं निष्प्रदिग्धहं
अहिंतं चिन्तयेत्तत्र मनसा बाह्ययोगतः॥ अकारादिक्षकारान्तं वर्ण
माला क्रमेण च॥ चिन्तयेत् श्वासरोधेन पूरकुम्भकरेचकैः॥ एवं
विचिन्त्य तान्वर्णान् ततश्चन्द्रमनुं स्मरेत्॥ टान्तं विन्दुसमायुक्त
मर्द्धचन्द्रविभूषितं॥ चतुर्द्धा प्रजपेन्मन्त्रं मनसा वा ना सुधीः॥ इन्दु
वीजं जपेद्देवी तस्य वीजं ततः परं॥ दूरीकृत्य विधानेन धारया सुध
या पुनः॥ ततः सञ्चिन्तयेद्देवि सर्वं मातृकामयं॥ सकलानाद
संयुक्तं स्वशक्तिसहितं ततः॥ पञ्चाशद्वर्णसंयुक्तं महाभूतसमन्वि
तं॥ पञ्चभूतात्मकं देहमनुलोमेन चिन्तयेत्॥ अन्तर्यामिऋषिस्त ^
स्य प्राणाख्यामस्य देवता॥ वक्षःस्थले दक्षहस्तं दत्वा साधकसत्त
मः॥ पूर्व्वोक्तप्राणमनुना ऋषिच्छन्दः समन्वितं॥ हंसमन्त्रेण तत्प्राण

ऋषिशिरो देवी शिखा कवचं कं तथा॥ नेत्रमन्त्रं न्यसेत् हुं नेत्रं नमः स्वाहा क्रमेण तु॥ वषट् हुं वौषट् नेत्रं च फट् नेत्रं योजयेत् प्रिये॥ षडङ्गोऽयं मातृकायाः सर्वपापहरः स्मृतः॥ अथान्तर्मातृका॥ अगस्त्यसंहितायां॥ एकैकवर्णेनैकैकपत्रान्ते विन्यसेत् प्रिये॥ अकारादिषोडशस्वरान् सविन्दून् षोडशदलकमले कण्ठमूले न्यसेत्॥ ककारादि द्वादशवर्णान् सविन्दून् द्वादशदलकमले हृदये न्यसेत्॥ डकारादि दशवर्णान् सविन्दून् दशदलकमले नाभौ न्यसेत्॥ वकारादि षड्वर्णान् सविन्दून् षड्दलकमले मूलाधारे न्यसेत्॥ हक्षवर्णद्वयं द्विदलकमले भ्रूमध्ये न्यसेत्॥ तथा च ज्ञानार्णवे॥ कण्ठपत्रान्बुजे कण्ठे स्वरान् षोडश विन्यसेत्॥ द्वादशाब्दे हृत्पद्मे कादीन् द्वादश विन्यसेत्॥ षट्पत्रमध्ये लिङ्गस्थे वकारादीन्न्यसेच्च षट्॥ आधारे चतुरो वर्णान्न्यसेद् वादीन् चतुर्दले॥ हक्षौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये॥ एवमन्तः प्रविन्यस्य मनसा तो वहिर्न्यसेत्॥ वैशम्पायनतन्त्रे॥ एकैकवर्णमुच्चार्य मूलाधारादिके नमोन्ते इति विन्यास आन्तरः परिकीर्तितः॥ अथान्तर्मातृकान्यासो मूलाधारे चतुर्दले॥ सुवर्णाभे वशषसचतुर्वर्णविभूषिते॥ षड्दले विद्रुमनिभे स्वाधिष्ठाने नलाञ्छिते॥ वभमयरलैर्युक्ते वर्णैः षड्भिश्च संवृते॥ मणिपूरे दशदले नीलजीमूतसन्निभे॥ डादिफान्तदलैर्युक्ते विद्युद्राजितमस्तके॥ अनाहते द्वादशारे प्रवालरुचिसन्निभे॥ कादिठान्तदलैर्युक्ते योगिनां हृदयङ्गमे॥ विशुद्धे षोडशदले धूम्राभे स्वरभूषिते॥ आज्ञाचक्रे तु चन्द्राभे द्विदले हक्षलाञ्छिते॥ सहस्रदलसहस्रारे ... ॥ तिष्ठतु वह्निजाया त्वं मन्त्रमेनं समुद्धरेत्॥ अकारादि क्षकारान्तं पञ्चाशद्वर्णसंयुतं॥ विचिन्त्य मनसा देहं तदा देवी भवेन्नरः॥ प्राणायामं त्रिरावृत्य बलं प्राणो मुनिः क्षिपेत्॥ अकारादि क्षकारान्ते पूरकुम्भकरेचकैः॥ प्रतिलोमानुलोमेन विचिन्त्य प्राणमावहन्॥ तत्क्षणाद्विरजो मन्त्री भवेत्सा क्षौम सदाशिवः॥ न संहेनैव मन्त्रेण देहे वीजं विनिःक्षिपेत्॥ मूलाधारं ततः प्राप्य जीवात्मानं विचिन्तयेत्॥ कुण्डलीरूपसम्भूता विद्युदग्निसमप्रभा॥ निर्मला निर्विकारस्या सर्वसिद्धिसमन्विता॥ तदन्ते विन्यसेद्देहे मातृकावर्णरूपिणी॥ मन्त्रेणानेन तां ध्यात्वा विन्यसेत्

सहस्रारे हिमनिभे सर्ववर्णविभूषिते॥ अकथादित्रिरेखात्म हलक्षत्रयभूते॥ तन्मध्ये परविन्दुश्च सृष्टिस्थितिलयात्मकं॥ एवं समाहितमना ध्यायेन्न्यासोयमान्तरः॥ ततो वाह्यमातृकाध्यानं॥ पञ्चाशल्लिपिभिर्विभक्तमुखदोःपन्मध्यवक्षःस्थलां॥ भास्वन्मौलिनिवद्धचन्द्रशकलामापीनतुङ्गस्तनीं॥ मुद्रामक्षगुणं सुधाढ्यकलसं विद्यां च हस्ताम्बुजैः॥ विभ्राणां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये॥ एवं ध्यात्वा न्यसेत्॥ तत्राङ्गुलिनियम तन्त्रे॥ ललाटे नामिकामध्ये विन्यसेन्मुखपङ्कजे॥ तर्जनीमध्यमानामा वृद्धानामा च नेत्रयोः॥ अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः॥ मध्यास्तिस्रो गण्डयोस्तु मध्यमा चौष्ठयोर्न्यसेत्॥ अनामां दन्तयोर्न्यस्य मध्यमा मूर्द्ध्नि मा.. के॥ मुखे नामा मध्यमा च हस्ते पादे च पार्श्वयोः॥ कनिष्ठानामिकामध्यास्तास्तपृष्ठे च विन्यसेत्॥ ताः साङ्गुष्ठा नाभिदेशे सर्वाः कुक्षौ च विन्यसेत्॥ हृदये च तलं सर्वमंशयोश्च ककुत्स्थले॥ हृत्पूर्वं हस्तपत्कुक्षिमुखेषु तलमेव च॥ एताश्च मातृकामुद्राः क्रमेण परिकीर्तिताः॥ अत्ताभ्यां विना सेत् यस्तु न्यासः स्यात्तस्य निष्फलः॥ इति गौतमीये॥ ललाटमुखवृत्तक्षिश्रुतिघ्राणेषु गण्डयोः॥ ओष्ठदन्तोत्तमाङ्गास्यदोःपत्सन्ध्यग्रकेषु च॥ पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयेंशके॥ ककुद्यंशे च हृत्पूर्वं पाणिपादयुगे तथा॥ जठराननयोर्न्यस्य मातृकार्णान् यथाक्रमं॥ तद्यथा॥ ॐ अं नमो ललाटे ॐ आं नमो मुखवृत्ते इं ईं चक्षुषोः ऋं ॠं नसोः लृं ॡं गण्डयोः॥ एं ओष्ठे ऐं अधरे ओं ऊर्द्ध्वदन्ते औं अधोदन्ते अं ब्रह्मरन्ध्रे अः मुखे॥ कं दक्षवाहुमूले खं कूर्परे गं मणिवन्धे घं अङ्गुलिमूले ङं अङ्गुल्यग्रे॥ एवं चं छं जं झं ञं वामवाहुमूलसन्ध्यग्रकेषु॥ एवं टं ठं डं ढं णं दक्षपादमूलसन्ध्यग्रकेषु॥ एवं तं थं दं धं नं वामपादमूलसन्ध्यग्रकेषु॥ पं दक्षपार्श्वे फं वामपार्श्वे वं पृष्ठे भं नाभौ मं उदरे यं हृदि रं वामवाहुमूले शं हृदादि दक्षकरे॥ षं हृदादि वामकरे॥ सं हृदादि दक्षपादे॥ हं हृदादि वामपादे लं हृदादि उदरे क्षं हृदादि मुखे॥ सर्वत्र नमोन्तेन न्यसेत्॥ तथा च॥ ओमाद्यन्तो नमोन्तो वा सविन्दुर्विन्दुवर्जितः॥ पञ्चाशद्वर्णविन्यासः क्रमाद्युक्तो मणिभिरिभिः॥ इति राघवभट्टः॥ अथ संहारमातृकान्यासः॥ अस्या ध्यानं॥ यथा॥ अक्षस्रजं हरिणपोतमुदग्रटङ्कं विद्यां करैरविरतं

ॐ अर्द्धेन्दुमौलिमरुणमरविन्दवासां वर्णेश्वरीं प्रणमत स्तनभारनम्राम्॥ न्यास
लक्षकारादि अकारान्तः॥ यथा क्षं नमो हृदादि मुखे इत्यादि॥ अपरञ्च॥ च
तुर्द्धा मातृका प्रोक्ता केवला बिन्दुसंयुता॥ सविसर्गा सोभया च रहस्यं शृणु
कथ्यते॥ विद्याकरी केवला च सोभया भुक्तिदायिनी॥ पुत्रदा सविसर्गा तु
सबिन्दुर्वित्तदायिनी॥ विशुद्धेश्वरे॥ वाग्भवाद्या च वाक्कान्ति श्रीरमाद्या श्री
प्रवृद्धये॥ हृल्लेखाद्या सर्वसिद्ध्यै कामाद्या लोकवश्यदा॥ श्रीकण्ठाद्यनि
मान्यस्य सर्वमन्त्रः प्रसीदति॥ श्रीविद्याविषये नवरत्नेश्वरे॥ वाग्भवाद्या
नमान्तास्त्र न्यस्तव्या मातृकाक्षराः॥ श्रीविद्याविषये मन्त्री वाग्भवाद्य
षट्सिद्धये॥ जामले॥ भूतशुद्धिं लिपिन्यासौ विना यस्तु प्रपूजयेत्॥ विप
रीतफलं दद्यादभक्त्या पूजनं यथा॥ सामान्यन्यासे अङ्गुलिनियमस्तु
गौतमीये॥ मनसा विन्यसेन्न्यासान् पुष्पेणैवाथवा मुने॥ अङ्गुष्ठाना
मिकाभ्यां वा चान्यथा विफलं भवेत्॥ विशेषन्यासे तु नायं नियमः॥ श्यामा
दिविद्यायां विशेषमातृकान्यासो वक्तव्यः॥ प्राणायामे अङ्गुलिनियमस्तु
ज्ञानार्णवे॥ भूतशुद्धिं ततः कुर्यात् प्राणायामक्रमेण च॥ कनिष्ठाना
मिकाङ्गुष्ठैर्यन्नासापुटधारणं॥ प्राणायामः स विज्ञेयस्तर्जनीमध्यमे
विना॥ प्राणायामो द्विविधः सगर्भो निगर्भश्च॥ तथा च॥ सगर्भो मन्त्रजापे
न निगर्भो मात्रया भवेत्॥ मात्रा च॥ वामजानुनि तद्धस्तभ्रामणं यावता भवेत्
कालेन मात्रा सा ज्ञेया मुनिभिर्वेदपारगैः॥ अथ प्राणायामः॥ मूलमन्त्रस्य
बीजस्य प्रणवस्य वा षोडशवारजपेन वामनासापुटेन वायुं पूरयेत्॥
तथा च॥ कालिकाहृदये॥ प्राणायामत्रयं कुर्यान्मूलेन प्रणवेन वा॥ अ
थवा मन्त्रबीजेन यथोक्तविधिना सुधीः॥ तस्य चतुःषष्टिवारजपेन वायुं
कुम्भयेत्॥ तस्य द्वात्रिंशद्वारजपेन वायुं रेचयेत्॥ पुनर्दक्षिणेनापू
र्य उभाभ्यां कुम्भयित्वा वामेन रेचयेत्॥ पुनर्वामेनापूर्य उभाभ्यां
कुम्भयित्वा दक्षिणेन रेचयेत्॥ सारसमुच्चये॥ विपरीतमतो विदधीत बुधः
पुनरेव तु तद्विपरीतमिति॥ योगिके पुनर्मात्रानियमः॥ तथा च गौतमीये
मन्त्रप्राणायामः प्रोक्तो योगिकं कथयामि ते॥ पूरयेद्वामया विद्वान्
मात्राषोडशसंख्यया॥ इति॥ यद्वा चतुःषोडशाष्टवारजपेन पूरका
दिकं कुर्यात्॥ अथवा एकचतुर्द्विवारेण॥ तथा च तन्त्रान्तरे॥ पूर
येत् षोडशभिर्वायुं धारयेच्च चतुर्गुणैः॥ रेचयेत् कुम्भकार्द्धेन अश
क्तानां तु रीयकैः॥ तदशक्तौ तच्चतुर्थैः स्यादेवं प्राणस्य संयमः॥ अस्मिन्प्रसंगे

सगर्भप्राणायामं विना मन्त्रपूजनेन हि योग्यता॥ निबन्धे॥ आदावन्ते च यत्नेन
प्राणायामं समाचरेत्॥ कर्म्मस्वपि समस्तेषु शुभेष्वशुभेषु च॥ गोपाले
तु विशेषो वक्तव्यः॥ ततः पीठन्यासः॥ ॐ आधारशक्तये नमः एवं प्रकृत्यै कू
र्म्माय अनन्ताय पृथिव्यै क्षीरसमुद्राय श्वेतद्वीपाय मणिमण्डपाय क
ल्पवृक्षाय मणिवेदिकायै रत्नसिंहासनाय एतान् सर्वं हृदि ततो दक्षिण
स्कन्धे धर्म्माय वामस्कन्धे ज्ञानाय वामोरौ वैराग्याय दक्षिणोरौ ऐश्व
र्य्याय मुखे अधर्म्माय वामपार्श्वे अज्ञानाय नाभौ अवैराग्याय वा
मपार्श्वे अनैश्वर्य्याय सर्वत्र प्रणवादिनमोन्तेन न्यसेत्॥ तथा च शार
दायां॥ अंसोरुयुग्मयोर्विद्वान् प्रादक्षिण्येन साधकः॥ धर्म्मं ज्ञानं च वैराग्य
मैश्वर्य्यं क्रमशः सुधीः॥ मुखपार्श्वे नाभिपार्श्वे च धर्म्मादीन् प्रकल्प
येदिति॥ पुनश्च हृदि॥ ॐ अनन्ताय नमः एवं पद्माय अं सूर्य्यमण्डला
य द्वादशकलात्मने नमः॥ ॐ सोममण्डलाय षोडशकलात्मने नमः
मं वह्निमण्डलाय दशकलात्मने नमः सं सत्त्वाय रं रजसे तं तम
से ॐ आत्मने पं परमात्मने ह्रीं ज्ञानात्मने नमः इत्यन्तं विन्यस्य हृ
त्पद्मस्य पूर्वादिके शरेषु पीठशक्तीर्मध्ये पीठमनुं च न्यसेत्॥ तथा शा
रदायां॥ अनन्तं हृदये पद्मे तस्मिन् सूर्य्येन्दुपावकान्॥ एषु स्वस्वकला
न्यस्य नामाद्यक्षरपूर्व्वतः॥ सत्त्वादीन् त्रिगुणान् न्यस्य तथैवात्र गुरूत्त
मः॥ आत्मानमन्तरात्मानं परमात्मानमेव च॥ ज्ञानात्मानं प्रविन्यस्य
न्यसेत्पीठमनुं ततः॥ ततः ऋष्यादिन्यासः॥ ऋषिस्तु॥ महेश्वरमुखा
ज्ज्ञात्वा यः साक्षात्तपसा मनुं॥ संसाधयति शुद्धात्मा स तस्य ऋषिरी
तः॥ गुरुत्वान्मस्तके चास्य न्यासस्तु परिकीर्त्तितः॥ सर्व्वेषां मन्त्रतत्त्वानां छा
दनाच्छन्द उच्यते॥ अक्षरत्वात्पदत्वाच्च मुखे छन्दः समीरितं॥ सर्व्वेषामे
व जन्तूनां भावनं त्वेतत्तेन तथा॥ हृदयाम्भोजमध्यस्था देवता तत्र तां न्य
सेत्॥ ऋषिच्छन्दोपरिज्ञानान्न मन्त्रफलभाग्भवेत्॥ दौर्बल्यं याति मन्त्रा
णां विनियोगमजानतां॥ तन्त्रान्तरे॥ ऋषिं न्यसेन्मूर्द्धिदेशे छन्दस्तु
मुखपङ्कजे॥ देवतां हृदये चैव बीजन्तु गुह्यदेशके॥ शक्तिं च पादयोश्चैव
सर्व्वाङ्गे कीलकं न्यसेत्॥ ततस्तन्मन्त्रोक्तन्यासान् कुर्यात्॥ तदुक्तं ज्ञानार्ण
वे॥ आगमोक्तेन विधिना नित्यं न्यासं करोति यः॥ देवताभावमाप्नोति म
न्त्रसिद्धिः प्रजायते॥ यो न्यासकवचच्छन्नो मन्त्रं जपति तं प्रिये॥ दृष्ट्वा वि
घ्नाः पलायन्ते सिंहं दृष्ट्वा यथा गजाः॥ अकृत्वा न्यासजालं यो मूढवा
त्प्रजपेन्मनुं॥ सर्वविघ्नैः स बाध्यः स्याद्व्याघ्रैर्मृगशिशुर्यथा॥ अङ्गन्या

तेअङ्गुलिनियमस्तु॥त्रिद्व्येकदशैकत्रिद्विसंख्यायाशैलसम्भवे॥
अङ्गुलीनामिमितिवचनादितिसर्व्वत्रसाधारणं॥ जामले॥ हृदयंम
ध्यमानामातर्ज्जनीभिःस्मृतंशिरः॥मध्यमातर्ज्जनीभ्यांस्यादङ्गुष्ठे
नशिखातथा॥दशभिःकवचंप्रोक्तंतिसृभिर्नेत्रमीरितं॥प्रोक्ताङ्गुली
भ्यामस्त्रंस्यादङ्गुलज्ञैरियंमता॥इति॥तिसृभिस्तर्ज्जनीमध्यमानामा
भिः॥तर्ज्जनीमध्यमानामाप्रोक्तानेत्रत्रयेक्रमात्॥यदिनेत्रद्वयंप्रोक्तं
तदातर्ज्जनिमध्यमे इतिराघवभट्टधृतवचनात् हृदयादिषुविन्यस्येद्दंग
मन्त्रान्सतःसुधीः हृदयायनमः ऊर्द्ध्वशिरसेवह्निवल्लभः शिखायैवषडित्यु
क्तंकवचायहुमीरितं॥नेत्रत्रयायवौषट्स्यादस्त्रायफडितिक्रमात्
षडङ्गमन्त्रानित्युक्तान्षडङ्गेषुनियोजयेत्॥पञ्चाङ्गानिमनोर्यत्रतत्र
नेत्रमनुंत्यजेत्॥इतिसारदावचनं॥वेष्टयेत्तुअनङ्गुष्ठाऋजवोहस्तशा
खाभवेन्मुद्राहृदयेशीर्षकेऽपिच॥अधोङ्गुष्ठाखलुमुष्टिःशिखायांकर
द्वन्द्वाङ्गुलयोवर्म्मणिस्युः॥नाराचमुष्ट्युद्धृतबाहुयुग्मकाङ्गुष्ठतर्ज्जन्यु
दितोध्वनिस्तु॥विष्वग्विशक्तोकथितास्त्रमुद्रायत्राक्षिणितर्ज्जनीमध्य
मेच॥अङ्गहीनस्यमन्त्रस्यस्वेनैवाङ्गानिकल्पयेत्॥तथाचब्रह्मजामले॥
स्वनामाद्यक्षरंबीजंसर्व्वेषामभिधीयते॥ततस्तत्तत्कल्पोक्तमुद्रांप्रदर्श्य
ध्यानंकृत्वा॥मानसैःसंपूज्यशङ्खस्थापनंकुर्यात्॥तथाचसनत्कुमार
तन्त्रे॥अकृत्वामानसंयागंनकुर्याद्बहिरर्च्चनं॥शङ्खस्थापनन्तुदीक्षाप्रक
रणेउक्तं॥ततःशरीरेधर्म्मादिपूजा॥तथाचसारदायां॥न्यासक्रमेणदेहेषु
धर्म्मादीन्पूजयेत्ततः॥पुष्पाद्यैःपीठमन्त्रान्तंतस्मिन्नावरदेवतां॥इतिदर्श
नात्शरीरेपीठपूजा॥पीठस्योत्तरेगुरुपङ्क्तीःपूजयेत्॥यथावायव्या
दीशपर्य्यन्तं ॐगुरुभ्योनमः ॐपरमगुरुभ्योनमः ॐपरापरगुरुभ्यो
नमः॥ ॐपरमेष्ठिगुरुभ्योनमः॥त्रिपुरादौतुविशेषगुरुपूजावक्ष
्या॥पीठमध्ये ॐआधारशक्तयेनमः॥एवंप्रकृतयेकूर्म्मायशे
षायपृथिव्यैक्षीरसमुद्रायश्वेतद्वीपायमणिमण्डपायकल्पवृक्षा
यमणिवेदिकायैरत्नसिंहासनायअग्निकोणेधर्म्मायनिर्ऋति
वायुकोणेऽनेष्ठुज्ञानंवैराग्यंऐश्वर्य्यञ्चपूजयेत्॥ततःपूर्व्वादिदिक्षुअध
र्म्माज्ञानावैराग्यानैश्वर्य्यान्पूजयेत्॥मध्येअनन्तादिह्रींज्ञानात्म
नेनमः॥इत्यन्तंसंपूज्य॥पूर्व्वादिकेशरेषुतत्तत्कल्पोक्तपीठश
क्तीःसंपूज्य मध्येपीठमनुंप्रपूजयेत्॥तारादिविद्यादौतुविशे
षोवक्तव्यः॥पूर्व्वादिदिङ्नियमस्तु॥जामले॥पूजापूजकयोर्म्मध्ये

प्राचीतिकथ्यतेबुधैः॥तद्दक्षिणंदक्षिणंस्यात्तद्वामंचोत्तरंस्मृतं॥पृष्ठन्तुप
श्चिमंज्ञेयंसर्व्वत्रैवंप्रयोजयेत्॥अनेनविधिनामन्त्रीपूर्व्वादौपूजनंचरे
त्॥अविशेषेयन्त्रनियमस्तु मात्स्यसूक्ते॥अनुक्तकल्पेयन्त्रन्तुलिखेत्पद्मं
दलाष्टकं॥षट्कोणकर्णिकंतत्रवेदद्वारोपशोभितं॥ततःपुनर्ध्या
त्वाआवाहनादिप्रतिष्ठान्तंकर्म्मकुर्य्यात्॥आवाहनेतुविशेषोयथा
आगमकल्पद्रुमे॥मूलमन्त्रंसमुच्चार्य्यसुषुम्नावर्त्मनासुधीः॥आनीय
तेजःस्वस्थानान्नासिकारन्ध्रनिर्गतं॥करस्थमातृकाम्भोजेचैतन्यंपुष्प
सञ्चये॥संयोज्यपुष्पमध्येनसंस्थाप्यावाहयेत्ततः॥ततःषोडशोप
चारैःपञ्चोपचारैर्व्वापूजयेत्॥षोडशोपचारनियमस्तु आसनंस्वा
गतंपाद्यमर्घ्यमाचमनीयकं॥मधुपर्काचमनस्नानंवसनाभरणानिच॥सु
गन्धिसुमनोधूपदीपनैवेद्यवन्दनं॥प्रयोजयेदर्च्चनायामुपचारांस्तुषोड
श॥अथवा एषामभावेपञ्चोपचारान्कल्पयेत्॥गन्धाद्योनैवेद्यान्ता
पूजापञ्चोपचारिकाइति॥विष्णुविषयेतु अर्घ्याद्याःपञ्चपञ्चवगन्धाद्याइति
भेदतः॥प्रयोजयेदर्च्चनायामुपचारान्दशक्रमात्॥ततःपुष्पपर्य्यन्त
अथासनंमातृकाभेदतन्त्रेचतुरङ्गुलविस्तारमित्यादि॥अथपाद्यंप्रपञ्चसारे॥पाद्यंश्या
माकदूर्व्वाब्जविष्णुक्रान्ताभिरिहच्यते॥इतिपाद्यं॥अथार्घ्यं॥गन्धपुष्पाक्षत
यवकुशाग्रतिलसर्षपाः॥दूर्व्वाचेतिक्रमादर्घ्यद्रव्याष्टकमुदीरितं॥शाक्ते
यार्घ्यविशेषोयोगिनीतन्त्रे॥वक्त्रधान्योद्भवंयच्चसूक्ष्मधान्योद्भवंतथा॥तत्तु
ण्डुलमक्षुण्णंसप्ताष्टनवसंख्यया॥दूर्व्वाङ्कुरसमेतञ्चभगवत्यैनिवेद
येत्॥अष्टम्यांवानवम्यांवासोऽश्वमेधफलंलभेत्॥इत्यर्घ्यं॥अथाचमनीयं॥
जातीलवङ्गकक्कोलैर्न्निर्म्मितंनाचमनीयकं॥इत्याचमनीयं॥अथमधुपर्कः॥
मधुपर्कञ्चसक्षौद्रंदधिप्रोक्तंमनीषिभिः॥सारदायां॥आज्यंदधिमधून्मिश्र
मेतदुक्तंमनीषिभिरिति॥मधुपर्कः॥अथपुनराचमनीयं॥शुद्धाभिरद्भिर्विहितं
पुनराचमनीयकं॥इतिपुनराचमनीयं॥अथगन्धः॥गन्धशब्दस्तुत्पत्ति
स्तु कुलार्णवे॥गम्भीरापारदौर्भाग्यध्वंसनाप्रणकारणात्॥धर्म्मज्ञा
नप्रदानाच्चगन्धइत्यभिधीयते॥प्रपञ्चसारे॥चन्दनागुरुकर्पूरप
ङ्कंगन्धमिहोच्यते॥तद्दानफलन्द योगिनीतन्त्रे॥गन्धानुलेपनंदत्वा
ज्योतिष्टोमफलंलभेत्॥कुङ्कुमेनविलिप्यार्य्यांगोसहस्रफलंलभे
त्॥चन्दनागुरुकर्पूरैःशुक्लपुष्पैःसकुङ्कुमैः॥विष्णुंपूजयेद्दुर्गां
वह्निष्टोमफलंलभेत्॥अथगन्धाष्टकंमेरुतन्त्रे॥गन्धाष्टकंतस्यतु

मुपचारं तन्मन्त्रेण दत्वा षडङ्गेन पूजयेत्॥ पुष्पादाने तु विशेषः॥ पुष्पं वाय
पदि वा पत्रं सर्व्वं नेष्टमधोमुखं॥ दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्प
णं॥ अधोमुखं फलं नेष्टं पुष्पाञ्जलिविधौ न च॥ ततो मूलं हृद् गुह्य पा
द सर्व्वाङ्गेषु मूलेन पञ्च पुष्पाञ्जलीन् दत्वा तत्कल्पोक्तावरण
पूजां कुर्य्यात्॥ तथा च॥ पञ्च पुष्पाञ्जलीन् दत्वा परिवारार्च्चनं चरेदि
ति भट्टैः॥ ततो धूपदीपौ दद्यात्॥ तद्यथा॥ जयध्वनि मन्त्रमातः स्वाहे
ति पुष्पाक्षतैर्घण्टां संपूज्य वामहस्तेन तां वादयन्॥ तन्मन्त्रेण नी
चैर्धूपं दद्यात्॥ ततो मूलेन पुष्पाञ्जलित्रयं दत्वा नैवेद्यमानीय फ
डिति संप्रोक्ष्य चक्रमुद्रया अभिरक्ष्य तदुपरि मूलमष्टधा जप्त्वा
धेनुमुद्रया अमृतीकृत्य मूलमुच्चार्य्य नैवेद्यं दद्यात्॥ यतोय
मर्घ्यपात्रस्य तन्निधाय निवेदयेत्॥ अन्यत्रोपि चेदुक्तस्तदर्घ्यपात्र
स्थितैस्तैः॥ गन्धादि महादेवी दत्ते विधिवशानपि॥ इति वचनाद्
यावदुपचारमर्घ्यपात्रस्य जलेनोत्सृज्य दद्यात्॥ ततः पुनराचमनी
स्यदेवस्यापि प्रकीर्त्तितं॥ चन्दनागुरुकर्पूररोचनाकुङ्कुममदं॥ रक्तचन्द
नयवा संगणपत्यमुदाहृतमिति॥ गणेशगन्धाष्टकं॥ ह्रीवेरं चन्द
नं कुष्ठमगुरुं चन्दनं मुरा॥ सेव्यकञ्च जटामांसी वैष्णवं तदुदाहृ
तमिति॥ विष्णुगन्धाष्टकं॥ चन्दनागुरुकर्पूरजलकुङ्कुमरोचना
जटामांसीकपियुता शाक्तं गन्धाष्टकं विदुरिति शाक्तिगन्धाष्टकं॥ ज
लकाश्मीरकुष्ठैस्तु रक्तचन्दनचन्दनैः॥ उशीरागुरुकर्पूरैः सौरं
गन्धाष्टकं विदुरिति सौर्य्यगन्धाष्टकं॥ गोरोचनाच कुष्ठञ्च कर्पूरा
गुरुकुङ्कुमैः॥ चन्दनेन सदासञ्चैव रदेन च पत्रकं॥ सारदायां॥
चन्दनागुरुकर्पूरतमालजलकुङ्कुमं॥ कुशीतकुष्ठसंयुक्तं शै
वं गन्धाष्टकं स्मृतमिति शैवगन्धाष्टकं॥ अथ पुष्पं॥ पुष्पशब्दव्युत्प
त्तिस्तु कुलार्णवे॥ पुण्यसंवर्धनाच्चापि पापौघपरिहारतः॥ पुष्प
कलार्थप्रदानाच्च पुष्पमित्यभिधीयते॥ प्रपञ्चसारे॥ तुलस्याप
द्मजे जात्यौ केतक्यौ करवीरकौ॥ शस्तानि दश पुष्पाणि तथा रक्तो
त्पलानि च॥ उत्पलानि च नीलानि कह्लारकुमुदानि च॥ विश्वसार
तन्त्रे॥ मालती कुन्द मन्दारं नद्यावर्त्तादिकानि च॥ पलाशपाटलाप
र्ण्यपरस्त्रावनमैकानि च॥ चम्पकानि सनागानि रक्तमन्दारकानि
च॥ अशोकोद्भवबिल्वारग्वकर्णिकारोद्भवानि च॥ विश्वसारतन्त्रे॥
अथ देव्या मतं वक्ष्ये पुष्पाणि शृणु पार्वति॥ इत्युक्त्वा तुलस्यापद्म

यं दत्वा ताम्बूलं दद्यात्॥ वैष्णवे तु नैवेद्ये विशेषो वक्तव्यः॥ ततः स
परिवारदेवतां गन्धादिभिरभ्यर्च्चयन् तद्गीतैर्द्देवं सन्तोष्य जयज
येत्युक्त्वा विशेषार्घ्यं दत्वा पुष्पाञ्जलिं दद्यात्॥ दानेतु॥ आदौ मूलं
ततो द्रव्योल्लेखः ततः सम्प्रदानं ततस्त्यागार्थकपदमिति सर्व्वत्र॥
तथा च कुलार्णवे॥ आदौ मूलं समुच्चार्य्य पश्चाद्द्रव्यमुदीरयेत्॥ संप्र
दानं ततस्तेन त्यागार्थकपदं ततः॥ एवं क्रमेण देवेशि उपचारान् प्र
कल्पयेत्॥ मन्त्रान्ते कर्म्मसन्निपात इति न्यायाच्च॥ ततश्चुलुकोद
कमादाय इतः पूर्व्वं प्राणबुद्धिदेहधर्म्माधिकारतो जाग्रत्स्वप्नसु
षुप्त्यवस्थासु मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृ
तं यदुक्तं यत्कृतं तत्सर्व्वं ब्रह्मार्पणं भवतु स्वाहा मां मदीयं सकलं सम्य
गष्टकदेवतायै समर्पयामि॥ ॐ तत्सत् नमस्कारानन्तरं वा ततोष्टो
त्तरसहस्रं शतं वा जप्त्वा ॐ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं
जपं॥ सिद्धिर्भवतु मे देव त्वत्प्रसादात्त्वयि स्थिते॥ अन्यत्र गोप्त्री दे
वेत्याद्युक्तं तदनन्तरं तत्रान्यान्यानि तन्त्रेऽस्मिन् पुष्पाणि सन्ति वै प्रि
ये॥ नानादेशोद्भवानि स्युः सर्व्वकालोद्भवानि च॥ कुलानि चैव पुष्पा
णि दद्याद्देव्यै विशेषतः॥ अथ पुष्पं प्रवक्ष्यामि कर्म्मयोगे महेश्वरि
शृणुष्व परया भक्त्या यथोक्तं ब्रह्मणा पुरा॥ कमले करवीरे द्वे कुरु
ण्टे तुलसीद्वयं॥ आतकेशोकेतकेद्वे कुमारी चम्पकोत्पलं॥ कुन्दम
न्दारपुन्नागपाटलानागचम्पकं॥ आरग्वधं कर्णिकारं पावन्तीनव
मल्लिका॥ सौगन्धिकं सकुरण्टं पलाशाशोकसर्ज्जकाः॥ सिन्धुवा
रमपामार्गवाप्तलीकञ्च कामजं॥ व्याघ्रचेलं दमनकं मरुवकञ्च
ततः परं॥ लवङ्गं जलककूरं तगरञ्च जवा तथा॥ शिवपुष्पं द्रोणपुष्पं का
मराजं सुकेतकं॥ अन्यानि वनपुष्पाणि जलजस्थलजानि च॥
गिरिजानि देशजानि नानापुष्पाण्यतः परं॥ सारदायामपि॥ कम
ले करवीरे द्वे कुमुदे तुलसीद्वयं॥ जातीद्वयं केतके द्वे कह्लारं चम्पको
त्पलं॥ कुन्द मन्दार पुन्नाग पाटलानागचम्पकं॥ आरग्वधं कर्णिका
रं पावन्तीनवमल्लिका॥ सौगन्धिकं सकुरण्टं पलाशाशोकमल्लि
काः॥ धुस्तूरं सर्ज्जकं बिल्वमर्ज्जुनं मुनिपुष्पकं॥ अन्यान्यपि सु
गन्धीनि पत्रपुष्पाणि देशिकैः॥ उपदिष्टानि पूजायामाददीत विच
क्षणः॥ योगिनीतन्त्रे॥ शृणु देवि प्रवक्ष्यामि पुष्पाध्यायं समासतः॥

वीतिविशेषः॥ इतिजपंसमर्प्य स्तुत्वाष्टाङ्गप्रणामंकुर्य्यात्॥ अष्टाङ्ग
प्रणामोयथा॥ पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा वचसाम
नसाचैव प्रणामोष्टाङ्ग ईरितः॥ बाहुभ्यांचैव जानुभ्यां शिरसाव
चसा दृशा॥ पञ्चाङ्गोयंप्रणामः स्यात् पूजासुप्रवराविमौ॥ भूमौ
निपत्ययःकुर्य्यात्कृष्णेष्टाङ्गंनतिंसुधीः॥ सहस्रजन्मजंपापंत्यक्त्वा
वैकुण्ठमाप्नुयात्॥ तथाच॥ वेदविद्भ्योधरांदत्त्वायत्फलंलभतेनरः॥ त
त्फलंलभतेभक्त्याकालिकांत्वाप्रदक्षिणं॥ कृष्णस्तुपलक्षणं॥ विश्वसारे॥
शङ्खहस्तेन सर्वत्र दक्षिणंपरिकीर्त्तितं॥ नतिविशेषस्तु यामले॥
त्रिकोणकारा सर्वत्र नतिः प्रोक्ता समीरिता॥ दक्षिणाद्वायवींगत्वा
दिशान्तस्माच्च शाम्भवीं॥ ततश्च दक्षिणंगत्वानमस्कारस्त्रिकोणवत्
अर्द्धचन्द्रंमहेशस्य पृष्ठतश्चसमीरिता॥ शिवप्रदक्षिणेमन्त्री अर्द्धच
न्द्रक्रमेणतु॥ सव्यासव्यक्रमेणैव सोमसूत्रंनलङ्घयेत्॥ सोमसू
त्रंजलनिःसरणस्थानं॥ प्रसार्य्यदक्षिणंहस्तंस्वयंनम्रशिराःपुनः॥
दर्शयेद्दक्षिणंपार्श्वे मनसापिचदक्षिणं॥ त्रिधाचवेष्टयेत्सम्यग्देव

ऋतुकालोद्भवैःपुष्पैः मल्लिकाजातिकुङ्कुमैः॥ सितरक्तैस्तथापुष्पैर्नीलप
द्मैश्चपाण्डुरैः॥ किंशुकैस्तगरैश्चैव जवाकनकचम्पकैः॥ वकुलैश्चैव
मन्दारैः कुन्दपुष्पैः कुरुण्टकैः॥ धुस्तूरकादियुक्तैश्च कन्दुकागस्त्यास
म्भवैः॥ मदनैःसिन्धुवारैश्च दुर्वाङ्कुरसुकोमलैः॥ मञ्जरीभिःकु
शानाञ्च विल्वपत्रैः सुकोमलैः॥ तुलसीहेममालतीकेतमालाम
लकीतथा॥ पुन्नागंमरुपुष्पञ्च मल्लिकाञ्चनिवेदयेत्॥ करवी
रस्यकुसुमैरर्च्चयन्तिजनार्द्दनं॥ दर्शनात्तस्यदेवेशिनरकाग्निः
प्रणश्यति॥ अथकरवीरादिमाहात्म्यं॥ पुरश्चरणरत्नोल्लासे॥
करवीरंजवादेवी स्वयंकालीनचान्यथा॥ ताराचअपराचैवस्वयं
त्रिपुरसुन्दरी॥ तथा॥ करवीरजवाम्लानेतुलस्यानगनन्दिनि॥ य
दिपूर्णंस्पजेद्देवि माहात्म्यंतस्यसुन्दरि॥ वक्त्रकोटिशतेना
पिजिह्वाकोटिशतेनच॥ वर्णितुंतस्यमाहात्म्यंनशक्तोस्मिक
दाचन॥ इतिकरवीरजवाम्लानेप्राणत्यागफलं॥ शुक्लंकृष्णंत
थापीतंहरितंलोहितंतथा॥ करवीरंमहेशानिजवापुष्पंतथैव
च॥ स्वयंकालीमहामायास्वयंत्रिपुरसुन्दरी॥ अनादरेनकर्त्तव्यंके चनदेवतासुते

तायाःप्रदक्षिणं॥ एकहस्तप्रणामश्च एकंवापिप्रदक्षिणं॥ अकालेदर्श
नेविष्णोर्हन्तिपुण्यंपुराकृतं॥ देवताङ्गेआवरणदेवताविलाप्यक्षमस्वे
तिविसर्ज्जनंकृत्वा संहारमुद्रया तत्तेजःपुष्पैःसार्द्धंस्वहृदयमान
येत्॥ तथाच॥ निधायदेवतांपश्चात्स्वीयहृत्सरसीरुहे॥ सुषुम्नावर्त्मे
नायुष्मान्माघ्रायोद्वासयेत्ततः॥ ततः ऐशान्यांत्रिकोणमण्डलंकृत्वानि
र्माल्यशेषंदद्यात्॥ वैष्णवेतु॥ ॐविश्वक्सेनायनमः शाक्ते॥ ॐशेषिका
यैनमः शैवे ॐचण्डेश्वरायनमः सौर्य्ये ॐतेजश्चण्डायनमः गणेशे
ॐउच्छिष्टगणेशायनमः कालिकादौ ॐउच्छिष्टचाण्डालिन्यैनमः

कृष्णापराजितासाक्षाद्दुर्गाकालीनसंशयः॥ करवीरञ्चभुवनाद्रोणंभुवन
सुन्दरी॥ जवासाक्षाद्भगवती सर्वविद्यास्वरूपिणी॥ येसाधकाजगन्
न्मातस्त्वयन्तिशिवाप्रियं॥ एतैश्चकुसुमैश्चण्डिसाधिवोनात्रसंशयः
किंजपैः किंतपोभिर्वा किंदानैर्वा किमध्वरैः॥ येनार्च्चिताजगद्धात्री
द्रोणकृष्णाजवादिभिः॥ राजसूयाश्वमेधाद्यैर्वाजपेयाग्निहो
त्रकैः॥ फलंयज्जायतेचाण्डिनस्सर्वंकुसुमार्चनात्॥ जवाद्रोणन्त
थाकृष्णामालूरंकरवीरकं॥ साक्षाद्ब्रह्मस्वरूपञ्चमहादेव्यैनिवे
दयेत्॥ श्वेतचन्दनसंयुक्तं रक्तचन्दनलेपितं॥ योदद्याद्भक्तिभावे
नसविश्वेशोनसंशयः॥ अथसकामस्यपुष्पविशेषंतत्रैव॥ करवीर
स्यमाघस्यसहस्राणिददातियः॥ सकामान्प्राप्यचाभीष्टान्देवी
लोकेमहीयते॥ तत्रैककरवीरेणपद्मानांहेसहस्रके॥ महाघोरेम
होत्पातेमहापदिचसङ्कटे॥ महादुःखेमहारोगेमहाशोकेम
हाभये॥ पूजयेत्कालिकांतारांभुवनेशांचषोडशीं॥ बालांछिन्नां
चवगलांधूमांभीमांकरालिनीं॥ कमलांमन्त्रपूर्णांचदुर्गांदुः
खविनाशिनीं॥ सर्वविद्याजयाद्रोणकरवीरैर्मनोहरैः॥ मालूर
पत्रैःकृष्णाभिःकृष्णांसंपूज्यभूतले॥ साधकेन्द्रोमहेशानिभवे
न्मुक्तोनसंशयः॥ मुण्डमालायां॥ जपापुष्पैर्द्रोणपुष्पैःकरवीरैर्म
नोहरैः॥ कृष्णापराजितापुष्पैरब्जैश्चमरिपुष्पकैः॥ पूजयेत्

परया भक्त्या चार्चितं कांचपरमेश्वरीं॥ योगिनीतन्त्रे॥ येर्च्चयन्ति जनाध्य
क्षं करवीरैः सितासितैः॥ चतुर्युगानि देवेशि प्रीतो भवति माधवः॥
योगिनीहृदये॥ बकपुष्पं तु जानीहि तथा रुद्रजटस्य च॥ वाज
पेयस्य यज्ञस्य फलं प्राप्नोति नान्यथा॥ सर्वेषामेव पुष्पाणां प्रव
रं नीलमुत्पलं॥ नीलोत्पलसहस्रेण यस्तु मालां प्रयच्छति॥ दुर्गा
यै विधिव[…]द्देवी तस्य पुण्यफलं शृणु॥ वर्षकोटिसहस्राणि व
र्षकोटिशतानि च॥ देव्या अनुचरो भूत्वा रुद्रलोके महीतले॥ मु
ण्डमालां॥ लक्षाणां महिषैर्मेषै रजैर्दानैर्म्मरेवेः शुभैः॥ पूजि
ता सा जगद्धात्री यच्चैषा कुसुमार्च्चिता॥ महात्म्याच्चैव कृष्णायाः
कृष्णा जानाति कृत्स्न[…]शः॥ तदर्द्धं चाप्यहं देवि तदर्द्धं श्रीपतिः
सदा॥ तदर्द्धं मज्जजन्मा वै तदर्द्धं वेदसाधकः॥ अन्यपुष्पस्य मा
हात्म्यं संक्षेपाद्वच्मि शाङ्करि पश्चिमामण्डले स्वर्गे वैकुण्ठे का
लिकापुरे॥ जपादिकरवीरैश्च दलैः किं किं फलं लभेत्॥
न जानाति जगद्धात्रि कोवेद पार्वतीं विना॥ करवीरैः श्वेतरक्तैः रक्त
चन्दनमिश्रितैः॥ पूजयेत् कृष्णां तले यस्तु स विश्वेशो भवेद्ध्रुवं॥
कृष्णापराजितापुष्पैः यस्तु देवीं प्रपूजयेत्॥ सोश्वमेधसह
स्राणां फलं प्राप्य शिवां व्रजेत्॥ महाविपत्तौ यो दद्याज्जवां कृ
ष्णापराजितां॥ द्रोणं वा करवीरं वा स गच्छेत् कालिकापुरं॥ तत्रैव॥
किञ्चपाद्यैः किञ्चपाद्यैर्नैवेद्यैः किञ्च पूजनैः॥ मधुदानैर्म्म
धुपर्कैः कुम्भकैः किञ्च रेचकैः॥ पूरकैः किञ्च वा ध्यानैः प्रा
णायामैश्च किञ्च वा॥ किं जपैः किं तपोभिर्वा मन्त्रैः सोम्मासैश्च
पञ्चमैः॥ किमन्यमन्त्रैः किं तन्त्रैः किं मन्त्रैः किं च साधकैः॥ किं वे
दैः शास्त्रैः किं वा प्रमप्रानैर्म्मन्त्रसाधनैः॥ किम धरैर्म्मन्त्रपूजै
र्म्मन्त्रार्थैर्मन्त्रजीवनैः॥ किं योनिमुद्रया किं वा तीर्थैः किं ब्रह्मसाध
नैः॥ किं मातृकान्यासगणैः किं कटैः किं घटैः पटैः॥ किं काकच
ञ्चुभिः षोढान्यासैः किं धर्म्मसाधनैः॥ येनार्च्चिता महादेवी करवीरैः

तथा च॥ विश्वकसे[…]नः स्मृतो विष्णोस्तेजश्चण्डो विवस्वतः॥ इत्यादि॥
तथा च निबन्धे॥ सूर्य्यो गणपतिः पुष्पेष्वासक्तो शैवेषु चैवमेव॥ तेजश्चण्ड मयो
च्छिष्टभोजमुच्छिष्टपर्व्विकं॥ चाण्डालिनी शेषिका च्च विश्वकसेनं के
दयजेत्॥ सो जश्रति उना शम्भुना सह वर्त्तते इति सो दुर्गा तेजो गणेशः
तेतः पादोदकं पीत्वा नैवेद्यं किञ्चित् स्वीकृत्य अन्यथा योग्याय दत्वा
यथासुखं विहरेदिति॥ मत्स्यसूक्ते॥ अनिवेद्यं न भुञ्जीत मत्स्यमांसा
दिकं च यत्॥ अन्नं विष्ठा पयो मूत्रं यद्विष्णोरनिवेदितं॥ विष्णोरितिदेव

कृष्णापराजितापुष्पैः करवीरैर्मनोहरैः॥ द्रोणैस्तु केतकीपुष्पैः जवामालू
रपत्रकैः॥ पूजिताये भगवती तेषां किं कर्म्मसाधनैः॥ नित्यातन्त्रे॥ नतु
लस्या यजेत् कालीं नाक्षतैर्विष्णुमर्च्चयेत्॥ अपराजितयादमनेन सा
क्षात्तुष्टा भवेच्छिवा॥ कालिकायाश्च तारायाः करवीरमतिप्रियं॥ जवा
पुष्पं महेशानि दद्यान्न धारयेत् क्वचित्॥ रक्तोत्पलेन देवेशि कालिकां
पूजयेत् सकृत्॥ शत वर्षसहस्राणां पूजायाः फलमाप्नुयात्॥ दूर्वा
पि गर्भसंयुक्ता देवीतुष्टिकरी भवेत्॥ पुरश्चरणरसोल्लासे॥ मञ्जरीं स
सहकारस्य केशवाय निवेदयेत्॥ रुद्रजटां शिरीषं च दाडिमं क
ञ्चनं तथा॥ नीलकण्ठमयूरं च योन्या कामश्च व र्जयेत्॥ पुष्पदानेन
काम्यफलं नित्यातन्त्रे तन्त्रे वा॥ ईश्वर उवाच॥ ब्रह्महत्यादि पापा
नो प्रायश्चित्ते हरेश्वरी॥ रक्तपुष्पैर्म्महादेवि रक्तराजं प्रपूजयेत्॥ कुल्मा
चारक्रमेणैव कदिरक्षोदमाण्डितं॥ महापातककोटिश्च जन्मान्तरकृ
ता अपि॥ मासमात्रेण हन्त्येते सत्यं सत्यं न संशयः॥ लक्ष्मीस्तस्य भवे
द्गेहे सुस्थिरा वीतवन्दिते॥ जपापुष्पैर्म्महेशानि पूर्ववद्यदि पूजयेत्
मासमात्रेण नश्यन्ति सप्तजन्मकृतान्यपि॥ ब्रह्महत्यादि पापानि यत्न
वान् जायते विः॥ पूर्ववत् केतकीपुष्पैः पत्रैर्वा यदि पूजयेत्॥ मासमात्रे
ण देवेशि उपपातककोटयः॥ लभते राजतो भाग्यं साधको नात्र सं
शयः॥ शतपत्रैर्म्महेशानि पूर्ववत् पूजयेच्छिवां॥ मासमात्रेण देवे
शि सर्वपापविनाशयेत्॥ चम्पकैः पू[…]जयेद्देवि पूर्ववन्मासमात्र
कं॥ निहत्य परमं प्राणिपातकं शतजन्मजं॥ सौभाग्यं लभते मन्त्री त्रिषु

तापरं॥ तथा च भैरवतन्त्रे॥ हृदये च वहिर्द्देवीं समर्प्य विधिवत्ततः॥ नि
र्म्माल्यं च शुचौ देशे नैवेद्यं भक्षयेत्सुधीः॥ तन्त्रान्तरे॥ निर्म्माल्यं शिरसा धा
र्य्य सर्व्वाङ्गे चानुलेपनं॥ नैवेद्यं चोपभुञ्जीत दत्वा तन्मन्त्रशालिने॥

लोके पुराणवित्॥ श्वेतपद्मैर्म्महेशानि मासमात्रं प्रपूजयेत्॥ त्रिंशज्जन्मकृ
तान् पापान्नाशयेन्नात्र संशयः॥ बन्धूकैः पूर्व्ववद्देवि मास[?]मात्रं प्रपूजये
त्॥ मालती मल्लिका जाती कुन्दैः श्वेतोत्पलैः सह॥ सम्मिश्रैः पूर्व्ववद्दे
वि मा[?]मात्रं प्रपूजयेत्॥ ब्रह्महत्यादिपापानि शतजन्मकृतान्यपि
नाशयेत्परमेशानि मुक्तिस्तस्य करे स्थिता॥ रक्तोत्पलजवावह्निबन्धूककाग
स्त्यकैः शिवां॥ पूर्व्ववत्परमेशानि मासमात्रं प्रपूजयेत्॥ पातकं नाश
यित्वासौ समस्तुल्यो भवेन्नरः॥ नागकेशरकल्हारवकुलैः सिन्धुवा
रकैः॥ पाटलैः पूजयेद्देवीं श्रीपीठान्तर्निवासिनीं॥ पूर्व्ववत्पूजये
द्देवि मासमात्रं प्रसन्नधीः॥ सहस्रजन्मजं पापं नाशयेन्नात्र संश
यः॥ सौभाग्यमतुलं तस्य भवेद्देवीप्रसादतः॥
योगिनीतन्त्रे॥ नोत्सृज्य दद्यात्पुष्पाणि वनस्थानि कदाचन॥ न
शकुवन्ति वै देवाः समाकर्षितुमुद्यताः॥ एकैकं कुसुमं यक्षा रक्ष
न्ति दशवैयताः॥ तथा यक्षाः प्रयक्षाङ्गनाः पञ्च सर्व्वतः कुसुमावृताः॥ त
स्मादाहृत्य कुसुमं जयेद्देवान्पितॄनपि॥ मत्स्यसूक्ते॥ स्नात्वा मध्या
ह्नसमये न छिन्द्यात्कुसुमं नरः॥ तत्पुष्पैरर्च्चनेद्देवि रौरवे पतितः पच्य
ते॥ मध्याह्नेत्युपादानात्प्रातःस्नातस्य पुष्पाहरणे न दोषः॥ अथ पु
ष्पमाला॥ विश्वसारतन्त्रे॥ नीलोत्पलसहस्रेण यस्तु मालां प्रयच्छति॥
दुर्गा[?] विधिवद्देवि तस्य पुण्यफलं शृणु॥ वर्षकोटिसहस्राणि वर्षकोटि
शतानि च॥ देव्या अनुचरो भूत्वा रुद्रलोके महीयते॥ योगिनीतन्त्रे॥
मालतीमालया विश्वसर्च्चितो येन कार्त्तिके॥ पापाक्षं कृत्वा माला
नाश्रीतानतस्य विष्णुना॥ पद्मैः सौरैः पूजिता॥ इति मत्स्यसूक्ते॥ कर
वीरकृतां मालां माधवाय प्रयच्छति॥ देवेन्द्रोपि महेशानि करोति क
रसंपुटं॥ अथ मासविशेषे धात्रीफलादिदानफलं॥ तत्रैव॥ धात्री
फलेन पत्रेण योर्च्चयेन्मेषगे रवौ॥ दश मासमश्वमेधानां फलम्

देवतान्तं वा पिष्टं येत्तत् लितां शाङ्कवमध्यगं॥ अङ्गुलं तं मनुष्याणां ब्रह्मह
त्यां व्यपोहति॥ इति सामान्यपूजापद्धतिः॥ वामाकेश्वरा द्यं प्रकृतिमु
नीन्द्राः पञ्चान्त्रिशक्तिर्गिरमनन्तसंरोगं॥ नित्याश्च दुर्गा च दिनेन तथान्यां

लभन्ते प्रिये॥ मन्त्रं नीस हकारस्य केशवायविनिर्द्दिशेत्॥ जम्बुनिन्दुकयो
रेवन्तथा विकेशवस्य च॥ मत्स्यसूक्ते॥ करवीरकृतां मालां यो दद्यान्माध
वाय च॥ देवेन्द्रोपि महेशानि करोति करसंपुटं॥ तत्रैव॥ न भेदयेद्दय
न्त्रसूत्रे मालां न्वैव न भेदयेत्॥ विशेषे मालतीमालाव्याघ्रचर्म्म तथै
व च॥ बहन्नीतन्त्रे॥ कोकनदञ्च बन्धूकं कर्णिकाद्वयमेव च॥ बकम
न्दावरक्तानि करवीराणि पार्व्वति॥ मल्लिकात्रितयं जातीक्षौमपुष्पं ज
यन्तिका॥ विल्वपत्रं कुरुण्टकं मुनिपुष्पञ्च केतकी॥ वासन्तीञ्चैव सो
गन्धिकापुष्पं मनोहरं॥ आम्रकञ्च कदम्बं वकुलं याषिकोत्तथा
विल्वं रुवका द्रोणा तुलसी वार्क्तिनैः शुभैः॥ उग्रपुष्पैर्विशेषेण व
ज्रपुष्पेण द्रोणकं॥ सर्व्वपुष्पं प्रदद्याच्च भक्तियुक्तेन चेतसा॥ ज
पुष्पं महेशानि दद्याद्देव्यै विशेषतः॥ पञ्चं प्रियतरं देव्याः शेफा
लीवकुलं तथा॥ रक्तोत्पलेन देवेशि पूजयेत्परमां शिवां॥ लक्षवर्ष
सहस्राणि पूजायाः फलमाप्नुयात्॥ शिरीषं परमं देव्याः प्रीतिदं त
गरं तथा॥ स्य रापज्ञं स्तवुनं लक्षसंख्य कमेण तु॥ यदि दद्या
न्महेशानि सर्व्वसिद्धिः स्थिरे भवेत्॥ तदेव मन्त्रसिद्धिः स्यान्नात्र
कार्य्या विचारणा॥ विजातीतुलसी रम्यां तस्याः प्रीतिकरी परा॥ का
ञ्चनरक्तवर्णञ्च अतिप्रियतरं महत्॥ भक्तियुक्तो महेशानि स
र्व्वपुष्पं निवेदयेत्॥ दहन्नीतन्त्रे॥ चातुर्म्मास्येतु राक्षैक मासत्या
योर्च्चयेद्धरिं॥ शतजन्मकृतं पापं तत्क्षणादेव नश्यति॥ करवीरस्य
कुसुमैर्यैर्च्चयन्ति हरेर्द्दिने॥ दर्शनात्तस्य देवेशि प्रीनरकाग्निः प्रणश्य
ति॥ अथ वर्ज्यपुष्पाणि॥ नार्च्चयेत्त्रिसन्ध्ये पुष्पेण पीतेश्वतगौरेस
पा॥ श्वेतउग्रेण कल्पेन विजयेन न नचार्च्चयेत्॥ प्रपञ्चसारे भद्रपटलं॥

भजामि नित्यं भुवनेश्वरीं तां ॥ अथ भुवनेश्वरीमन्त्रः ॥ अथ वक्ष्ये ज
गद्धात्रीमधुना भुवनेश्वरीं ॥ ब्रह्मादयोपि यां ज्ञात्वा लेभिरे परमां
[illegible]श्रियं ॥ नकुलीशोग्निमारूढो वामनेत्रार्द्धचन्द्रवान् ॥ =

अङ्गने पतितैर्म्लानैः शीर्णैर्जन्तुदूषितैः ॥ आघ्रातैरङ्गसंस्पृष्टैरुषितैर्नी
पि चार्चयेत् ॥ सारदायां ॥ मलिनं भूमिसंस्पृष्टं क्र[illegible]मिकेशादिदू
षितं ॥ अङ्गस्पृष्टं समाघ्रातं त्यजेत्पर दूषितं गुरुः ॥ मन्त्रस्य सन्ततौ वेणु
द्वीपापहृते ॥ शेफालिकाञ्च कह्लारं शरत्काले प्रशस्यते ॥ अन्यत्र
नस्य शेषे देवि प्रायश्चित्तं न पूजनात् ॥ नार्चयेद्दूकृकं छेरागजयोग
गन्धिकेन च ॥ करवीरस्य माघ्यस्य बन्धुजीवस्य चैव हि ॥ केशर
स्य च वज्रस्य रक्तं देवि प्रशस्यते ॥ योगिनीतन्त्रे ॥ विल्वपत्रं शमीपत्र
तमालामालकीदलं ॥ अपामार्ग भृङ्गपत्रञ्च कुशं दूर्वान्तथैव च ॥ पुष्पा
णामप्यभावे तु फलान्यपि निवेदयेत् ॥ फलानामप्यभावे तु तत्पत्रैः
पूजयेद्धरिं ॥ इति पुष्पाद्यभावे पात्रेणापि पूजनं ॥ गुप्तपूजा पुष्पं
श्चैव तत्रैव ॥ सिंहास्यञ्चैव मान्दारं धुस्तूरञ्च चतुर्विधं ॥ तथा रुद्रजटे
श्च गृह्य पुष्पञ्च शाङ्करि ॥ पद्मे नीलोत्पले देवि वक मन्दारकाञ्चने ॥
माधवी च तमालञ्च गुग्गुलेन तदार्चने ॥ दिवारात्रिभेदेन पुष्पविशे
षेण पूजनमुक्तं ॥ तत्रैव ॥ कनकानि सुगन्धीनि रात्रौ देयानि शाङ्करि ॥
दिवा चान्यानि पुष्पाणि दिवारात्रौ च मल्लिका ॥ देवालय ज पुष्पेण
देवपूजने दोषमाह तत्रैव ॥ देवालयस्य पुष्पेण यो देवं प्रतिपूजयेत् ॥
अकृत्वे प्राप्नुयात्सोपि दशवर्षाणि पञ्च च ॥ देवताविशेषे पुष्पविशे
षवर्ज्जनमपि तत्रैव ॥ शिवे वर्जयेत्कुन्दं माघे माघ्यं प्रशस्यते ॥ गणे
शे वर्ज्जयेन्माघ्यमशोकं तगरं तथा ॥ सूर्ये माघ्यञ्च मन्दारं कनकञ्चैव त
थैव च ॥ महालक्ष्म्यै च तुलसी छिन्निकां काञ्चनं तथा ॥ अत्र छिन्नि
का वर्जनमधिकदोषार्थं ॥ बन्धुजीवञ्च द्रोणञ्च सरस्वत्यै न दापयेत् ॥
गन्ध हारं च विल्वपत्रञ्च शमीपत्रं तथैव च ॥ ब्रह्मणो वर्जयेत्काशं केसुम्भः

पुष्पविशेषः ॥

चतुर्थखण्डः

॥ ॐ श्रीगणेशाय नमः ॥ तन्त्रसारग्रन्थपत्र

१

॥ अथ तन्त्रसार प्रारम्भः ॥

नत्वा कृष्णपदद्वंद्वं ब्रह्मादिसुरवंदितं॥ गुरूंश्च ज्ञानदातारं कृष्णानं
देन धीमता॥ तन्त्रदन्यगतान् दृष्ट्वा नानार्थप्रतिपद्य च॥ सौकार्य्यार्थश्च संक्षे
पात्तन्त्रसारः प्रतन्यते॥ उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः॥ अथ गुरुल
क्षणं॥ शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान्॥ शुद्धाचारः सुप्रतिष्ठः
शुचिर्दक्षः सुबुद्धिमान्॥ आश्रमी ध्याननिष्ठश्च तन्त्रमन्त्रविशारदः॥
निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते॥ आगमसंहितायां॥ उद्धर्तुं चैव॥
सारदायां मातृतः पितृतः शुद्धः शुद्धभावो जितेन्द्रियः॥ सर्वागमानां सारज्ञः
सर्वशास्त्रार्थतत्त्ववित्॥ परोपकारनिरतो जपपूजादितत्परः॥ अमोघव
चनः शान्तो वेदवेदाङ्गपारगः॥ योगमार्गानुसंधायी देवताहृदयंगमः॥
इत्यादिगुणसंपन्नो गुरुरागमसंमतः॥ विश्वसारतन्त्रेपि॥ सर्वशास्त्रपरो द
क्षः सर्वशास्त्रार्थवित्सदा॥ सुवचाः सुन्दरः स्वाङ्गः कुलीनः शुभदर्शनः॥
जितेन्द्रियः सत्यवादी ब्राह्मणः शान्तमानसः॥ संहर्तुं समर्थो ब्राह्मणोत्तमः॥ त
पस्वी सत्यवादी च गृहस्थो गुरुरुच्यते॥ इति गुरुलक्षणं॥ ज्ञानार्णवे॥ गुरोर्मा
नुषबुद्धिं च मन्त्रे चाक्षरबुद्धिकं॥ प्रतिमासु शिलाबुद्धिं कुर्वाणो नरकं व्रजेत्॥
जन्महेतू हि पितरौ पूजनीयौ प्रयत्नतः॥ गुरुर्विशेषतः पूज्यो धर्माधर्म
प्रदर्शकः॥ गुरुः पिता गुरुर्माता गुरुर्देवो गुरुर्गतिः॥ शिवे रुष्टे गुरुस्त्राता गुरौ रु
ष्टे न कश्चन॥ गुरोर्हितं प्रकर्तव्यं वाङ्मनःकायकर्मभिः॥ अहिताचरणाद्दे
वि विष्ठायां जायते कृमिः॥ शरीरं पिता देवि ज्ञानदो गुरुरेव च॥ गुरोर्गुरुतरो ना
स्ति संसारे दुःखसागरे॥ यस्य वक्त्राद्धि निर्जातं वर्णलक्षमयं वपुः॥ तारयेन्नो
त्र संदेहो नरकार्णवतो ध्रुवं॥ मन्त्रत्यागाद्भवेन्मृत्युर्गुरुत्यागाद्दरिद्रता॥
गुरुमन्त्रपरित्यागाद्रौरवं नरकं व्रजेत्॥ गुरौ संनिहिते यस्य पूजयेदन्य
देवता॥ स याति नरकं घोरं सा पूजा विफला भवेत्॥ श्रीक्रमे॥ उत्पा
दकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता॥ तस्मान्मन्येत सततं पितुर
प्यधिकं गुरुं॥ गुरुवद्गुरुपुत्रेषु गुरुवत्तत्सुतादिषु॥ गुरुवत्पूजनं
कार्य्यं तोषणं वाक्यपालनं॥ गुरुवद्भजनं कार्य्यं सर्वदा गुरुसंततौ॥
निगमकल्पद्रुमे॥ अविद्यो वा सविद्यो वा गुरुरेव च दैवतं॥ अमार्गस्थो
पि मार्गस्थो गुरुरेव सदा गतिः॥ आयान्तमग्रतो गच्छेद्गच्छन्तं तमनुव्रजेत्॥

आसने शयने वापि नातिष्ठेदग्रतो गुरोः॥ अनुज्ञां प्राप्य तिष्ठेत्तु नैव शापमवा
प्नुयात्॥ तथा क्रियासारे॥ गुरुर्माता पिता स्वामी बान्धवः सुहृदः शिवः॥
इत्याधाय मनो नित्यं भजेत्सर्वात्मना गुरुं॥ क्रियासारसमुच्चये॥ श्वित्री चैव
गलत्कुष्ठी नेत्ररोगी च वामनः॥ कुनखः श्यावदन्तश्च स्त्रीजितोऽधिकाङ्गकः
हीनाङ्गः कपटी रोगी बह्वाशी बहुजल्पकः॥ एतैर्दोषैर्विमुक्तो यः स गु
रुः शिष्यसम्मतः॥ यामले॥ अभिशप्तमपुत्रञ्च कदर्यं कितवं तथा॥
क्रियाहीनं शठञ्चापि वामनं गुरुनिन्दकं॥ जलरक्तविकारञ्च वर्जयेन्मति
मान् सदा॥ सदा मत्सरसंयुक्तं गुरुं तन्त्रेन वर्जयेत्॥ वैशंपायनसंहितायां॥
अपुत्रो मृतपुत्रश्च कुष्ठी च वामनस्तथा॥ इत्यादयोऽपि वो ध्यमिति॥ शान्तो विनी
तः शुद्धात्मा श्रद्धावान् धारणक्षमः॥ समर्थश्च कुलीनश्च प्राज्ञः सच्चरि
त्रो यतिः॥ एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा॥ अन्यच्च॥ पुण्यवान्
धार्मिकः शुद्धो गुरुभक्तो जितेन्द्रियः॥ शिष्य योग्यो भवेत्सोऽहि दान
ध्यानपरायणः॥ निषिद्धशिष्यलक्षणमाह॥ पापिने क्रूरचेष्टाय
शठाय कृपणाय च॥ दीनाय चारश्चन्त्याय मंत्रद्वेषपराय च॥ निन्द
काय चम्लखाय नीचद्वेषपराय च॥ गुरुभक्तिविहीनाय न देयालालिनाय च॥

पितृमातृहिते युक्तः सर्वकर्मपरायणः॥ आश्रमी देशवासी च गुरुरेवं
विधीयते॥ मत्स्यसूक्ते॥ मध्यदेशसमुद्भूतः शान्तः सर्वगुणैर्युतः॥ पु
त्रदारैश्च संपन्नो गुरुरागमसम्मतः॥ रुद्रयामले॥ आदौ साधक
देवश्च सदाचाररतिः सदा॥ पशुभावस्ततो वीरः साधाऽहो दीव्य
भाववान्॥ एतेषां भाववर्गानां गुरुर्वेदान्तपारगः॥ शान्तो दान्तः कुली
नश्च विनीतः शुद्धवेशवान्॥ शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः
सुबुद्धिमान्॥ आश्रमी ध्याननिष्ठश्च मंत्रतंत्रविशारदः॥ निग्रहा
नुग्रहे शक्तो वशीमन्त्रार्थजापकः॥ बृहन्नीलतन्त्रेपि॥ बहिरिन्द्रियहर्ता च
गुरुः सर्वत्र दुर्लभः॥ अन्तरिन्द्रियहर्ता च गुरुः सर्वत्र शोभनः॥ आ
चारवान् महाविद्याराधनिष्ठश्च तत्परः॥ तत्कालाचारसंयुक्तो गुरुरि
त्यभिधीयते॥ कामाख्यतन्त्रेपि॥ शान्तो दान्तः कुलीनश्च शुद्धान्तःकर
णस्तथा॥ पञ्चतत्त्वात्मको यस्तु स इत्गुरुः संप्रकीर्तितः॥ सिद्धो
साविति विख्यातो वन्धुभिः शिष्यपालकः॥ चमत्कारी देवशक्त्या स
द्गुरुः कथितः प्रिये॥ अभ्यन्तं शम्भुतं वाक्यं वाक्यं साधु मनोहरं॥
तन्त्रमंत्रसमावेत्ति यः एव सद्गुरुः श्रमः॥ महानिर्वाणतन्त्रे॥ शाक्ते
शाक्तो गुरुः शाक्तः शैवे शैवो गुरुर्मतः॥ वैष्णवे वैष्णवः सौरे सौ

रो गुरुः समाहृता॥ गाणपत्ये गाणपः ख्यातः कौलः सर्वत्र सद्गुरुः॥ अतः स
र्वात्मना धीमान् कौलाद्दीक्षां समाचरेत्॥ तथा॥ पशोर्वक्त्रात्पशुकमंत्रः पशुरेव न
संशयः॥ वीरात्प्राप्तमनुर्वीरः कौलाच्च ब्रह्मविद्भवेत्॥ बृहन्नीलतन्त्रेपि॥
शैवोपि परविद्यानामुपदेष्टा न संशयः॥ वैष्णवः स्वमन्त्राणां सौरः
सौरविदां मतः॥ गाणपत्यस्तदेवेशि गाणदीक्षाप्रवर्त्तकः॥ शैवे शाक्ते
च सर्वत्र दीक्षा स्वामी न संशयः॥ कौलस्तस्मात्प्रयत्नेन कुलीनं गुरु
माश्रयेत्॥ इति कुलीनगुरुप्रशंसा॥ एतस्मिन् शाम्भवे शास्त्रे व्यक्तार्थ
पदवृंहिते॥ कूटेनार्थकल्पयन्तः पतितायांत्यधोगतिं॥ रुद्रयामले॥ नी
रोगी निरहङ्कारो विकाररहितो महान्॥ तपस्वी सत्यवादी च सदाध्या
नपरायणः॥ आगमार्थविशिष्टज्ञो निजधर्मपरायणः॥ अव्यक्त
लिङ्गचिह्नस्थो भावको भद्रदानवान्॥ लक्ष्मीमान् ध्यातिमान्नापो गु
रुरित्यभिधीयते॥ गुह्यागमार्थतत्त्वानुसंधानाद्बोधनादपि॥ रुद्रा
दिदेव पद्माद् गुरुरित्यभिधीयते॥ श्रीमोक्षज्ञानदातृत्वाज्ञानाद्ब्रह्म
त्मबोधनात्॥ सकलितनाम्न चिन्हत्वात् श्रीनाथः कथितः प्रिये॥ स्वयमा
चरते शिष्या नाचारे स्थापयत्यपि॥ आचिनोति हि शास्त्रार्थान् आचा
र्यस्तेन कथ्यते॥ चराचरसमासन्नमध्यापयति यः स्वयं॥ यमादियो
गसिद्धत्वादाचार्य इति कथ्यते॥ सारसंग्रहे॥ विशुद्धमातापितृको जि
तेन्द्रियः सर्वागमज्ञः परदुःखकातरः॥ यथार्थवाग्वेदविदङ्गपारगः शान्तः
कुलीनो गुरुरीरितो द्विजः॥ नवचक्रेश्वरे॥ शिव पा परमादाय भवश
निवृत्तये॥ सिद्धान्तसारवेत्ताहं सिद्धान्तसारभेदकः॥ अविछिन्नाग्रम
तश्च सदानुग्रहनिग्रहे॥ शिवो दिव्यात्मकाद्दैविनश्च दृग्गोचरोऽप्यहं॥
तथा श्रीगुरु पेरणशिष्यान् शास्याम्यपार्थति॥ परं सं। निजजननं परानन्द
समुद्भवम्॥ तत्त्वं विदितं येन सद्गुरुः कुलनायिके॥ अतिमर्त्यो मन्त्र
तन्त्रेशं भवं वेत्ति यः सदा॥ वेधसः षड्विधं देवि स गुरुः कुलनायिके
वर्णं कलां पदं तत्त्वं मंत्रं भुवनमेव च॥ बोधयेद्यः षडध्वानं स गुरुः कु
लनायिके॥ षडाधारं नवद्वारं षोडशाधारनिर्णयं॥ यो जानाति

विधानेन सद्गुरुः कुरुः कुलनायिके॥ जाग्रत्स्वप्नसुषुप्तिश्च पञ्चतत्त्वात्मकं
यो वेत्ति पञ्चकं देवि स गुरुः कुलनायिके॥ सम्मोहनतन्त्रेपि॥ षट्चक्रं षोड
शाधारं त्रिलक्षं व्योमपञ्चकं॥ स्वदेहे यो विजानाति सद्गुरुः कथितो बु
धैः॥ नवचक्रेश्वरे॥ पिण्डं पदं तथा रूपं रूपातीतं चतुष्टयं॥ यो वा सम्यग्विजा
नाति सद्गुरुः परिकीर्तितः॥ पिण्डादि चतुष्टयं यथा गुरुगीतायां॥
पिण्डं कुण्डलिनी शक्तिः पदं हंसः प्रकीर्तितः॥ रूपं बिन्दुरिति ज्ञेयं रूपा
तीतं निरञ्जनं॥ नवचक्रेश्वरे॥ यो वा परां च पश्यन्तीं मध्यमामपि वैखरीं॥
चतुष्टयं विजानाति स गुरुः परिकीर्तितः॥ इति गुरुविशेषलक्षणं॥ रुद्रया
मले उत्तरखण्डे॥ गुरुमूलं जगत्सर्वं गुरुमूलं परं तपः॥ गुरोः प्रसाद
मात्रेण मोक्षमाप्नोति सद्वशी॥ मुण्डमालातन्त्रे॥ गुरुरेकः शिवः साक्षा
द्गुरुः सर्वार्थसाधकः॥ गुरुरेव परं तत्त्वं सर्वं गुरुमयं जगत्॥ विना
गुरुप्रसादेन कोटिपुरश्चरणेन किं॥ पिच्छिलातन्त्रे॥ गुरुमूलमिदं शा
स्त्रं नान्यः शिवतमः प्रभुः॥ अत एव महेशानि यत्नतो गुरुमाश्रये
त्॥ इति गुरुमाहात्म्यम्॥ रुद्रयामले॥ गुरुं विना यस्तु मूढः पुस्तकादि
विलोकनात्॥ जपव समाप्नोति किल्बिषं परमेश्वरी॥ न माता न पि
ता भ्राता तस्य कोपि गतिः प्रिये॥ गुरुरेको वरारोहे पापं नाशयति क्षणात्॥
गुरुं विना यत्नलब्धे नाधिकारः कथञ्चन॥ अत एव प्रयत्नेन गुरुः क
र्त्तव्य उत्तमः॥ इत्यादिशास्त्रेण गुरोरावश्यकं॥ यामले॥ गुरुः देवः शिवः प्रो
क्तः सोहं देवि न संशयः॥ गुरुत्वमपि देवेशि मन्त्रोपि गुरुरुच्यते॥ अतो मं
त्रे गुरौ देवे नहि भेदः प्रजायते॥ कदाचित्स सहस्रारे पद्मे ध्येयो गुरुः स
दा॥ कदाचिद्धृदयाम्भोजे कदाचिद्दृष्टिगोचरे॥ मुण्डमालातन्त्रे॥
देवतागुरुमन्त्राणामैक्यं संभावयन् धिया॥ तदा सिद्धो भवेन्मन्त्रः
प्रकटे हानि च॥ पार्वत्युवाच॥ एकात्म्येन महादेव कथमुत्पद्य
ते प्रभो॥ नराकृतिं गुरुं मन्ये देवता ध्यानरूपिणी॥ मन्त्रश्चाक्षर
रूपो हि कथमैक्यं भवेच्छिव॥ शिव उवाच॥ एकजातिस्व पेण स्वभा
वादेकजन्मनः॥ एतेषां भावयोगेन एकसाधनमेव हि॥ गुरोर्ज्ञा

नश्च मन्त्रश्च मन्त्रज्ञानात्तु देवता॥ अत एव वरारोहे देवतायाः पितामहः॥ पि
तुश्च भावना देवि चाच्येव च पितुः पितुः॥ नदुद्भवस्तोयमेति विपरीते विपर्य्ययः॥
॥ यद्यामलिकाभेद तन्त्रे॥ श्रीदेव्युवाच॥ नराकृतिं गुरुं नाथ मन्त्रं वर्णात्मकं तथा॥
ध्यानानुरूपिणं देवमेकत्वं वाक यं वद॥ श्रीशिव उवाच॥ गुरुरत्र महामन्त्रो
लभ्यते साधकोत्तमैः॥ यद्वै वाञ्छायते बीजं तस्य मुक्तिर्भवेद्ध्रुवं॥ देव
तायाः शरीरं हि बीजादुत्पद्यते प्रिये॥ गुरोराज्ञानुसारेण चान्यमूर्त्तिस्तु जा
यते॥ गुर्व्वादिभावनादेवि भावसिद्धिः प्रजायते॥ अत एव महेशानि चैकत्वं
परिकथ्यते॥ मुण्डमालातन्त्रे॥ मन्त्रे वा गुरुदेवे वा न भेदं यस्तु कल्पते॥ तस्य
तुष्टा जगद्धात्री किन्न दद्याद्दिने दिने॥ इति मन्त्रदेवतानामैक्यकथनं॥ गुरु
तन्त्रे॥ गुरुः कर्त्ता गुरुर्हर्त्ता गुरुः पाताम्बहीतले॥ गुरुसन्तोषमात्रेण तुष्टाः स्युः
सर्व्वदेवताः॥ गुरौ तुष्टे शिवस्तुष्टो हृष्टे हृष्टस्त्रिलोचनः॥ गुरौ तुष्टे शिवा तुष्टा
हृष्टे हृष्टा च सुन्दरी॥ अतो गुरुर्महेशानि संसारार्णवलङ्घने॥ कर्त्ता पाता च
हर्त्ता च गुरुर्मोक्षप्रदायकः॥ इति गुरुतुष्ट्यादिफलं॥ शाक्तानन्दतरङ्गिण्यां रु
द्रयामले॥ गकारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः॥ उकारः शम्भुरित्युक्तस्त्रि
तयात्मा गुरुः स्मृतः॥ कङ्कालमालिनीतन्त्रे॥ निर्गुणं च परं क्ष गुरुरित्यक्षरद्वयं॥
महामन्त्रं महादेवि गोपनीयं परात्परम्॥ गुरुतन्त्रे॥ गुरुरित्यक्षरं यस्य जिह्वाग्रे दे
वि वर्त्तते॥ तस्य किं विद्यते मोहात्पाठे देवस्य किं तथा॥ गकारोच्चारमात्रेण ब्रह्मह
त्यां व्यपोहति॥ उकारोच्चारमात्रेण मुच्यते जन्मपातकात्॥ रेफोच्चारण
मात्रेण उकारोच्चारणात्पुनः॥ विसर्गोच्चारणात्कोटिजन्मजं पातकं हरेत्॥
गुरुरित्यक्षरं देवि जपतो मम निश्चितं॥ ब्रह्महत्यापुरा मुक्ता सत्यमेतन्न
संशयः॥ परशुरामो मातृवधात् देवेन्द्रो ब्रह्महिंसनात्॥ पातकादपि मुक्तो
ऽभूद् गुरोरुच्चारमात्रतः॥ इति गुरुशब्दोच्चारणफलम्॥ तन्त्रैव॥ ब्रह्मा रुद्र
श्च विष्णुश्च पार्वती परमेश्वरी॥ इन्द्रादयस्तथा देवा यक्षाद्याः पितृदेवताः॥
गङ्गाद्याः सरितः सर्व्वा गन्धर्वाः सर्पजातयः॥ स्थावरा जङ्गमाश्चान्ये पर्व
ताः सार्व्वभौतिकाः॥ एते चान्ये च तिष्ठन्ति नित्यं गुरुकलेवरे॥ श्रीगुरोस्तु
ष्टिमात्रेण तुष्टिरेषां च जायते॥ इति गुरोस्तेजगत्तृप्तिकथनम्॥ तन्त्रैव॥ =

नगुरोरधिकं शास्त्रं नगुरोरधिकं तपः॥ नगुरोरधिको मंत्रो नगुरोरधिकं
फलं॥ नगुरोरधिका देवी नगुरोरधिकः शिवः॥ नगुरोरधिका मूर्त्ति
र्नगुरोरधिको जपः॥ विश्वसारतंत्रे॥ गुरोर्मूर्त्तिः सदा ध्येया गुरोस्त
न्नाम सदा जपेत्॥ काशीक्षेत्रं निवासश्च जाह्नवी चरणोदकं॥ गु[illegible]
रुर्विश्वेश्वरः साक्षात् तारकं ब्रह्म [illegible] निश्चितं॥ तथा॥ ध्यानमू
लं गुरोर्मूर्त्तिः पूजामूलं गुरोः पदं॥ मंत्रमूलं गुरोर्वाक्यं सिद्धिमूलं गुरोः
कृपा॥ तथा॥ मुनिभिः पन्नगैर्वापि सुरैर्वा शापितो यदि॥ कालमृत्युभ
याद्वापि गुरुः रक्षति पार्वति॥ गुप्तसा[illegible]धनतंत्रे॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरु
र्देवो महेश्वरः॥ गुरुर्ज्ञानं गुरुस्तीर्थं गुरुर्दानं गुरुस्तपः॥ गुरुरग्निर्गुरुः
सूर्यः सर्वं गुरुमयं जगत्॥ इति सर्वेभ्यो गुरोरधिकत्व कथनं॥ किं दानेन किं
तपसा किमन्यतीर्थसेवया॥ श्रीगुरोः शर्वं नीयेन यादृशे तेनार्चितं जगत्
ब्रह्मांडभांडमध्ये तु यानि तीर्थानि संतिवै॥ गुरोः पादे नैतानि निवसंति
हि सन्ततं॥ इति गुरुपूजने जगत्पूजन सिद्धिकथनम्॥ पिच्छिलातंत्रे॥ गुरु
स्त्रिविधः प्रोक्तो दीक्षाशिक्षाप्रभेदतः॥ आदौ दीक्षागुरुः प्रोक्तः शेषे
शिक्षागुरुर्मतः॥ यस्मुखात्तु महामंत्रः श्रूयते स्य तेपि वा सद्गुरुः परमो
ज्ञेयस्तदाज्ञा सिद्धिदायिनी॥ कुलागमे॥ प्रेरकः [illegible] चकश्चैव वाचको दर्श
कस्तथा॥ शिक्षको बोधकश्चैव षडेते गु[illegible]रवः स्मृताः॥ पंचैते का
र्यिभूता स्युः कारणं बोधको भवेत्॥ इति गुरुभेदकथनं॥ तथा॥ तत्त्ववे
त्रुपदिष्टाये तत्त्वज्ञास्तेन संशयः॥ पशुभिश्चोपदिष्टाये दीक्षिते पशवः
स्मृताः॥ अतिज्ञश्चोद्धरेन्मूर्खं नमूर्खो मूर्खमुद्धरेत्॥ शिलां संता
रयेन्नौहो नाशिलातारयेच्छिलां॥ अतएव गुरुतंत्रे॥ गुरवो बहवः संति शि
ष्यवित्तापहारकाः॥ तमेकं दुर्लभं मन्ये शिष्यहृत्तापनाशकं॥ ए
श्रेष्ठो भवेत्तेषां भक्तिमुक्तिप्रदायकः॥ इति तत्त्वज्ञगुरुकरणकारणम्॥

आगमसारे॥ अलसा मलिनां[illegible]क्लिष्टा दाम्भिकाः कृपनास्तथा॥ दरिद्रा
रोगिनो रुष्टा रागिनो भोगलालसाः॥ असूयामत्सरग्रस्ताः सदाप
रुषवादिनः॥ अन्यायोपार्जितधनाः परदाररताश्च ये॥ विदुषां वैरि

नश्चैव त्याज्याः पाण्डितमानिनः॥ भ्रष्टाचाराश्च ये कष्टवृत्तयः पिशु
नाः खलाः॥ बह्वाशिनः क्रूरचेष्टा दुरात्मानश्च निन्दिताः॥ इत्येवमा
द्योन्येपि पापिष्ठाः पुरुषाधमाः॥ एवंभूता परित्याज्याः शिष्यत्वेनो
पकल्पिताः॥ गुरुता शिष्यता वापि तयोर्वत्सरवासतः॥ क्रियाचोक्तं सार
संग्रहे॥ सद्गुरुः स्वाश्रितं शिष्यं वर्षमेकं परीक्षयेत्॥ स्वप्नेतु न कालनियमः॥

योगिनीतंत्रे॥ श्रीदेव्युवाच॥ गुरुः कोवा महेशान वद मे करुनामय॥ त्वत्तोप्य
धिक एवायं गुरुस्त्वया प्रकीर्त्तितः॥ श्रीईश्वर उवाच॥ आदिनाथो महादेवि
महाकालो हि यः स्मृतः॥ गुरुः स एव देवेशि सर्वमंत्रेषु नापरः॥ शैवे शाक्ते वैष्णवे
च गानपत्ये तथैन्दवे॥ महाशैवे च सौरे च सगुरुर्नात्र संशयः॥ मंत्रवक्ता स एव
स्यात् नापरः परमेश्वरी॥ मंत्रप्रदानकाले हि मानुषे गिरिनन्दिनी॥ अधिष्ठा
नं भवेत्तस्य महाकालस्य शंकरि॥ अतो न गुरुता देवि मानुषे नात्र सं
शयः॥ मंत्रदाता शिवः प्रोक्तो ध्यानेकुरुते गुरोः॥ तद्ध्यानेकुरुते देवि शि
ष्योपि शीर्षपंकजे॥ तद्ध्याने शिष्यशिरसि चोपदिष्टं न चान्यथा॥ इति कामा
ख्यातंत्रे॥ अतएव महेशानि एक एव गुरुः स्मृतः॥ अधिष्ठानवशात्तस्य
मानुषस्य महेश्वरी॥ महात्म्यं कीर्त्तितं तस्य सर्वशास्त्रेषु शंकरी॥ कामा
ख्यातंत्रे॥ अतएव महेशानि कुतो हि मानुषो गुरुः॥ मानुषे गुरुता देवी क
ल्पनानां तु मुख्यतः॥ मोक्षो न जायते देवि मानुषे गुरुभावनादिति॥ तथा॥
अतएव गुरुर्नैव मनुजः [illegible] किन्तु कल्पना॥ दीक्षादौ साधकानां च रक्षा
दौ पूजनं यथा॥ गुरुतंत्रेपि॥ एक एव गुरुर्देवि सर्वत्रैव परिगीयते॥ भेदस्तस्य
न कर्त्तव्यः सर्वं गुरुमयं यगत्॥ विशेषं शृणु वक्ष्यामि महात्म्यं गुरुगो
चरम्॥ पशुमन्त्रप्रदानेन तु मर्य्यादा दशपौरुषी॥ वीरमन्त्रप्रदानेन तु पंच
विंशतिपौरुषी॥ महाविद्यासु सर्वासु पञ्चाशत् पौरुषी मता॥ ब्रह्मयोग
प्रदानेन तु मर्य्यादा शतपौरुषी॥ शाक्तानन्दतरंगिन्यां॥ मानवस्य महेशा
नि संक्षेपान्निगदामि ते॥ गुरुः परमगुरुश्चैव परापरगुरुस्तथा॥ स्वगु
रुः परमेशानि साक्षाद्ब्रह्म न संशयः॥ तत्पिता परमगुरुर्देवि स्वयं वि
ष्णुः स्थितो सदा॥ तत्पिता परापरगुरुर्महे[illegible]श्वर समः सदा॥ बृहन्नीलतंत्रे॥
परापरगुरुनाञ्च निर्णयं शृणु पार्वति॥ आदौ सर्वत्र देवेशि मन्त्रदः परमो गुरुः॥

परापरगुरुस्त्वं हि परमेष्ठित्वहं गुरुः ॥ कुलार्णवतन्त्रे ॥ पारम्पर्य्याशमाम्नायं
मन्त्राचारादिकं प्रिये ॥ सर्व्वं गुरुमुखाल्लब्धं सफलं स्यान्नचान्यथा ॥ पाश
छेदकरा देवी रञ्जनात् परतेजसः ॥ जातिभिश्छिद्यमानाच्च पारम्पर्य्य
मितीरितम् ॥ अथ श्रीगुरुलक्षणम् ॥

स्वप्ने तु नियमो नास्तीति नारदवचनात् ॥ तत्रैव ॥ राज्ञश्चामात्यजो दोषः पत्नीपा
पं स्वभर्त्तरि ॥ तथा ॥ शिष्यार्जितं पापं गुरुः प्राप्नोति निश्चितं ॥ वर्षैकेण भवे
द्योग्यो विप्रो गुणसमान्वितः ॥ वर्षद्वयेन राजन्यो वैश्यस्तु वत्सरैस्त्रिभिः
चतुर्भिर्वत्सरैः शूद्रः कथिता शिष्ययोग्यता ॥ ताराप्रदीपे ॥ आगमोक्तविधा
नेन कलौ देवान् यजेत् सुधीः ॥ नहि देवाः प्रसीदन्ति कलौ चान्यविधानतः
तथा ॥ कृते श्रुत्युक्तमार्गः स्यात् त्रेतायां स्मृतिसम्भवः ॥ द्वापरे तु पु
राणोक्तः कलावागमसम्मतः ॥ अशुद्धाः शूद्रकल्पा नो ब्राह्मणाः क
लिसम्भवाः ॥ तेषामागममार्गेण सिद्धिर्न श्रौतवर्त्मना ॥ मन्त्रार्णा देव
ता ज्ञेया देवता गुरुरूपिणी ॥ तेषां भेदान कर्त्तव्या यदीच्छेच्छुभमात्मनः ॥

रुद्रजामले ॥ साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया ॥ सर्व्वमन्त्रार्थत
त्वज्ञा सुशीला पूजने रता ॥ सर्व्वलक्षणसम्पन्ना रूपिका पद्मलोचना ॥
रत्नालङ्कारसंयुक्ता सर्व्वाभरणभूषिता ॥ शान्ता कुलीना कुलजा चन्द्रास्या
सर्व्वबुद्धिदा ॥ अनन्तगुणसम्पन्ना रुद्रत्वदायिनी प्रिया ॥ गुरुरूपा श
क्तिशक्तिदात्री शिवज्ञानविरूपिणी ॥ गुरुयोग्या भवेत् सा हि विधवा परि
वर्जिता ॥ स्त्रियो दीक्षा शुभा मातुश्चाष्टगुणा स्मृता ॥ पुत्रिणी विधवा ग्रा
ह्या केवलानन्दकारिणी ॥ सिद्धमन्त्रं यदि तदा गृह्णीयाद्विधवामुखात् ॥
केवलं सुफलं तत्र मातुरष्टगुणं स्मृतं ॥ स्वयं वा स्वप्नविलये प्रदाति यदि
सन्मनुं ॥ तत्राष्टगुणमाप्नोति यदि सा पुत्रिणी सती ॥ यदि माता स्वीयमन्त्रं
ददाति तनुजाय च ॥ तदाष्टसिद्धिमाप्नोति भक्तिमार्गेण संशयः ॥ तदे
व दुर्ल्लभं देव यदि मात्रा प्रदीयते ॥ आदौ भक्तिं ततो मुक्तिं संप्राप्य का
मरूपधृक् ॥ सहस्रकोटिविद्याश्च जानाति नात्र संशयः ॥ स्वप्ने वाय
दि वा माता ददाति च स्वमन्त्रकं ॥ पुनर्दीक्षां सोपि कृत्वा दानवत्त्वम
वाप्नुयात् ॥ यदि भाग्यवशेनैव जननी छानुवर्त्तिनी ॥ तदासि

द्धिमवाप्नोति तत्र मन्त्रं विचारयेत् ॥ स्त्रीयमन्त्रोपदेशे तु न कुर्य्याद् गुरुचि
न्तनं ॥ इति श्रीगुरुकथनम् ॥ गुरौ कर्त्तव्यवर्ज्जनीयमाह ॥ रुद्रजामले ॥ वर्ज्जयेच्च प
रानन्दरहितं रूपवर्ज्जितं ॥ निन्दितं रोगिणं क्रूरं महापातकिनं गुरुं ॥ अष्टप्र
प्रकारकुष्ठे च कलत्रकुष्ठिनमेव च ॥ श्वित्रिणं जनहिंसार्थं सदार्थगताहितं
तथा ॥ स्वर्णविद्रावणं चौरं बुद्धिहीनं सुखर्व्वरं ॥ तथा वदन्तं कुलाचारर
हितं शान्तिवर्ज्जितं ॥ सकलङ्कं नेत्ररोगपीडितं परदारगं ॥ असंस्कारप्रवक्ता
रं स्त्रीजितं व्याधिकाङ्क्षकं ॥ कपटात्मानमेवञ्च विशिष्टं बहुजल्पकं ॥ व
ह्वाशिनं हि कृपणं मिथ्यावादिनमेव च ॥ अशान्तं भावहीनञ्च पञ्चाचा
रविवर्ज्जितम् ॥ दोषजालैः प्रजितादं प्रजयेन्न गुरुं विना ॥

दैव्यागमे शिववाक्यम् ॥ गुरुशय्यासनं यानं पादुकोपानत्पीठकं ॥ स्नानोदकं तथाछा
यां लंघनं नैव कारयेत् ॥ गुरोरग्रे पृथक् पूजामौद्धत्यञ्च विवर्ज्जयेत् ॥ दीक्षां व्या
ख्यां प्रभुत्वञ्च गुरोरग्रे परित्यजेत् ॥ रुद्रजामले ॥ ऋणदानं तथादानं वस्तू
नां क्रयविक्रये ॥ न कुर्य्याद्गुरुणा सार्द्धं शिष्यो भूत्वा कदाचन ॥ गुरु
शब्दार्थमाह ॥ तन्त्रार्णवे ॥ गकारः सिद्धिदः प्रोक्तो रेफः पापस्य दाहकः ॥ उका
रः शम्भुरित्युक्तस्त्रितयात्मा गुरुः परः ॥ गकारो ज्ञानसम्पत्ती रेफः पाप
स्य दाहकः ॥ उकाराच्छिवतादात्म्यं दद्यादिति गुरुः स्मृतः ॥ गुशब्दस्त्व
न्धकारः स्यात् रुशब्दस्तन्निरोधकः ॥ अन्धकारनिरोधित्वाद्गुरुरित्यभि
धीयते ॥ [illegible] कुलचूडामणौ ॥ राधाकृष्ण राधाकृष्ण

निरुत्तरतन्त्रे ॥ पशुशाठ्यञ्च धूर्त्तञ्च वुभुक्षञ्च विशेषतः ॥ धर्म्मार्थकाम
मोक्षार्थी गुरुत्वे न च नाश्रयेत् ॥ जामले ॥ गुरोर्विचारः सर्व्वत्र तातमा
तामहं विना ॥ प्रमादाच्च यदा तेभ्यो दीक्षाविधिमुपाचरेत् ॥ प्रायश्चि
त्तं ततः कृत्वा पुनर्दीक्षां समाचरेत् ॥ सावित्रीमन्त्रजापञ्च लक्षसंख्यं ज
गत्पते ॥ विष्णोर्व्वा प्रणवं लक्षं प्रायश्चित्तमिति स्मृतं ॥ अशक्तश्चेन्म
हादेवी वायुतं प्रजपेन्मनुं ॥ दशसाहस्रजप्येन सर्व्वकिल्विषनाशिनी ॥
गायत्रीच्छन्दसां माता पापराशितुलानलः ॥ कठिनश्चारिपुश्चैव सोदरं वै
रिपाक्षिणं ॥ मातामहञ्च पितरं यतिनं वनवासिनं ॥ वर्ज्जयित्वा चापि श्येत्रो
दीक्षाविधिमुपाचरेत् ॥ अन्यथा तद्विरोधेन कायनाशो भवेद् ध्रुवं ॥ सिद्धि
मन्त्रञ्च गृह्णीयाद्दुष्कुलादपि भैरवि ॥ स्वप्ने तु नियमो नास्ति दीक्षास्व

गुरुशिष्ययोः॥ स्वमल क्रिया दत्ते संस्कारेणैव शुध्यति॥ महाकपिलपञ्च
रात्रे॥ नातिबालो न वृद्धश्च न खर्वो न कृशस्तथा॥ नाधिकाङ्गो न ही
नाङ्गो न खल्वाटो न दन्तुरः॥ कल्पचिन्तामणौ॥ क्षयरोगी च दुश्चर्मा कु
नखी श्यावदन्तकः॥ कर्णहीनः कुस्त्रमाख्यश्च खल्वाटः खञ्जरीटकः॥
कर्णहीनो बधिरः खञ्जरीटः खञ्जः॥ न्यूनाङ्गहीनो गिरिकाङ्गः पिङ्गाक्षः भ्रतिनारि
कः॥ एवं डाडो वामनः कुब्जः श्वित्री चैव नपुंसकः॥ पूजिनास्तिको दुर्गेद्धि
नास्तिकः॥ इत्याद्यैर्देहजैर्दोषैः संयुक्तो निन्दितो गुरुः॥ संस्काररहितो मूर्खो
वेदशास्त्रविवर्जितः॥ श्रौतस्मार्तक्रियाशून्यः शुकभाषः सकृत्तितः॥ पु
रवाजनजीवी च नरो वै द्यश्च कामुकः॥ क्रूरो दम्भी मत्सरी च व्यसनी कृपणः खलः
उदासीनो ह्युदासीनां वनस्थो वनवासिनः॥ यतीनां च यतिः प्रोक्तो गृहस्था
नां गुरुर्गृही॥ वैष्णवे वैष्णवो मन्त्रः शैवे शैवस्तथा पुनः॥ भक्तिके त्रित
यं विद्याद्दीक्षास्वामी न संशयः॥ गुरुरपि गृहस्थ एव कुलार्णवे॥ सर्वशास्त्रा
र्थवेत्ता च गृहस्थो गुरुरुच्यते॥ तथा च कल्पे॥ कलत्रपुत्रवान्विप्रो दयालुः स
र्वसम्मतः॥ देवे पित्रे रिपौ मित्रे च गृहस्थो दीक्षको भवेत्॥ कुलचूडामणौ॥
पितृमातृतथाभ्रातृपितृव्यो मातुलस्तथा॥ येनोपदिष्टः स तत्रैस्मिन्नन्तं गुरुं समु
पासयेत्॥ न च बालो न वृद्धश्च न खर्वो न कृशस्तथा॥ इति हयशीर्षात्॥
कुसङ्गी नास्तिको भीतो महापातकचिह्नितः॥ देवाग्निगुरुविद्यादिपूजा
विधिपराङ्मुखः॥ तं ध्यानपरापूजादि मन्त्रेणानविवर्जितः॥ आ
लस्योपहतो भागीधर्महीन उपश्रुतः॥ इत्याद्यैर्बहुभिर्दोषै रागमोतैश्च
यत्नतः॥ वर्जनीयो गुरुः प्राज्ञैर्दीक्षासुस्थापनादिषु॥ मत्स्यसूक्ते॥ अपुत्र
श्चामृतपत्नीकः शक्तिहीनोऽथ वामनः॥ कुञ्जः कुष्ठः श्यावदन्तो वृषलीपति
रेव च॥ मातामहस्यानुजस्य सोदरस्य तथैव च॥ पित्रो र्मन्त्रं न गृ
ह्णीयात्तथा चैव भ्रातृस्य च॥ कदाचिद्यदि गृह्णाति पुनः संस्कारम
र्हति॥ त्याज्यगुरुमाह॥ कामाख्यातन्त्रे॥ मानुषे गुरुतत्त्वस्य कल्पना मा ग मुला॥
यथा भोक्तुं भोज्यं हि स्वर्णादिपात्रके न च॥ दीयते च तथा देवि तस्मै सु
र्वसमर्पणं॥ यदि निर्विद्यते तत्पात्रं स्वर्णं वापि कुलेश्वरि॥ तदा त्यजे
त्तु तत्पात्रं अन्यपात्रेण भोजयेत्॥ अतो हि मन्त्रं लुब्धं दुष्टं शिष्यो हि सं
त्यजेत्॥ सर्वेषां भुवने सत्यं ज्ञानाय गुरुरेव हि॥ ज्ञानान्मोक्षमवाप्नो

ति तस्माज्ज्ञानं परात्परम्॥ अतो योज्ञानदानं हि न क्षमे तं त्यजेद्गुरुं॥ अ
न्नाकाङ्क्षी निरन्नं हि यथा संत्यजति प्रिये॥ ज्ञानेन तन्त्रसमाभाति सद्गुरुः शि
व एव हि॥ अज्ञानिनं वर्जयित्वा शरणं ज्ञानिनो व्रजेत्॥ मधुलुब्धो यथा भृ
ङ्गः पुष्पात्पुष्पान्तरं व्रजेत्॥ ज्ञानलुब्धस्तथा शिष्यो गुरोर्गुर्वन्तरं व्रजेत्॥
तथा॥ पूर्वोक्तदोषयुक्तश्चेद्दीक्ष्यो वा वीर एव वा॥ तयोरपि न कर्तव्या शिष्य
णा गुरुभावना॥ किन्तु कार्य्यं हितेषित्वं गुरुता कल्पनं त्यजेत्॥ कौलाना
न्तन्त्रे च॥ महाविद्यां सम्प्रदायवीराचारं ददाति न॥ स याति नरकं घोरं पि
ष्योऽपि पतितो भवेत्॥ पशुभावे स्थितो यो हि कालिकातारयोर्मनुं॥ दत्वा
चारं रदेन्नैव नरकान्न निवर्तते॥ तस्मात् पशुगुरुस्त्याज्यः साधकैः सर्वदा
प्रिये॥ यदि दैवात्पशोर्दीक्षां लभते शाक्त एव च॥ कौलात्तु कौलकीं कृत्वा
तन्मन्त्रं पुनरालभेत्॥ शिष्यप्रकरणमुच्यते॥ कुलार्णवे॥ शरीरमर्थं प्रा
णांश्च सद्गुरुभ्यो निवेदयः॥ गुरुभ्यः शिष्यतो योगं शिष्य इत्यभिधी
यते॥ अथ शिष्यलक्षणं॥

तथा च नित्यानन्दे॥ गुरुं न मर्त्यं बुध्येत यदि बुध्येत तस्य तु॥ न कदाचिद्भवेत्सि
द्धिर्न मन्त्रैर्देवपूजनैः॥ तथा॥ एकग्रामस्थितः शिष्यस्त्रिसन्ध्यं प्रणमे
द्गुरुं॥ क्रोशमात्रस्थितो भक्त्या गुरुं प्रतिदिनं नमेत्॥ अर्द्धयोजनतः शिष्यः
प्रणमेत्पञ्चपर्वसु॥ एकयोजनमारभ्य योजनद्वादशावधि॥ दूरदेशस्थि
तः शिष्यो भक्त्या तत्सन्निधिं गतः॥ तत्तयोजनसंख्याक मासेन प्रणमेद्गु
रुं॥ यदि दूरे च चार्वङ्गि स्वगुरोर्गोचरं भवेत्॥ वर्षे वर्षे च कर्तव्यं गुरोश्च
रणवन्दनं॥ एतेन एकधा दक्षिणायने एकधा उत्तरायणे कर्तव्यं॥ —

रुद्रयामले॥ शिष्यस्तु तादृशो भूत्वा सद्गुरुं पर्युपाश्रयेत्॥ चतुर्भिरादैः संयु
क्तः श्रद्धावान् सुस्थिराशयः॥ अलुब्धः स्थिरगात्रश्च प्रेक्षाकारी जितेन्द्रि
यः॥ आस्तिको दृढभक्तिश्च गुरौ मन्त्रे च दैवते॥ एवंविधो भवेत् शिष्य इ
तरो दुःखकृद्गुरोः॥ सारदातिलके॥ शिष्यः कुलीनः शुद्धात्मा पुरुषार्थप
रायणः॥ अधीतवेदः कुशलो दूरमुक्तमनोभवः॥ हितैषी प्राणिनां नि
त्यमास्तिकस्त्यक्तनास्तिकः॥ स्वधर्मनिरतो भक्त्या पितृमातृहितोद्यतः
वाङ्मनःकायवसुभिर्गुरुशुश्रूषणे रतः॥ एतादृशो गुणोपेतः शिष्यो
भवति नापरः॥ समयाचारतन्त्रे॥ शिष्योऽपि स्वगुणैर्युक्तो गुरुभक्तिरतः सदा॥

धर्म्मकामादिसंयुक्तो गुरुमन्त्रपरायणः॥ सत्यबुद्धिर्गुरोर्मन्त्रे देवपूजनतत्
त्परः॥ गुरूपपदिष्टमार्गे च सत्यबुद्धिरुदारधीः॥ एवंलक्षणसंयुक्तः
शिष्यश्चापि परीक्षितः॥ इति शिष्यलक्षणं॥ रुद्रजामले॥ कामुकं कुटिलं
लोकनिन्दितं सत्यवर्जितं॥ अविनीतमसमर्थं प्रज्ञाहीनं रिपुप्रियं॥ स
दापापक्रियायुक्तं विद्याशून्यं जडात्मकं॥ कलिदोषसमाहाङ्गं वेदक्रिया
विवर्जितं॥ आश्रमाचारशून्यञ्च अशुद्धान्तःकरणोद्यतं॥ सदाश्रद्धाविरहि
तमधर्मं क्रोधिनं भ्रमं॥ असच्चरित्रं विगुणं परदारातुरं तथा॥ सत्वद्वाङ्कं स
म्हहोमसभक्तं हैतचेतसं॥ नानानिन्दाव्रताङ्कं च तं शिष्यं वर्जयेद्गुरुः॥
इति नि[illegible]न्द्यशिष्यलक्षणम्॥ जामले॥ यद्दिनं त्यजते वीरधनदानादिहे
तुना॥ नारकी शिष्यवत्यापि नहि शिष्यमवाप्नुयात्॥ क्षणदासिद्धः सम
वेच्छिष्यासादितपातकैः॥ अकस्मान्नरकं प्राप्य कार्य्यनाशाय केवलं॥
विचार्य्य यत्नाद्विधिवच्छिष्यसंग्रहमाचरेत्॥ अन्यथा शिष्यदोषेण नरक
स्थो भवेद्गुरुः॥ इति वर्जनीयशिष्यकरणनिन्दा॥ शिष्यकर्त्तव्याकर्त्तव्ये॥
पित्रादिमन्त्रनिषेधमाह॥ योगिनीतन्त्रे॥ पितुर्मन्त्रं न गृह्णीयात्तथा मातामह
स्य च॥ सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च॥ तथा च गणेशविमर्षि
न्यां॥ यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः॥ विविक्ताश्रमिणो
दीक्षा न सा कल्याणदायिका॥ रुद्रजामले॥ न पत्नीं दीक्षयेद्भर्त्ता न पिता
दीक्षयेत्सुतां॥ न पुत्रञ्च तथा भ्राता भ्रातरं न च दीक्षयेत्॥ सिद्धमन्त्रो
यदि पतिस्तदा पत्नीं स दीक्षयेत्॥ शक्तित्वेन वरारोहे न च सा पुत्रिका
भवेत्॥ इत्या[illegible]दिनिषेधवचना॥ देभ्यो मन्त्रं न गृह्णीयात् इदन्तु सिद्धेतर
विषयं॥ सिद्धमन्त्रे न दूष्यतीति वचनात्॥ यतेरपि दीक्षोक्ता शक्तिजामले॥
रुद्रजामले॥ यथा॥ न लङ्घयेद्गुरोराज्ञामुत्तरं न वदेत्तथा॥ दिवारात्रौ गुरोरा
ज्ञां दासवत्प्रतिपालयेत्॥ इति गु[illegible]र्वाज्ञापालनविधिः॥ न शृणुयाद्गुरोर्वाक्यं
श्रुत्वा ह्यपराङ्मुखः॥ अहितं वा हितं वापि रौरवं नरकं व्रजेत्॥ आज्ञा
भङ्गं गुरोर्देव यः करोति स मूढधीः॥ प्रयाति नरकं घोरं शूकरत्वमवाप्नुया
त्॥ तथा एकविंशतिपटले॥ वृथा धर्म्मं वृथाचार्य्यं वृथा दीक्षां वृथा तपः॥ वृ
था स्तुतिमाख्यातिं गुर्वाज्ञालङ्घनान्नृणां॥ इति गु[illegible]र्वाज्ञालङ्घने दोषः॥
द्वितीयपटले॥ आज्ञाभङ्गं तथा निन्दां गुरोरप्रियवर्णनं॥ गुरुद्रोहञ्च यः

कुर्य्यात्तत्संसर्गं न कारयेत्॥ कुलार्णवे॥ गुरुद्रव्याभिलाषी यो गुरु
स्त्रीगमनोत्सुकः॥ स तिर्य्यग्योनिमाप्नोति क्रव्यादैर्भक्ष्यते प्रिये॥ रुद्र
जामले॥ गुरुद्रव्याभिलाषी च गुरुस्त्रीगो भवेद्यदि॥ पातकञ्च भवेत्त
स्य प्रायश्चित्तं न कारयेत्॥ प्रायश्चित्तं न कारयेदित्यनेन प्रायश्चित्तान्न हि
पातकं भवेदिति सूचितं॥ यथा॥ कामतो ब्राह्मणवधे निष्कृतिर्न विधीय
ते॥ इति मनुवचनमध्ये तदभिप्रायकं॥ भविष्यपुराणे॥ कामतो ब्राह्मण
वधे यदेतन्मनुनोदितं॥ एतदेकान्ततो विप्रवधवर्ज्जेनार्थमुदीरितं॥
जामले॥ गुरुं दुष्कृत्य रिपुवन्निर्गत्य परिवादतः॥ अरण्ये निर्ज्जने देशे
स भवेद्ब्रह्मराक्षसः॥ इति गुर्वनिष्टकरणदोषः॥ गुरुणा त्यक्तायां अपा
ङ्क्ताहि सुराः सर्व्वे अशक्ता मुनयस्तथा॥ गुरुशापस्य तात्क्षीनाः क्षयं
यान्ति नः संशयः॥ इति गुरुशापजन्यदोषः॥ रुद्रजामले॥ गुरोर्निन्दाञ्च
पैशुन्यं यः शृणोति दिनान्तरे॥ तस्य तद्दिनजां पूजां न तु गृह्णाति सुन्द
री॥ इति गुरुनिन्दाश्रवणदोषः॥ कुला[illegible]र्णवे॥ यत्र श्रीगुरुनिन्दा स्या
त्पिधाय श्रवणे स्वके॥ गच्छेत्तस्माद्विनिष्क्रम्य दूरं न शृणुयात्तथा॥
तीर्थाचारयुतो भोगी ज्ञानवान्सुसमाहितः॥ नित्यनिष्ठो यतिः स्यात्तो गुरुः
स्याद्धोतिको पि च॥ तथा च सिद्धजामले॥ यदि भाग्यवशेनैव सिद्धविद्यां ले
भे प्रिये॥ तदैव तां दीक्षेत त्यक्त्वा गुरुविचारणं॥ तथा॥ ज्ञानाद्वाच्वे
तथाज्ञानात्पितुर्दीक्षां समाचरेत्॥ प्रायश्चित्तं ततः कृत्वा पुन
र्दीक्षां समाचरेत्॥ पितुरित्युपलक्षणं॥ तथा मातामहादीनामपि॥
प्रायश्चित्तन्तु अयुतं सावित्रीजपः सर्व्वत्रदर्शनात्॥ पाङ्खवः॥ दश
साहस्रजापेन सर्व्वकल्मषनाशिनी॥ तथा मत्स्यसूक्ते॥
गुरोर्नाम स्मरेत्पश्चात्तच्छ्रवणे सा प्रतिक्रिया॥ इति गुरुनिन्दाश्रवणप्रतीकारः॥
जामले॥ गतश्रीश्च गतायुश्च गुरोर्निन्दाकरो नरः॥ कल्पकोटिशतं देवि न
रके पतति ध्रुवं॥ तथा॥ एवं श्रुत्वा महादेवि गुरुनिन्दां करोति यः॥ स या
ति नरकं घोरं यावच्चन्द्रदिवाकरौ॥ इति गुरुनिन्दाकरणे दोषः॥ गुरुतन्त्रे॥
गुरौ मनुष्यताबुद्धिः शिष्याणां यदि जायते॥ नहि तस्य भवेत्सिद्धिः क
ल्पकोटिशतैरपि॥ इति गुरौ मनुष्यज्ञानजन्यदोषकथनं॥ कुलार्णवे॥

आज्ञाभङ्गोऽर्थहरणं गुरोरप्रियवर्णनं ॥ गुरुद्रोहमिदं प्रोक्तं यः कुर्यात्स तु पात
की ॥ गुरुकोपात्तु नाशः स्याद्गुरुद्रोहात्तु पातकं ॥ विस्मृत्य गुरुनिन्दा
यां गुर्वनिष्टं महापदः ॥ जीवेदग्निं प्रविष्टो वा नरः पीतविषोपि वा ॥ मृ
त्युहस्तगतो वापि नापराधकरो गुरोः ॥ इति गुर्वपराधादिदोषः ॥ रुद्र
जामले ॥ गुरोस्तत्सेवनां नित्यं त्यक्त्वा न गुर्वन्तरमाश्रयेत् ॥ गुरुनिन्दा न कर्त्तव्या न
श्रोतव्या कदाचन ॥ इति गुरुसन्ततित्यागनिषेधः ॥ गुर्वादिमाननप्रकार
श्च पुरश्चरणरसोल्लासे ॥ गुरुं च भावयेन्नित्यं सदाशिवमयं सदा ॥ गु
रोरुत्थानं च चार्व्वङ्गि गणेशसदृशं सदा ॥ गुरोस्तु बावरारोहे वानीलक्ष्मी
दिवप्रिये ॥ गुरोः कुलं महेशानि भैरवाणां गणं यथा ॥ कुलागमे शक्तान
न्दतरङ्गिण्यां च ॥ गन्धैर्माल्यैश्च चार्व्वङ्गि पूजयेत्सर्वदा गुरुं ॥ गुरोः पत्नीं त
थादेवि पूजयेद्विधिनामुना ॥ कुलार्णवतन्त्रे ॥ ऊढाध्यतात पा क्रीता मू
ल्येन च समाहृता ॥ सकला काम गता वापि पञ्चधा गुरुबोधिताः ॥ अल ^
ब्धाः पूजनीयाश्च अगम्याश्च गुरुबोधिताः ॥ वृहन्नीलतन्त्रे ॥ गुरुपत्नी च
युवतीं न संवाह्येत पादयोः ॥ पुनर्विंशतिवर्षेण गुरुदोषौ विजानता ॥
अत एव महेशानि न कुर्यात्पादसेवनं ॥ कुलागमे ॥ गुरुवद्गुरुपुत्रेषु गुरुव
त्तत्सुतादिषु ॥ पूजयेत्प्रत्यहं भक्त्या अमुना विधिना प्रिये ॥ पूजाक्रमसारतन्त्रे च ॥
गुरोरभावे चार्व्वङ्गि गुरुपत्नीं प्रपूजयेत् ॥ तदभावे च चार्व्वङ्गि गुरुपुत्रं स
समर्च्चयेत् ॥ तदभावे वरारोहे गुरुकन्यां च पूजयेत् ॥ तदभावे च चा
र्व्वङ्गि गुरुस्नुषां प्रपूजयेत् ॥ एषामभावे चार्व्वङ्गि गुरुगोत्रं प्रपूजयेत् ॥
तदभावे वरारोहे तस्य मातामहस्य च ॥ मातुलं मातुलानीं वा पूजये
द्विधिनामुना ॥ इति गुरुकुलपूजाक्रमकथनं ॥ तथा ॥

निर्व्वीर्य्यं च पितुर्मन्त्रं शैवशाक्तैर्न दूष्यते ॥ तेन चैव कौलिकमन्त्रदीक्षापदे ॥
अत्र हेतुः योगिनीतन्त्रे ॥ शाक्तादिविद्यामधिकृत्य दीक्षानिषेधात् ॥ यद्वा शाक्ते
तारादिविद्यायां मन्त्रस्य तत्केन प्रतिपादनात् ॥ तथा च निजकुलतिलका
य ज्येष्ठपुत्राय दद्यादित्यादि ॥ श्रीक्रमेपि ॥ मनुर्विमृष्य दातव्यो ज्येष्ठपुत्रा
य धीमते ॥ महातीर्थे उपरागे सति सर्व्वत्र नादोषः ॥ तथा च विष्णुमन्त्रमधिकृत्य ॥

पूजाकाले च चार्व्वङ्गि आगच्छेच्छिष्यमन्दिरे ॥ गुरुर्व्वा गुरुपत्नी वा पुत्रो
वापि समागतः ॥ ज्येष्ठो वाप्यर्च्चनामध्ये शिष्यः सर्व्वाश्च नोत्यजेत् ॥ –

तमेव पूजयेच्छिष्य इति शास्त्रस्य निर्णयः ॥ इति पूजाकाले गुर्व्वादावागते सति
शिष्यकर्त्तव्यं ॥ तत्रैव ॥ शिष्यस्य तद्दिनं देवि कोटिसूर्य्यग्रहैः समं ॥ चन्द्रग्र
हनकाले हि तद्दिनं वरवर्णिनि ॥ गुरोर्दर्शनमात्रेण सर्व्वपापैः प्रमुच्यते ॥
तत्क्षणाच्च स्वचलापादि दानं कुर्य्याद्विचक्षणः ॥ इति गुरुदर्शनदिनप्रशंसा ॥
गुरौ प्रीतिं समापन्ने देवता प्रीतिमाप्नुयात् ॥ देवे च प्रीतिमापन्ने मन्त्रसिद्धिर्भवे
द्ध्रुवं ॥ इति गुरुप्रीतिफलं ॥ मुण्डमालातन्त्रे ॥ गुरुपूजां विना देवि इष्टपूजां क
रोति यः ॥ मन्त्रस्य तस्य तेजांसि हरते भैरवः स्वयं ॥ रुद्रजामले ॥ गुरुपूजां
विना नाथ कोटिपुण्यं वृथा भवेत् ॥ अतः सर्व्वजनैः ख्यातं गुरुणा सिद्धिमाप्नु
यात् ॥ राघवभट्टधृते ॥ गुर्व्वननुज्ञाः क्रियाः सर्व्वा निष्फलाः स्युर्गतो ध्रुवं ॥ ज
पो होमार्च्चनविधिः कार्य्यो दीक्षान्वितैः सतः ॥ तथा ॥ प्रणम्य गुरुपादाब्जं ^
ध्यात्वा च गुरुपादुकां ॥ ज्ञात्वा परमतत्त्वं वै योजयेत्कुलचण्डिकां ॥ सक
तार्थः स धन्यश्च स कुलज्ञः स पण्डितः ॥ स भाववान्महादेवि जायते
नात्र संशयः ॥ गुरुगीतायां ॥ संसारसागरसमुद्धरणैकमन्त्रं ब्रह्मादिदेव
मुनिसेवितसिद्धिमन्त्रं ॥ दारिद्र्यदुःखभयशोकविनाशमन्त्रं वन्दे महाभ
यहरं गुरुदेवमन्त्रं ॥ गुरुतन्त्रे ॥ गुरोः सेवा गुरोर्ध्यानं गुरोः स्तोत्रं गुरोर्जपः
गुरोः पूजा गुरोस्तृप्तिर्गुरौ भक्तिर्नृणां यदि ॥ जन्मभाग्यवशाद्देवि येषां सं
जायते क्वचित् ॥ तेषां मन्त्रो भवेत्सिद्धिर्जीवन्मुक्ताश्च ते नराः ॥ गुरोर्गेहे स्थि
तः शिष्यो यत्पुण्यं समुपाचरेत् ॥ तत्पुण्यमक्षयं प्रोक्तं पुण्यतीर्थे शताधिकं ॥
इति गुरुगृहनिष्ठादितत्पुण्यकर्मफलं ॥ तत्रैव ॥ गुरोः पादरजो यस्तु सुधीर्मू
र्द्ध्नि धारयेत् ॥ स तीर्थकोटिजफलात्फलं दशगुणं लभेत् ॥ गुरोः पादो
दकं यस्तु नित्यं पिबति भक्तितः ॥ सार्द्धत्रिकोटितीर्थानां फलं स लभते ध्रुवं ॥
गुप्तसाधनतन्त्रे ॥ त्रिसन्ध्यं पिबते यस्तु गुरुपादोदकं सुधीः ॥ तस्य नास्ति पुन
र्जन्म संसारे मोहवर्त्मनि ॥ ब्रह्मा विष्णुश्च रुद्रश्च सर्व्वाश्च पितृदेवताः ॥

माधुपर्कं त्वया विप्र वक्ष्यामि सकलं तव ॥ ब्रह्मणा कथितं पूर्व्वं वशिष्ठाय म
हात्मने ॥ वशिष्ठोपि स्वपुत्राय मत्पित्रे दत्तवान्स्वयं ॥ प्रसन्नहृदयः स्वच्छः
पिता मे करुणानिधिः ॥ कुरुक्षेत्रे महातीर्थे सूर्य्यपर्व्वणि दत्तवान् ॥ ७

इत्यादि वैशम्पायनसंहितायां॥ शौनकं प्रति व्यासवचनं॥ योगिनीतन्त्रे॥ निर्वीर्य्ये
श्च पितुर्म्मे जंन्त था माता महस्य च॥ स्वकुल क्रियादत्ते संस्कारेणैव शुध्य-
ति॥ यत्नूसाध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रियः॥ सर्व्वमन्त्रार्थतत्त्वज्ञा सु
शीला पूजने रता॥ गुरुयोग्या भवेत्साहि विधवापदिवर्जिता॥

तिष्ठति श्रीगुरोः पादपद्मार्च्चितजले शुभे॥ गुरोः पादोदकं यस्तु नित्यं पिबति मा
नुषः॥ धर्म्मार्थकाममोक्षाणामधिपो जायते च सः॥ योगिनीतन्त्रे॥ अपि ध्या
वि गलत्पादप्रक्षालनजलं यदि॥ पिबेदनन्तभावेन यः स देवीपुरं व्रजेत्॥ गुप्तसा
धनतन्त्रे॥ गुरोः पादोदकं यस्तु शिरसा धारयेन्नरः॥ स सर्वतीर्थजं पुण्यं लभ
ते नात्र संशयः॥ गुरुतन्त्रे॥ त्रिसन्ध्यं पूजयेद्यस्तु गन्धपुष्पैर्जगद्गुरुं॥ तस्य
किं मन्त्रपूजादिविधानैर्न्यासजालकैः॥ गुरोरन्नं महादेवी यस्तु भक्षणमाचरे
त्॥ कोटिजन्मार्ज्जितं पापं तत्क्षणात्तस्य नश्यति॥ न स्नानं पादशौचं च न चै
वाचमनं चरेत्॥ प्राप्तिमात्रेण भोक्तव्यं नैव स्नानं निचारयेत्॥ न चास्नानेऽयं न
कौलिन्यं न जातीनां विचारणं॥ न स्नातिस्तु तन्वन्धूनां सभ्यानां तत्र चिन्तनम्
एकस्यान स्थितं ह्यन्नं तत्तीर्थमण्डलीकृतं॥ भोक्तव्यं मोक्षदं देवी भक्त्या मु
ग्धेन चिन्तयेत्॥ गुरोरन्नं सुधाज्ञाय यस्त्वश्नाति मानरः॥ शिवोपि तस्य देवे
तुष्टो भवति नान्यथा॥ गुरोरुच्छिष्टकं देवी भुक्तिमुक्तिप्रदं भवेत्॥ अवश्यं वै
ह्लवेः शिष्ये भोक्तव्यं तद्दिने दिने॥ योगिनीतन्त्रे॥ गुरुच्छिष्टं च देवेशि तत्सु
तोच्छिष्टमेव च॥ भोजनीयं न संदेहाविकारस्त्विदधोगतिः॥ तदुच्छिष्टं महा
देवी ब्रह्मादीनां सुदुर्लभं॥ गुरूच्छिष्टं तथा प्रोक्तं महामृतं परात्परं॥ एतेन
गुरुपत्नीप्रसादं न भक्षणेऽपमित्यायातं तत्र॥ गुरुपत्नी महेशानि गुरुरेव न संश
य॥ इत्यादिवचनात्॥ गुरुणा गुरुपत्न्या वा गुरुपुत्रेण वा प्रिये॥ दत्तं चान्नं मुष्टि
मात्रं वा योऽश्नीयाद्वर्षविंशतिः॥ चिरजीवी जरारोगैर्विमुक्तो सोऽशिवो भवेत्॥
गुरुतन्त्रे॥ गुरोरुच्छिष्टकैर्यस्तु सर्वाङ्गमनुलेपयेत्॥ वज्रोपि तस्य गात्राणि
न भिनत्ति कदाचन॥ गुरोरुच्छिष्टमन्नं यो भक्षयेद्भक्तिभावतः॥ अन्नपूर्णा
जगद्धात्री तस्यैश्वर्यं प्रयच्छति॥ इति गुरोरुच्छिष्टभोजनफलं॥ कदाचित्पर
मेशानि यदि तन्त्रभ्रमो भवेत्॥ न तस्य निष्कृतिर्दृष्टा कल्पकोटिशतैरपि॥ न भ

क्षयेद्यस्तु मोहाद्वै गुरोरुच्छिष्टकं प्रिये॥ तस्य क्रुद्धा भवेत्सर्वं हि विपत्तिश्च
पदे पदे॥ इति गुरोरुच्छिष्टपरित्यागदोषकथनं॥ तत्रैव॥

स्त्रीया दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा स्मृताः॥ इदन्तु गुरोरुपासितमन्त्रपरम
तथा च भैरवीतन्त्रे॥ स्वीयमन्त्रोपदेशात्तु न कुर्याद्गुरुचिन्तनं॥ मातुरित्युपासिते
ष्टगुरुं॥ अनुपासिते शुभफलदामित्यर्थः॥ सिद्धमन्त्रविषयञ्चेति केचित्॥
वस्तुतस्तु स्त्रीपदं विधवापरं॥ योगिनीतन्त्रे एकवाक्यबलात्॥ विधवायाः सुता
देशात्कन्यायाः पितुराज्ञया॥ नाधिकारो यतो नार्य्याः सधवा भर्त्तुराज्ञया॥ -

पादुकावसनं छत्रं शयनं भूषणादिकं॥ दृष्ट्वा गुरोर्नमस्कुर्य्यात्तदात्मभोगं न का
रयेत्॥ कुलार्णवे॥ पादुकामासनं छत्रं वाहनं वस्त्रचामरं॥ दृष्ट्वा गुरोर्नमस्कु
र्य्यान्नात्मकुभोग्यकल्पयेत्॥ पादप्रक्षालनं स्नानमभ्यङ्गं दन्तधावनं॥ मूत्रनि
ष्ठीवनं क्षौरं शयनं स्त्रीनिषेवणं॥ वीरासनञ्च दुर्वाक्यमासनं हास्यरोदनं
केशमोचनमुच्छीर्षं कञ्चुकालग्नतां तथा॥ पादप्रसारणं वादं कलहं दूषणं प्रि
ये॥ अङ्गभङ्गाङ्गवाद्यादिकरास्फालविधूननं॥ द्यूतकुक्कुटमल्लादियुद्धमित्यादि
चान्तिके॥ गुरुलिङ्गमहालिङ्गपीठक्षेत्राश्रयेषु च॥ नाचरेदाचरेन्मोहाद्देवता
शापमाप्नुयात्॥ उपचारं विना तिष्ठेद्गुर्वग्रे नेच्छया विशेत्॥ इति गुरुस
मीपे महापीठादौ च पादप्रक्षालनादिनिषेधः॥ योगिनीतन्त्रे॥ स्वरीयद्यप्य
संस्कारं गुरोराज्ञावशात्पिबेत्॥ प्रायश्चित्तं न तत्रास्ति वेदेऽपि स्थितमेव हि॥
अपि तत्र विरुद्धं वा गुरुणा कथ्यते यदि॥ तत्तन्मतं भवेद्देवि महारुद्रवचो यथा॥
इति गुरोराज्ञया निषिद्धाचरणे दोषाभावकथनं॥ निर्गतं यद्गुरोर्वक्त्रात्सर्वं शा
स्त्रं तदुच्यते॥ गुरुकार्य्यं स्वयं शक्तो नापरं प्रेरयेत्प्रिये॥ रुद्रयामले॥ बन्धुभृत्य
पुरैर्भृत्यैः सहितोप्यतिभक्तिमान्॥ गच्छंस्तिष्ठन्स्वपन्जाग्रज्जपन्गु
रुं तु पूजयेत्॥ गुर्वाज्ञामेव कुर्वीत तद्गतेनान्तरात्मना॥ अभिमानो न
कर्त्तव्यो जातिविद्याधनादिभिः॥ सर्वदा सेवयेन्नित्यं शिष्यः श्रीगुरुसं
निधौ॥ इति गुरोरग्रे मानविषेधः॥ तत्रैव॥ सदा च पादुकामन्त्रं जि
ह्वाग्रे यस्य वर्त्तते॥ अनायासेन धर्म्मार्थकाममोक्षं लभेन्नरः॥ श्रीगुरोश्च
रणाम्भोजं ध्यायेद्यश्च सदैव तं॥ भुक्तये मुक्तये वीर नान्यो भक्तस्ततोऽधिकः॥

विद्याङ्गमासनं मन्त्रं मुद्रां तन्त्रादिकं प्रभो ॥ सर्वं गुरुमुखाल्लब्धं सफलं नान्य
था भवेत् ॥ कन्दले कोमले वापि प्रासादे संस्थिते तथा ॥ दीर्घकाष्ठे तथा पृष्ठे
गुरोरेकासनं त्यजेत् ॥ श्रीगुरोः पादुकामन्त्रं मूलमन्त्रं स्वपादुकां ॥
नाधिकारश्चेति स्वाध्येयाधिकारस्य ॥ स्त्रीणां गर्भवतीनाञ्च दीक्षायां नैव दूषणं ॥
न कुर्य्याद् दृश्यमाने मास्ति कृत्वा च नरकी भवेत् ॥ स्वप्नलब्धमन्त्रो यदि सद्गुरुं प्राप्नो
ति तदा ॥ तत एव तन्मन्त्रं गृह्णीयात् नो चेत् कुलपूर्णकलसे गुरोः प्राणप्रति
ष्ठां विधाय वटपत्रे कुङ्कुमेन लिखितं मन्त्रं तत्कलसे प्रक्षिप्य उद्धृत्य मन्त्रं
गृह्णीयादित्यर्थः ॥ तथा हि स्वप्नलब्धे च कलसे गुरोः प्राणान्निवेशयेत् ॥
वटपत्रे कुङ्कुमेन लिखित्वा ग्रहणं शुभं ॥ ततः सिद्धिमवाप्नोति चान्य
था विफलं भवेत् ॥ स्वदत्तगुरोरभावेन स्वत्वेन तस्मादेव मन्त्रं गृह्णीयात् ॥ स्व
प्ने तु नियमो नहीति नारदवचनात् ॥ तन्त्रसिद्ध्यादिनियमो नास्ति ॥
शिष्याय नैव देवेशः प्रवदेद्यस्य कस्यचित् ॥ यद्यदात्महितं वस्तु तत्तद्द्रव्यं नैव
वंचयेत् ॥ गुरोर्लब्धैकवर्णाय यस्तस्य तुष्यामि सुव्रत ॥ भक्त्या वित्तानुसारेण गु
रुमुद्दिश्य यत्कृतं ॥ तयोरेव फलं देव तुल्यमाढ्यदरिद्रयोः ॥ सर्वस्वमपि
यो दद्याद् गुरुभक्तिविवर्जितः ॥ नरकं तदवाप्नोति भक्तिरेवात्र कारणं ॥ कु
लार्णवे तु ॥ गुरुभक्त्या च शक्रत्वं अभक्त्या शूकरो भवेत् ॥ गुरुभक्तिं विना
केवलं मयि भक्ता विति तात्पर्य्यं ॥ गुरुभक्तिपरं नास्ति सर्वशास्त्रेषु तत्त्व
तः ॥ इति गुरुभक्तिफलं ॥ धिग्धनं धिग्बलं तेषां धिक्कुलं धिग्विचेष्टितं ॥
तेषां नोत्पद्यते भक्तिर्गुरुदेवे महेश्वरि ॥ जामले ॥ गुरुस्त्रीपुत्रबन्धूनां दो
षं नैव प्रकाशयेत् ॥ तत्क्षयेन च तद्द्रव्यं दत्तं नैव परित्ययेत् ॥ गुरुगीतायां ॥
गुरुणा दर्शिते मार्गे मनःशुद्धिं च कारयेत् ॥ गुरुणा सदसद्वापि यदुक्तं त
न्न लङ्घयेत् ॥ गुरोरग्रे न वक्तव्यमसत्यञ्च कदाचन ॥ पिच्छिलातन्त्रे ॥
पैत्रं गुरुकुलं यस्तु त्यजेद्वै धर्ममोहितः ॥ स याति नरकं घोरं यावच्चन्द्रार्क
तारकं ॥ कुलार्णवे ॥ ब्रह्मादिस्तम्बपर्य्यन्तं यस्य मा गुरुसन्ततिः ॥ तस्य मे
सर्वशिष्यस्य कोलः पूज्यो महीतले ॥ इति निश्चित्य तद्बुद्धिर्यैः सभवेदा
वयोः प्रियः ॥ श्रीगुरुः कुलशास्त्राणि पूजास्थानानि यानि च ॥ भक्त्या श्री
पूर्वकं देवि प्रणम्य च प्रकीर्त्तयेत् ॥ गुरुं नाम्ना च भाषेत जपकालादृते प्रिये ॥

श्रीनाथदेव स्वामीति विवादे साधने वदेत् ॥ अथ गुरुशुश्रूषा ॥ आत्मार्थमान्यसद्भा
वैः शुश्रूषास्याच्चतुर्विधा ॥ शुश्रूषया धियादेवि शिष्यः संतोषयेद् गुरुं ॥ यदेप
देशमेधस्य फलं प्राप्नोत्यसंशयं ॥ केवलं गुरुशुश्रूषा त्वत्स्वरूपकारिणी प्रि
ये ॥ भक्तिसहिता चेत्सा सर्वकामफलप्रदा ॥ क्षीयन्ते सर्वपापानि वर्द्ध
न्ते पुण्यराशयः ॥ सिद्ध्यन्ति सर्वकार्य्याणि गुरुशुश्रूषया प्रिये ॥ यद्यदात्महि
तं वस्तु तत्तद्वित्तमवञ्चयन् ॥ गुरुदेवार्च्चको यस्तु तस्य पुण्यं न गण्यते ॥
तथा विद्याधराचार्य्यधृतं जावालवचनं ॥ मध्यदेशगुरुक्षेत्रनाटकोङ्कनसम्भवाः
अन्तर्वेदिप्रतिष्ठाना आवन्त्याश्च गुरूत्तमाः ॥ मध्यदेशः आर्य्यावर्त्तः ॥ गौडाः शा
ल्वोद्भवाश्चैव मगधाः केवलास्तथा ॥ कोशलाश्च दशार्णाश्च गुरवः सप्तम
ध्यमाः ॥ अथ दीक्षाविचारादिनिर्णयः ॥ दीक्षां विना जपस्य दुष्टत्वं प्रथमं
माति रूप्यते ॥ दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात्पापस्य संक्षयं ॥ तस्माद्दीक्षेति
सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः ॥ सर्वाश्रमेषु दीक्षाया आवश्यकत्वं ॥ तथा च ॥
गुरुमित्रसुहृद्द्वामीदासाद्यान् नावमानये ॥ न निन्देदस्य समयान् वेदशास्त्रागमा
दिकान् ॥ तथा ॥ विविक्षुर्देशिकावासं शान्तचित्तोतिभक्तिमान् ॥ वाहनं
पादुकाच्छत्रं चामरव्यजनादिकं ॥ ताम्बूलं वेशमुत्सृज्य प्रविशेच्च शनैः श
नैः ॥ देवतारूपधारित्वाच्छिष्यानुग्रहकारणात् ॥ करुणामयमूर्त्तित्वाद्देशि
कः कथ्यते प्रिये ॥ रिक्तहस्तश्च नोपेयाद्राजानं दैवतं गुरुं ॥ फलपुष्पाम्बरादी
नि यथाशक्त्या समर्पयेत् ॥ मन्त्रग्रहणकाले नाडीविचारस्यावश्यकत्वात्तदत्र नि
रूप्यते ॥ अथ च ॥ नरपतिजयचर्य्यास्वरोदयधृतब्रह्मजामले ॥ अश्विन्यादि
लिखेच्चक्रं सर्पाकारं त्रिनाडिकं ॥ तत्र वेधवशाज्ज्ञेयं विवाहादिशुभाशुभं ॥
त्रिनाडिवेधनक्षत्रमश्विन्यार्द्रायुगोत्तरा ॥ हस्तेन्द्रमूलवारुण्यः पूर्वभाद्रपदा
तथा ॥ याम्यः सौम्या गुरुर्योनिश्चित्रा मित्रं जलाह्वयं ॥ कनिष्ठा चोत्तराभाद्र
मध्ये नाडी व्यवस्थिता ॥ कृत्तिका रोहिणी सर्पो मघा स्वाति विशाखकं ॥ उत्तरा
श्रवणा पौष्णं क्रोडनाडी व्यवस्थिता ॥ अश्विन्यादिनाडिवेधक्षे षट्कं हि
यकं क्रमात् ॥ याम्यादित्तुर्य्यौ तुर्य्यश्च कृत्तिकादिद्विषट्ककं ॥ एवं निरी
क्ष्येद्वेधं कन्यामन्त्रे गुरौ सुरे ॥ पण्यस्त्री स्वामिमित्रे सुदेशग्रामे पुरेगृ
हे ॥ एकनाडीस्थधिष्ण्यानि यदि स्युर्वरकन्ययोः ॥ तदा वेधं विजानी
याद् गुर्व्वादिषु जपेषु च ॥ एकदेयस्य जन्मर्क्षं तस्य जन्मर्क्षतो बुधः ॥ प्रश
स्तं जन्मभं यस्य तस्य नामर्क्षतो वदेत् ॥ द्वयोर्जन्मभयोर्वेधे न कर्त्तव्यं
कदाचन ॥ एकनाडीस्थिता चेत्स्याद् हुर्त्तेनाशाय चाङ्गना ॥ एकनाडी
स्थिता यत्र गुरुर्मन्त्रश्च देवता ॥ तत्र वेधं रुजां मृत्युं क्रमेण फलमादि
शेत् ॥ प्रभुः पुण्याङ्गनामित्रं देशो ग्रामः पुरं गृहे ॥

एकनाडीगतात्याज्या भव्या वेधविवर्जिता॥ दीक्षाकार्य्ये मण्डपस्यावश्य
कर्त्तव्यत्वेन तदर्थं॥ भूमिशोधनमाह कपिलपञ्चरात्रे॥ तत्र भूमिं परीक्षेत्तत्त्वा
र्थतत्त्वविशारदः॥ स्फुटिता च सशल्या च वल्मीकारोहिणी तथा॥ दूरतः परि
वर्ज्या भूः कर्त्तुरायुर्धनापहा॥ स्फुटितेति चकारेण ऊषरापि विवर्ज्जनीया॥
तन्त्रान्तरे॥ स्फुटिता मरणं कुर्य्याद्दूषरा धननाशिनी॥ सशल्या क्लेशदा नित्यं वि
षमा शत्रुतो भयं॥ इति वर्ज्जनीयभूमिकथनं॥ ईशाकोणप्लवा सा च कर्त्तुः श्री
दा सुनिश्चितं॥ पूर्वप्लवा वृद्धिकरी धनदा तूत्तरप्लवा॥ वह्निप्लवा मरणं व्याधिं
कुर्य्याद्दग्निप्लवा मही॥ धर्म्मराजप्लवा भूमिर्नित्यं मृत्युभयप्रदा॥ गृह
क्षयकरी सा च भूमिर्या नैरृतप्लवा॥ धनहानिकरी पश्चात्कीर्त्तिता वरु
णप्लवा॥ वातप्लवा तथा भूमिर्नित्यमुद्वेगकारिणी॥ इति दिक्प्लवशुभा
शुभकथनम्॥ श्वेता तु ब्राह्मणी भूमी रक्ता वै क्षत्रिया स्मृता॥ वैश्या पीता
तु विज्ञेया शूद्रा कृष्णा प्रकीर्त्तिता॥ ब्राह्मणी घृतगन्धा स्यात् क्षत्रिया रक्त
गन्धिका॥ क्षीरगन्धा भवेद्वैश्या शूद्रा विड्गन्धिनी क्षितिः॥ मधुरा ब्राह्म
णी भूमिः कषाया क्षत्रिया स्मृता॥ वैश्या तिक्ता च विज्ञेया शूद्रा स्यात् कटु
का मही॥ ब्राह्मणी भूः कुशोपेता क्षत्रिया स्याच्छराकुला॥ कुशकाशाकुला वैश्या
शूद्रा सर्वतृणाकुला॥ इति ब्राह्मण्यादिभूमिज्ञानकथनम्॥

दीक्षामूलं जपं सर्वं दीक्षामूलं परं तपः॥ दीक्षामाश्रित्य निवसेद्यत्र कुत्राश्रमे व
सन्॥ अदीक्षिता ये कुर्वन्ति जपपूजादिकाः क्रियाः॥ न भवन्ति प्रिये तेषां शि
लायामुप्तबीजवत्॥ देवि दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः॥ त
स्मात् सर्वप्रयत्नेन गुरुणा दीक्षितो भवेत्॥ अदीक्षितोऽपि मरणे रौरवं
नरकं व्रजेत्॥ अदीक्षितस्य मरणे पिशाचत्वं न मुञ्चति॥ तस्माद्दीक्षां
प्रयत्नेन सदा कुर्य्याच्च तान्त्रिकाम्॥ तथा च नवरत्नेश्वरे॥ सर्वासामपि
दीक्षाणां मुक्तिः फलमखण्डितं॥ अविरोधाद्भवन्त्येव प्रान्ते भुक्तिस्तु भु
क्तयः॥ उपपातकलक्षाणि महापातककोटयः॥ क्षणाद्दहति देवेशि दी
क्षा हि विधिना कृता॥ कल्पे दृष्ट्वा तु मन्त्रं वै यो गृह्णाति नराधमः॥
मन्वन्तरसहस्रेषु निष्कृतिर्नैव जायते॥ नादीक्षितस्य कार्य्यं स्यात्त
पोनियमव्रतैः॥ न तीर्थगमनेनापि न च शारीरयन्त्रणैः॥ मत्स्यसूक्ते
अदीक्षितानां मर्त्यानां दोषं शृणु वरानने॥ अन्नं विष्ठासमं तस्य
जलं मूत्रसमं स्मृतं॥ तत्कृतं तस्य वा श्राद्धं सर्वं यात्यधोगतिं॥ अतः॥
सद्गुरोराहिता दीक्षा सर्वकर्म्माणि साधयेत्॥ शूद्रस्य निषेधमाह
तन्त्रान्तरे॥ प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्वथा॥ आत्ममन्त्रं गुरोर्मन्त्रं मन्त्र
ञ्चाजपसंज्ञकं॥ स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददद्द्विजः॥ शूद्रो निरयमा
प्नोति ब्राह्मणो यात्यधोगतिं॥ श्रुतिरपि॥ सावित्रीं प्रणवं यजुर्लक्ष्मीं॥ स्त्रीशूद्रो

सिता पीता तथा रक्ता कृष्णवर्णसमन्विता॥ स्थिरोदका दृढा स्निग्धा भूमिः सर्वसु
खावहा॥ शीतस्पर्शा ग्रीष्मकाले च वह्निस्पर्शा हिमागमे॥ वर्षासु चोभयस्पर्शा अ
एह भा परिकीर्त्तिता॥ हयशीर्षपञ्चरात्रे॥ ~~ताभ्यां भूमिं परीक्षेत पूर्वोदक्प्लवनां शुभां॥~~
~~अशङ्कुटां तथा छन्नां कृते तोय~~॥ सुरभीनां रतिर्यत्र सवत्सानां वृषैः सह॥ सुन्दरी
णां रतिर्यत्र पुरुषैः सह सत्तम॥ काश्मीरचन्दनामोदा कर्पूरागुरुगन्धिनी॥ क
मलोत्पलगन्धा च जातिचम्पकगन्धिनी॥ पाटलामल्लिकागन्धा नागकेशरगन्धिनी
दधिक्षीराज्यगन्धाढ्या मदिरासवगन्धिनी॥ सुगन्धिव्रीहिगन्धाढ्या शुभगन्धयु
ता च सा॥ सर्वेषामेव वर्णानां भूमिः साधारणी मता॥ इति शुभभूमिकथनम्॥ हय
शीर्षपञ्चरात्रे॥ ताभ्यां भूमिं परीक्षेत पूर्वोदक्प्लवनां शुभां॥ अशङ्कुटां तथा छन्नां
कृते तोयपरिप्लुतां॥ संपूर्य्य मासे खाते तु तथाधिकमदे शुभं॥ कुसुमप्रकरस्त
द्वत्स्यात् लग्नानि मृद्गति॥ न निर्वाति तथा दीपः शीघ्रं पुष्पं न शीर्य्यते॥ श्वेतारुणा
पीतकृष्णा विप्रादीनां विशिष्यते॥ त्याज्या भूमिः क्षारगन्धा पूतिगन्धा च या भवेत्॥
मधुरा च कषाया च अम्ला च कटुका च या॥ कुशैः शरैस्तथा काशैर्दूर्वाभिर्या च सम्मता॥
प्रयोगसारे॥ वितस्तिमात्रविस्तारं निर्म्माय विवरं भुवि॥ निक्षिपेत्तां मृदं तस्मिन् ततासूपि
ष्टा सूक्ष्मशोभनम्॥ समा तु मध्यमं विद्यान्न्यूनास्वधममुच्यते॥ परीक्ष्येवं प्रयत्नेन तत्पश्चा
द्भूमिं कनीयसीं॥ अङ्गारतुषकेशास्थिहीने कृत्वाथ भूतलं॥ खन्यमाने यदा कुण्ड
पाषाणः प्राप्यते भुवि॥ तदापमृत्यवे चास्थिकेशाङ्गारैर्धनक्षयः॥ तस्मिन्नाग्निभयं
प्रोक्तं तुषैः प्रोक्ता दरिद्रता॥ इति दुष्टफलकथनं॥ गोशृङ्गं पीतमण्डूकः शङ्खश्च शक्ति
श्च कच्छपः॥ शम्बूकश्च प्रशस्ताः स्युर्ये चान्ये रत्नजातयः॥ दीक्षामण्डपस्थाने शैल्योद्धारणमा
वश्यकमतस्तदभिधीयते॥ स्वरोदये धन्त ब्रह्मजामले॥ अहिचक्रं प्रवक्ष्यामि यथा सर्व
ज्ञभाषितं॥ द्रव्यं शल्यं तथा शून्यं येन जानन्ति साधकाः॥ निधिर्निवर्त्तने कस्य संभ्रान्तो यत्र भूतले॥

विशेषमाह वाराहीये॥ गोपालस्य मनुर्देयो महेशस्य च पादजे॥ तत्पत्न्या अपि सूर्य्यस्य
गणेशस्य मनुस्तथा॥ एषां दीक्षाधिकारी स्यादन्यथा पापभाग्भवेत्॥ तत्राप्यनुकूलं
मन्त्रं दीक्षयेत्॥ मननात्त्रायते यस्मात्तस्मान्मन्त्रः प्रकीर्त्तितः॥ तथा च॥ सतारराशिको
ष्ठानामनुकूलान् भजेन्मनून्॥ सिद्धसारस्वते॥ तत्र च॥ नृसिंहार्कवराहाणां
प्रसादप्रणवस्य च॥ सपिण्डाक्षरमन्त्राणां सिद्धादीन्नैव शोधयेत्॥ वाराहीतन्त्रे॥
तारा चक्रं राशिचक्रं नामचक्रं तथैव च॥ तन्त्रचेत्तु गुरोर्मन्त्रो नान्यच्चक्रं विचिन्तयेत्
तत्रैव चक्रमिदं स्थाप्यं स्थाप्यं स्थानद्वारमुपास्थितं॥ ऊर्द्ध्वे रेखाष्टकं लेख्यं तिर्य्यक्पञ्चैत
थैव च॥ अहिचक्रं भवत्येवमष्टाविंशतिकोष्ठकं॥ तत्र पौष्णाश्वियाम्यर्क्षं कृत्तिका मघ
भाग्यभं॥ उत्तराफाल्गुणी लेख्यं पूर्वपङ्क्तौ भसप्तकं॥ अहिर्बुध्न्याजपादर्क्षं शतभं च
ब्रह्मसर्पभं॥ पुष्यं हस्तं समालेख्यं द्वितीयां पङ्क्तिमास्थितं॥ अभिजिद्विष्णुवन्नक्षं सौम्यं
रौद्रं पुनर्वसुं॥ चित्रं भं चोत्तरा तृतीयायां पङ्क्तौ धिष्ण्यसप्तकं॥ विश्वर्क्षं तोयभं मूलं ज्ये
ष्ठा मैत्रं विशाखभं॥ स्वाती पङ्क्तौ चतुर्थ्यां तु कृत्वा चक्रं विलोकयेत्॥ एवं संजायते
चक्रं शेषस्थाने पन्नगाकृति॥ द्वारशाखे मघा याम्यो द्वारस्था कृत्तिका मता॥

अश्वीशपूर्वाषाढादित्रिकपञ्चचतुष्टयं॥ पौष्णप्रौष्ठपदाश्वेन्द्वो भानि शेषाणि भास्वतः॥
एतेन॥१।२।३।६॥७।८।९।१०।११।२०।२१।२२।२३।२५॥ इति चन्द्रस्य॥४।५।११।१२।१३।१४
१५।१६।१७।१८।१९।२२।२४।२६॥ इति सूर्यस्य॥ उदयादिगतानाड्यो भग्नाः षष्ट्यात्र
शेषके॥ दिनेन्दुभुक्तयुक्तो सौ भवेत्तत्कालचन्द्रमाः॥ चन्द्रवत्साधयेत्सूर्य्यं मत्क्षस्य चे
ष्टकालिके॥ पश्चाद्विलोकयेत्तौ च स्वस्वक्षेत्रेवान्यतः स्थितौ॥ चन्द्रस्तुङ्गक्षेत्र यदार्केन्दू
नदास्तेनियतं निधिः॥ भानुस्तुङ्गक्षत्रस्थितोनोन्नत्नदा शल्यं विनिर्दिशेत्॥ स्वस्वभोद्वि
तयं ज्ञेयं नास्ति किञ्चिद्विपर्य्यये॥ स्थितं न लभ्यते द्रव्यं चन्द्रे क्रूरग्रहान्विते॥ पुष्टे
चन्द्रे भवत्युच्चः क्षीणचन्द्रे ल्पको निधिः॥ ग्रहदृष्टिवशात्सोपि विज्ञेयो नवधा बु
धैः॥ हेमताम्रञ्च तारारे रत्नं कोश्याय सत्रे गुः॥ नागं चन्द्रे विजानीयाद् भास्करादि
ग्रहेस्थिते॥ मिश्रे मिश्रं भजेद्द्रव्यं शून्ये दृष्टिविवर्जिते॥ सर्वग्रहेक्षिते चन्द्रे वि
ज्ञेयो मो महानिधिः॥ हेमतारञ्च ताम्रारं पाषाणं मन्मयायसं॥ सूर्य्यादिग्रहगे
चन्द्रे द्रव्यभाण्डं प्रजायते॥ शुभक्षेत्रगते चन्द्रे द्रव्यलाभो न संशयः॥
इति तु प्रधानतया बोद्धव्यं॥ तथा च॥ धनिमन्त्रेनग्रहीयात्कुलञ्चतथैव च॥ इत्यादितथा दर्शि
नानं तत्रकमविचारस्यावश्यकत्वात्॥ प्रथमं तन्निरूप्यते॥ स्वप्नलब्धेस्त्रियादत्तेमा
लामन्त्रे च त्र्यक्षरे॥ वैदिकेषु च सर्वेषु सिद्धादीन्नैव शोधयेत्॥ मालामन्त्रस्तु वा
राहीये॥ विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्तिताः॥ नपुंसकस्य मन्त्रस्य
सिद्धादीन्नैव शोधयेत्॥ हंसस्याष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च॥ एकद्वि
त्र्यादिबीजस्य सिद्धादीन्नैव शोधयेत्॥ तथा॥ एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्वति
पापक्षेत्रे न लाभः स्याज्ज्ञातव्यं ज्योतिषां बुधैः॥ भुक्तराश्यंशमानेन भूमानं कार्मिकैः कु
रैः॥ नीचे द्विघ्नं परे नीचे जलस्थो सौ भवेन्निधिः॥ उच्चस्थे ऊर्द्ध्वगे द्रव्येन नो शार्क क्रमे
ण च॥ परमोच्चेपरे तुङ्गे भित्तिस्थं मत्क्षसंक्रमे॥ चन्द्रांशभुक्तमानेन द्रव्यसंख्या वि
धीयते॥ तस्माच्चेज्जायते वृद्धिः षड्वर्गेषु बलक्रमात्॥ अधिष्ठितं भवेद् द्रव्यं यत्र
चन्द्रो ग्रहान्वितः॥ तदधिष्ठायको ज्ञेयो भास्करादि ग्रहे क्रमात्॥ ग्रहोस्युप
ग्रहाश्चैव क्षेत्रपालश्च मातृकाः॥ दीपे शोभी षण्णे रुद्रो यक्षो नागः क्रमा
न्मतः॥ ग्रहहोमश्च कर्त्तव्यो मुखेन नारायणे बलिः॥ क्षेत्रपाले सुरामांसमात्
कारणं महाबलिः॥ दीपे प्रदीपजा पूजा भीषणे भीषणार्चनं॥ रुद्रे रुद्रजपो
जप्यो यक्षे यक्षादिशान्तिकं॥ नागे नागगणः पूज्या गणनाथेन संयुताः॥ ल
क्ष्मीधरादिनत्वानि शर्वकार्य्येषु पूजयेत्॥ एवं कृते विधानेन दुःसाध्यः साध्य
ते निधिः॥ निधिं प्राप्यानरो लोके पूज्यते सर्वदा बुधैः॥ अथ वामहाकपि
लपञ्चरात्रविधानेन शल्योद्धारः कार्य्यः॥ सक्रमो यथा॥ प्रसादारम्भका
ले च ग्रहाम्भे च विशेषतः॥ शल्योद्धारस्तु कर्तव्यो यदीच्छेच्छुभमात्मनः॥
प्रसादारम्भकाले च यदङ्गं स्पृशते पुमान्॥ वास्तुदेहे तदङ्गे तु तत्र शल्यं दद्या
द्विचक्षणः॥ कण्डूयति शिरः पुंसि शिरः शल्यं समुद्धरेत्॥ शल्यं तत्रास्ति वि
ज्ञेयं खन्यमाने करत्रये॥ अग्निमाहश्च रोगश्च धनहानिश्च जायते॥

यत्नेनोत्पाटयेच्छल्यं यदीच्छेच्छुभमात्मनः॥ बाहौ कण्डूयमाने तु निर्दिशेद्दोर्हस्त्यङ्ख
लं॥ हस्तद्वयेन मानं तल्लक्षणं कथितं तव॥ स्वामिनो मरणं विद्याद्विदेशगमनं
तथा॥ यत्नेनोत्पाटयेच्छल्यं यदीच्छेच्छुभमात्मनः॥ उरौ कण्डूयमाने तु कां
स्यशल्यं विनिर्दिशेत्॥ हस्तैकेन च संनिष्ठे लक्षणं कथितं तव॥
वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत्॥ पुंमन्त्रा हुं फडन्ताः स्युर्द्विठान्तास्तु
स्त्रियो मताः॥ नपुंसका नमो न्ताः स्युरित्युक्ता मनवस्त्रिधा॥ एतत्शून्या महा
विद्या महाशब्देन नीयते॥ मालिनीविजये॥ अथ वक्ष्याम्यहं या या महाविद्या महीतले॥
दोषजालैरसंस्पृष्टास्ताः सर्वा हि फलैः सह॥ काली नीला महादुर्गा त्वरिता छिन्नम
स्तिका॥ वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः॥ कामाख्यावासिनी बाला मा
तङ्गी शैलवासिनी॥ इत्याद्याः सकला देव्यः कलौ पूर्णफलप्रदाः॥ सिद्धमन्त्रे
तया नात्र युगसेवापरिश्रमः॥ तथा चैता महाविद्याः कलिदोषान्न बाधिताः॥
असतीच भवेद्भार्य्या यशोहानिः प्रजायते॥ यत्नेनोत्पाटयेच्छल्यं यदीच्छेच्छुभमात्मनः॥
हस्ते कण्डूयमाने तु कङ्कालं च विनिर्दिशेत्॥ त्रिहस्तेन तु संनिष्ठे तत्खन्यमानेन
चान्यथा॥ अग्निमाहश्च रोगश्च पीडा च मरणं भवेत्॥ यत्नेनोत्पाटयेच्छल्यं य
दीच्छेच्छुभमात्मनः॥ पृष्ठे कण्डूयमाने तु बाहुशल्यं विनिर्दिशेत्॥ हस्तैकेन
संनिष्ठे नात्र कार्य्या विचारणा॥ स्वामिनाशो भवेत्तत्र भार्य्या वा जायते सती॥ पादे
कण्डूयमाने तु हस्तशल्यं विनिर्दिशेत्॥ सार्द्धहस्तेन संनिष्ठे लक्षणं गदितं त
व॥ अङ्गनाशो राजदण्डः शस्यहानिश्च जायते॥ कुक्षौ कण्डूयमाने तु पाषाणं
तत्र निर्दिशेत्॥ हस्तद्वितयमानेन लक्षणं गदितं तव॥ भुजङ्गदंशस्तत्र स्यात्त
स्माच्छल्यं समुद्धरेत्॥ जानौ कण्डूयमाने तु भस्म तत्र विनिर्दिशेत्॥ हस्तद्वये
न संनिष्ठे लक्षणं गदितं तव॥ अग्निदाहो मनस्तापः क्लेशदुःखभयादि च॥
करोत्येवं विधं कर्म तस्मात्तं वै समुद्धरेत्॥ ज्योतिषे॥ सुनिश्चितां मन्दिरभूमिमा
दौ निधाय तोयावधि यत्नतस्तां॥ कुर्य्याद्विशल्यामथवान्यमार्गं दृष्ट्वा यथावत्प्रश्नवशाद्वि
धिज्ञः॥ दूर्वाप्रवालाक्षतपुष्पपाणिः शुचिः शुचिं दैवविदं समेत्य॥ पृच्छेद्विनीतो
मधुरस्वरेण शल्यस्य तत्त्वं भवने तदीशः॥ तत्प्रश्नस्यादिमो वर्णः संग्राह्यो यत्नतो
यथा॥ क्रमात्पुष्पफलादेवफलानां ब्राह्मणादितः॥ क्रमादित्यनेन ब्राह्मणः पुष्प
नाम क्षत्रियो नदीनां वैश्यो देवनाम शूद्रः फलनाम कथयेदित्यायातं॥ प्रणवो
धरणी धारिणी करो न तदनन्तरः॥ भूत्यै नमश्च इत्येष मन्त्रो हि प्रियात्मकः॥
मन्त्रेणानेन कठिनीमभिमन्त्र्य विभाजयेत्॥ नवधा सदनक्षेत्रं तया पश्चा
द्विलेखयेत्॥ व क च त ए ह श प य नवेत्॥ प्रश्नाक्षराणि जाय
न्ते प्रागादिकोष्ठनवके वर्णास्ते शल्यमालिख्यान्ति॥ प्रश्ने वकारः पुरतो नरा
स्थि वक्ति शल्यं भ करप्रदायि॥ क्षौणी शब्दं गजरगहे तु मन्त्युप्रदं ककारः

खरशल्यमग्नेः॥२॥ याम्याच्च कारः स्त्रवगाहि वेश्मप्रभोर्द्धि नाशावह माहुश
ल्यं॥३॥ रक्षोदिशि श्वास्थिगृहास्थितानां महद्भयं वक्ति स्तुनिश्चितन्नः॥ए:पाशि
दिश्यहिशिशोर्द्धवीति मृत्युप्रवासामह माहशल्यं॥४॥

तथाच मुण्डमालातन्त्रे॥ कालीतारामहाविद्याषोडशी भुवनेश्वरी॥ भैरवी छि
न्नमस्ता च विद्याधूमावती तथा॥ वगला सिद्धविद्याच मातङ्गी कमलात्मिका॥
एतादशमहाविद्याः सिद्धविद्याः प्रकीर्त्तिताः॥ नात्र सिद्धाद्यपेक्षास्ति नक्ष
त्रादिविचारणा॥ कालादिशोधनं नास्ति नारिमित्रादिदूषणं॥ सिद्धविद्या
तयानात्र युगसेवा परिश्रमः॥ नास्ति किञ्चिन्महादेवि दुःखसाध्यं कदाचन॥
इत्यादिवचनादेषु विचारो नास्ति॥ वस्तुतस्तु इदं प्रशंसापरं॥ सर्वत्र विचारस्यावश्य
कत्वे दूरदृष्टवशात् कदाचिद्वैरिमन्त्रस्य स्वप्नादौ प्राप्यात् दोषस्य दृष्टत्वादिति सा
म्प्रदायिकाः॥

होवायुकोणे नररूपमास्वि दारिद्र्यमिष्टक्षयकृद्विधत्ते॥ धनपदिशि शकारः प्राहवि
प्रास्थि ■ वित्तक्षयकृद्दषपकारो वक्ति च क्षास्थि शम्भो ■ तदिह कुलविनाशं गोधना
नाञ्च हानिं ■ वितरति गृहनाथस्यापि गुप्तस्य देवैः॥ यो मध्यभागे भसितं कपाले
कालायसञ्चाह कुलक्षयाय॥ यत्नादपास्यान्यधुना प्रमाणं सर्वत्र तत्पञ्चकय
यामि प्राल्ये॥ इन्दुरक्षो जलेशाने शल्यं साद्धैकरेफकैः॥ वन्ह्यन्तककुबेरेषु पुरु
षमध्यवातयोः॥ देवीपुराणे॥ पुरुषाधःस्थितं शल्यं न गृहे दोषदं गृहे॥ प्रसा
दे दोषदं शल्यं भवेद्यावज्जलान्तिकं॥ इति शल्योद्धारः॥ पूर्वादिदिङ्निश्चयेन मण्ड
पः कार्य्यः अन्यथा दोषः उक्तो यथा राघवभट्टधृतवचने॥ यदिकुर्य्याद्यथा दृष्टं
विपन्नो निरयं व्रजेत्॥ भानोर्गत्यादिशो ज्ञात्वा कुर्य्यात्कर्म्माणि दैशिकः॥ वास्तवैष
म्यतो यत्र सम्पङ् नज्ञायते किल॥ तत्र शङ्कुं प्रतिष्ठाप्य जानीयाच्छुद्धदिक्स्थितिं॥ अ
ङ्कुप्रमाणन्तु ज्योतिषे॥ अर्कोङ्गुलाप शुच्यग्नाकाष्ठिद्वाङ्गुलम्मूलिका॥ शङ्कुं संज्ञा
भवेत्तस्यास्तच्छायां परिकल्पयेत्॥ तदगत्यादिकपरिज्ञानं शृणु वक्षे यथाविधि॥
स्तसमे भूतले कान्त्वा वृत्तं भ्रमरूपतः॥ तन्मध्यविन्दौ शङ्कुन्तु स्थापयेद्द्वादशा
ङ्गुलं॥ अग्रच्छायान्वयवशाद्वृत्ते पूर्वापरद्वये॥ पूर्वापराङ्कयोः कृत्वा चिन्हेत
मभिन्नतस्तथा॥ सुसमानपरिभ्रान्त्यौ कार्य्ये वृत्तद्वयेपुनः॥ तयोः संश्लेयसंजाते
मध्यदक्षोत्तरे स्थिते॥ सन्धिद्वयेतु प्राकप्रत्यक सूत्रं मध्ये वविन्यसेत्॥ सूत्रद
क्षोत्तरं ज्ञेयामग्नेः प्रागादि कल्पयेत्॥ क्रियासारेपि॥ कृत्वा भूमिं समां तत्र
वृत्तं हस्तमितं समं॥ द्वादशाङ्गुलमानोच्चं शङ्कुं खादिरनिर्म्मितं॥ अलाभे
यज्ञकाष्ठस्य तत्र संस्थापयेत्सुधीः॥ तच्छाया संस्पृशेद्यत्र तन्मध्ये मध्य
मे स्फुटं॥ तिर्य्यक प्रसारयेत्सूत्रं मध्ये याम्योत्तरे स्फुटं॥ कोणाः स्युरन्येच
त्वारश्चातः सूत्रप्रसारणात्॥ एवमाशापरिज्ञानं समाख्यातं यथास्फुटं॥

अथ कुलाकुलचक्रं॥ कुलाकुलस्य भेदं हि वक्ष्यामि मन्त्रिणामिह॥ तथा निबद्धे


वायू	अग्नि	भू	जल	आकाश
अ आ	इ ई	उ ऊ	ऋ ॠ	ऌ ॡ
ए	ऐ	ओ	औ	अं
क	ख	ग	घ	ङ
च	छ	ज	झ	ञ
ट	ठ	ड	ढ	ण
त	थ	द	ध	न
प	फ	व	भ	म
य	र	ल	ब	श
ष	क्ष	ल	स	ह

वाय्वग्निभूजलाकाशाः पञ्चाशल्लिपयः क्र
मात्॥ पञ्चह्रस्वाः पञ्चदीर्घा विन्दन्ताः संधि
सम्भवाः॥ कादयः पञ्चशः यक्षलसहान्ताः
प्रकीर्त्तिताः॥ अ आ ए क च ट त प य ष।
मारुताः॥ इ ई ऐ ख छ ठ थ फ र क्ष
आग्नेयाः॥ उ ऊ ओ ग ज ड द व ल ल
पार्थिवाः॥ ऋ ॠ औ घ झ ढ ध भ ब स
वसावारुणाः॥ ऌ ॡ अं ङ ञ ण न म श ह
शहानाभसाः॥ साधकस्याक्षरं पूर्वं मन्त्रस्या
पि तदक्षरं॥ यद्येकभूतदैवत्यं जानीयात्स्व
कुलं हितं॥ भौमस्य वारुणं मित्रं आग्ने
यस्यापि मारुतं॥ मारुतं पार्थिवानाञ्च आग्नेयञ्चाम्भसां रिपुः॥ पार्थिवानाञ्चेति वकारात्
आग्नेयं पार्थिवानां रिपुः॥ नाभसं सर्वमित्रं स्याद्विहङ्गैनेवशीलयेत्॥ अथाच रुद्र
जामले॥ पार्थिवे वारुणं मैत्रं तैजसं शत्रुरीरितं॥ ऐन्द्रवारुणयोः शत्रुर्म्मारुतः परि
कीर्त्तितः॥ इति राघवभट्टधृतवचनात्॥ जलमारुतयोः शत्रुता॥ इति कुलाकुलचक्रविचारः॥

ज्ञात्वैवं मण्डपादीनि कुर्य्यात्सम्यग्विचारतः॥ महाकपिलपञ्चरात्रे॥ विषुवेनुगते सूर्य्ये शङ्कु
मानेसमाचरेत्॥ खादिरं विन्यसेच्छङ्कुं द्वादशाङ्गुलविस्तृतं॥ इति दिग्ज्ञानं॥ अथ
शङ्कुनिखननप्रकारः॥ निश्चलीकृत्य हस्तं वा गृहीत्वा लोहमुद्गरं॥ अथवाच स
माहन्यात्प्रशस्तं क्रमतो लघु॥ हन्यमाने यदा शङ्कोर्हस्तात्प्रपतति मुद्गरः॥ त
दातोद्यितः शोको जायते दुस्तरो महान्॥ इति शङ्कुनिखननप्रकारः॥ अथ शङ्कु
सूत्रकरणं॥ मौञ्जं कौशेय कार्पासं प्राणिवालजमेव वा॥ चतुर्धरपरीणाहं सूत्रं शङ्कोस्तु
वेष्टयेत्॥ वेष्ट्यमाने यदा सूत्रं शङ्कुं मुञ्चति लक्षणम्॥ सूत्रस्य मरणं विद्यात्तच्छि
न्ने वैश्यविनाशनं॥ तत्रापि नारसिंहेन होमे नाशुभनाशनं॥ शङ्कुं सारभूमेः
प्रोक्तं तस्याग्रं चित्रवृत्तकं॥ सत्यवृत्तादिनौ सोतु स्थापयेत्समभूतले॥ शङ्कुद्विगुण
मानेन तन्मध्ये वृत्तमालिखेत्॥ पूर्वापरान्हयोश्छायायदा तन्मण्डलास्तगा॥ तद्वि
न्दुद्वयगं सूत्रं पूर्वापरदिगिष्यते॥ विन्दुद्वयान्तरभ्रान्त शफरद्वयपुच्छगं॥ दक्षिणो
त्तरगं सूत्रमेवं सूत्रद्वयं न्यसेत्॥ तदग्राण्यपराग्राणि सूत्राग्रे च विनिक्षिपेत्॥
सूत्राणि स्थापयेत्प्राज्ञः प्रागुत्तरमुखानि च॥ हयशीर्षपञ्चरात्रे॥ भूमिं तोयसमां
कृत्वा दर्पणोदरसन्निभां॥ द्वादशाङ्गुलमानेन तत्र वृत्तं भ्रामयेत्॥ मध्ये
तु निश्चले शङ्कुं स्थाप्य छायां निरीक्षयेत्॥ वृत्तरेखाया वाह्यस्या शङ्कुच्छाया
प्रकल्पिता॥ प्रवेशनिर्गमे तस्याः शङ्कुच्छायां निरूपयेत्॥ शङ्कुच्छायाग्रचि
न्हाभ्यां प्राक्प्रतीच्यौ प्रसाधयेत्॥ रात्रौ प्राचीसाधनम्॥ यथा॥

कृत्तिकाश्रवणपुष्याचित्रास्वात्योर्यदन्तरं ॥ एतत्प्राच्यादिशोरूपंयुगमात्रोदितेपुरः ॥
त्रिकाण्डमण्डलेपि ॥ श्रवणस्योदयेप्राची कृत्तिकायास्तथोदये ॥ चित्रास्वात्यन्तरे चन्द्रस्
य्यायोरितिशङ्कुप्रकरणं ॥ अथदीक्षादौमण्डपप्रकरणम् ॥

अथराशिचक्रं ॥ तथाच कल्पद्रुमे ॥ रेखाद्वयंपूर्वपरेणकुर्य्यात्तन्मध्यतोयाम्यकुवेरभेदात् ॥



एकैकमीशाननिशाचरेतुहुताशवाय्वोर्विलि
खेत्ततोग्नीन् ॥ वेदाग्नि वह्नियुगल श्र
वणाक्षि संख्यान् पञ्चेषुवाणाशर
पञ्च चतुष्टयाग्नीन् ॥ मेषादितः
प्रविलिखेत्तु शकलांस्तुवर्णा
न्कन्यागतान्प्रविलिखेद
पशादिवर्णान् ॥ शारदायां ॥
वालंगोरंखुरं शोनंश्यामी
शोभेतिराशिषु ॥ क्रमेण
मेदिनीवर्णाः कन्यायांश
दयःस्मृताः ॥ तेन अआइई
मेषः ॥ उऊऋ वृषः ॥ ॠऌ
ॡ मिथुन ॥ एऐ कर्कटः ॥
ओऔ सिंहः ॥ अंअः शषसहलक्षाः
कन्या ॥ कवर्गस्तुला ॥ चवर्गोवृश्चिकः
टवर्गोधनुः ॥ तवर्गोमकरः ॥ पवर्गः कुम्भः ॥ यवर्गोमीनः ॥ स्वराशीनामनुकूलंमन्त्रं
भजेत् ॥ तथाच ॥ स्वतारराशिकोष्ठानामनुकूलान्भजेन् ॥ मन्त्रानिति नारदवचनात् ॥
राशीनांशुभज्ञातज्ञेयाः त्यजेच्छत्रुमन्त्रितिवर्यं ॥ स्वराशेर्म्मन्त्रराश्यन्तं गणनीयंविचक्षणैः
यदातुस्वराशेरज्ञानं तदा साधकनामाद्यक्षरस्वच्छिन्नं राशिंगृहीत्वा गणयेत
नारायणीये ॥ अज्ञातेराशिनक्षत्रे नामाद्यक्षरदर्शनात् ॥ साध्याक्षरराश्यन्तं
गणयेत्साधकाक्षरादिति रामार्च्चनचन्द्रिकाधृतवाच्च ॥ तन्त्रराजे ॥ तेनमन्त्रा
गणयेद्यदि षष्ठं वाप्यष्टमं द्वादशन्तु वा ॥ रिपुर्म
द्यवर्णेन नाम्नश्चाद्यक्षरेण च ॥ गणयेद्यदि षष्ठं वाप्यष्टमं द्वादशन्तु वा ॥ रिपुर्म
न्त्राद्यवर्णः स्यात्तेनतस्याहितंभवेत् ॥ रामार्च्चनचन्द्रिकायां ॥ एकपञ्चनवबान्ध
वाःस्मृता द्वौ च षष्ठदशमाश्च सेवकाः ॥ वह्निरुद्रमुनयस्तुपोषकाद्वादशाष्ट
चतुरस्तुघातकाः ॥ चतुरस्तुघातकाइतिविष्णुविषयं ॥ रामार्च्चनचन्द्रिकाधृतवाच्च ॥
शाक्तादौषष्ठेवर्जनीयं ॥ षष्ठाष्टमद्वादशानिवर्ज्जनीयानियानत इतिवचनात् ॥
तन्त्रराजस्वरसाच्च ॥ तन्त्रान्तरे ॥ द्वादशराशीनामियं ॥ संज्ञानामानुरूपंफलं ॥ लग्नं
धनंभ्रातृबन्धु पुत्रशत्रुकलत्रकं ॥ मरणंधर्म्मकर्म्मायव्ययोद्वादशराशयः ॥ नामा
नुरूपमेतेषां शुभाशुभफलंलभेत् ॥ वैष्णवेतुबन्धुस्थाने शत्रुःशत्रुस्थाने बन्धु
रितिपाठः ॥ लग्नेसिद्धिस्तथानित्यं धने धनसमृद्धिदं ॥ भ्रातरिभ्रातृवृद्धिंस्याद्वान्धवे

वान्धवप्रियः ॥ पुत्रेपुत्रविवृद्धिःस्याच्छत्रौशत्रुविवर्धनं ॥ कलत्रेमध्यमौप्रोक्तामर
णेमरणंभवेत् ॥ धर्म्मेधर्म्मविवृद्धिंस्यात्सिद्धिदःकर्म्मसंस्थितः ॥ आयेचधनसं
म्पत्तिर्व्ययेच सञ्चितव्ययः ॥ इतिराशिचक्रम् ॥

विश्वसारे ॥ दीक्षार्थंमण्डपंकुर्य्यात्सुन्दरंसुमनोहरं ॥ नानावर्णैश्चित्रपर्णैश्चित्रितंसु
मनोहरं ॥ भित्तिस्तम्भादिसर्व्वेषुस्वर्णरत्नविभूषितं ॥ नानावर्णैश्चित्रपर्णैश्चित्रि
तंमाणिमण्डपं ॥ वितानपत्रशालप्यैरलंकुर्य्याद्विधानतः ॥ पताकाभिर्ध्वजैः कुर्य्याच्च
तुर्दिक्षमनोहरं ॥ अष्टौकुम्भानष्टदिक्षुमण्डपेरचयेत्सुधीः ॥ तन्त्रेतिकर्त्तव्य
ताशारदातिलके ॥ पुण्यहंवाचयित्वातमराजपंरचयेच्छुभं ॥ सारदायांपञ्चभिः
सप्तभिर्हस्तैर्नवभिर्व्वामितान्तरं ॥ षोडशस्तम्भसंयुक्तं चत्वारस्तेषुमध्यगाः ॥ अष्ट
हस्तसमुच्छ्रायः संस्थाप्यद्वादशान्तिताः ॥ पञ्चहस्तप्रमाणस्तेनिश्छिद्राऋजवः
शुभाः ॥ तत्पञ्चमांशंनिखनेन्मेदिन्यांमन्त्रवित्तमः ॥ नारिकेलदलैर्वंशैश्छा
दयेत्तत्समन्ततः ॥ द्वारेषुतोरणान्निसुःक्रमात्क्षीरिमहीरुहां ॥ स्तम्भोच्छ्रायःस्मृत
स्तेषांसप्तहस्तैःपृथक्पृथक् ॥ दशाङ्गुलप्रमाणेनतत्परीणाहईरितः ॥ तिर्य्यक्फल
कमानंस्यात्तत्स्तम्भानामूर्द्धमानतः ॥ मूलानिकल्पयेन्मध्येतोरणेहस्तमानतः ॥ दिक्षु
ध्वजानिबध्नीयाल्लोकपालसमप्रभान् ॥ वितानदर्भमालाद्यैरलंकुर्व्वीतमण्डपं ॥
क्षीरिवृक्षायथाअश्वत्थोडुम्बरप्लक्षवटाः ॥ क्षीरिमहीरुहःन्यग्रोधश्चोत्तरे
मतं ॥ देवालोरणरूपेणसंस्थिताय जमण्डपे ॥ विघ्नविध्वंसनार्थञ्चरक्षार्थंत्व
ध्वरस्य च ॥ इतिमण्डपादिकरणं ॥ दीक्षाशब्दव्युत्पत्तिमाह रुद्रजामले ॥ ददा
तिशिवतादात्म्यंक्षीयतेतिचमलत्रयं ॥ अतोदीक्षेति संप्रोक्तादीक्षातत्त्वार्थवे
दिभिः ॥ लघुकल्पसूत्रेच ॥ दीयतेपरमंज्ञानंक्षीयतेपापपद्धतिः ॥ तेनदीक्षो
च्यतेमन्त्रैःस्वागमार्थवलावलात् ॥ योगिनीतन्त्रे ॥ दीयतेज्ञानमत्यर्थंक्षीयते
पाशबन्धनं ॥ अतोदीक्षेतिदेवेशिकथितातत्त्वचिन्तकैः ॥ मनसाकर्म्मणा
वाचा यत्पापंसमुपार्जितं ॥ तेषांविशेषकरणंपरमज्ञानदायतः ॥ तस्माद्दीक्षे
तिलोकेस्मिन् गीयते शास्त्रकोविदैः ॥ विज्ञानफलदासैवद्वितीयालयकारिणी ॥
तृतीयामुक्तिदाचैवतस्माद्दीक्षेतिधीयते ॥ कुलार्णवे ॥ रसेन्द्रेणयथाविद्धम
यःसुवर्णतांव्रजेत् ॥ दीक्षाविद्धस्तथैवात्माशिवत्वंलभतेप्रिये ॥ दीक्षाग्निद
ग्धकर्म्मासौयायाद्धिच्छिन्नवन्धनः ॥ गतस्तस्यकर्म्मवन्धोनिजीवश्चशिवोभ
वेत् ॥ गतंशूद्रस्यशूद्रत्वंविप्रस्यापिचविप्रता ॥ दीक्षासंस्कारसंभिन्नेजातिभेदो
नविद्यते ॥ शिवलिङ्गेशिलाबुद्धिंकुर्व्वन्पापमाप्नुयात् ॥ दार्व्वश्मलोहमृद्रत्नजा
तिलिङ्गंप्रतिष्ठितं ॥ यथोच्यतेतथाशूद्राःसर्व्ववर्णाश्चदीक्षिताः ॥ येनपूजितमा
त्रेणचाब्रह्मभुवनान्तिकं ॥ पूजितंतेनसर्व्वंस्याद्दीक्षितेननसंशयः ॥ दीक्षित
स्यनकार्य्यंस्यात्तपोभिर्नियमव्रतैः ॥ नतीर्थगमनेनापि नचशारीरयन्त्रणैः ॥

गवां सर्पिः शरीरस्थं न करोत्यात्मपोषणं॥ स्वकर्म्मचरितं दत्तं पुनस्तामेव पोष
येत्॥ एवं सर्व्वशरीरस्थं सर्पिर्यत्परमेश्वरी॥ विना चोपासनाद्देवि न ददाति
फलं नृणां॥ पुरश्चरणरसोल्लासे॥ न च दीक्षापरं ज्ञानं न च दीक्षापरं तपः॥ न
च दीक्षापरं कालं तस्माद्दीक्षा गरीयसी॥ दीक्षायां चञ्चलापाङ्गि न कालनियमः
क्वचित्॥ सद्गुरोर्द्दर्शनादेव सर्व्वपर्व्वं च सर्व्वदा॥ दीक्षामाहूय गुरुणा कृपया यदि दी
यते॥ तत्र लग्नादिकं किञ्चिन्नैव विचार्य्यं कदाचन॥ तन्त्रे दिव्यदीक्षाविषये॥ तथा च॥
दिव्यवीरगुरुं लब्ध्वा दीक्षां कृत्वा विचक्षणः॥ ततः समाहितो भूत्वा पुरश्चर्य्यां करि
ष्यति॥ इत्यादिशास्त्राद्दिव्यगुरोर्न लग्नादिकं विचारणीयं॥ पशुगुरौ तु सर्व्वं विचार्य्यमे
व॥ कुलार्णवे॥ द्विजोऽपि दीक्षितः पश्चादन्त्यजः पूर्व्वदीक्षितः॥ द्विजः कनिष्ठः स ज्ये
ष्ठ इति शास्त्रस्य निर्णयः॥ ज्येष्ठत्वेन च ते पूज्या नावमान्याः कथञ्चन॥ कुलार्णवे॥
दीक्षां विना न मोक्षः स्यात्तारिणीनां शिवशासनात्॥ सा च न स्याद्विनाचार्य्यमित्याचा
र्य्यपरम्परा॥ उपासनाशतेनापि यो विना नैव सिध्यति॥ तां दीक्षामाश्रयेद्यत्नात्
श्रीगुरोर्म्मन्त्रसिद्धये॥ महाकपिलपञ्चरात्रे॥ मन्त्रीयः साधयेदेकं जपहोमार्च्च
दिभिः॥ क्रियाभिर्भूरिभिर्यस्य सिद्ध्यन्त्यन्ये ह्यल्पसाधनात्॥ सम्यक्सिद्धैक
मन्त्रस्य नासाध्यमिह कञ्चन॥ बहुमन्त्रवतः पुंसः का कथा हानिरेव सः॥
राघवभट्टधृते॥ पुस्तके लिखितो मन्त्रो येन सुन्दरि जप्यते॥ न तस्य जायते सिद्धिर्हा
निरेव पदे पदे॥ द्विजानामनुपेतानां षट्कर्म्माध्ययनादिषु॥ यथाधिकारो
नास्तीह स्याच्चोपनयनादनु॥ तथा चादीक्षितानाञ्च मन्त्रदेवार्च्चनादिषु॥
नाधिकारोऽस्त्यतः कुर्य्यादात्मानं शिवसंस्कृतं॥ यदृच्छया श्रुतं मन्त्रं छन्नेनापि छ
लेन वा॥ पत्रेक्षितं वा यथा वा तज्जघन्यमनर्थकं॥ विश्वस्य विधिवद्दीक्षामभि
षेकावसानिकां॥ श्रुत्वा तन्त्रं गुरोर्ल्लब्धं साधयेद्दीक्षितं मनुं॥ गुरुमुखाः क्रि
याः सर्व्वा निष्फलाः स्युर्यतो ध्रुवं॥ जपो होमार्च्चनविधिः कार्य्यो दीक्षान्विते
नरैः॥ दीक्षा त्रिविधा शाक्ती शाम्भवी मान्त्री चेति॥ रुद्रजामले॥ शाक्ती शा
क्तिमवा दीक्षा शक्तिः श्रीपरकुण्डली॥ तस्याः प्राणविलोमेन प्रवेशः परशा
म्भवे॥ चरणद्वयसम्भूता शाम्भवी शीघ्रसिद्धिदा॥ मान्त्री मन्त्रोद्भवा दीक्षा
तद्भक्तिः स्वात्मसम्भवा॥ मन्त्रयन्त्रार्च्चनादुक्तक्रियाभिर्भोगमोक्षदा॥ उक्तञ्च द
त्तात्रेये॥ सुमध्यगो विधिहरीतवपुश्च रक्तौ पादौ रजोमलगुरोः खलु सेव्यमा
नौ॥ स्पृष्ट्वा स्थितौ वितनुते हृदये तनीयः माद्यं भजेरे हरति विश्वमुदग्र मुग्नः
नूर्च्चित वार्च्य चरणौ निरुपाधिबोधं सान्द्रोम्भत्तः शिवपदे सततं नतोऽस्मि॥ रुद्र
जामले॥ त्रिविधा सा भवेद्दीक्षा प्रथमा आणवी परा॥ शाक्ती च शाम्भवी
चान्या साद्या मुक्तिविधायिनी॥ मन्त्रार्च्चनासनन्यासध्यानोपचारकादिभिः॥

दीक्षा सा आणवी प्रोक्ता यथा शास्त्रोक्तरूपिणी॥ सिद्धौ च शक्तिमालोक्य तया केव
लया शिशोः॥ निरुपायं कृता दीक्षा शाक्तेयी परिकीर्त्तिता॥ अविसन्दिं विनाचार्य्य
शिष्ययोरुभयोरपि॥ देशिकानुग्रहेणैव शिष्यता व्याप्तिकारिणी॥ वायवीसंहि
तायां॥ शाम्भवी चैव शाक्ती च मान्त्री चैव शिवागमे॥ दीक्षोपदिश्यते त्रेधा शिवेन
परमात्मना॥ गुरोरालोकमात्रेण स्पर्शात्सम्भाषणादपि॥ सद्यः संज्ञा भवेज्ज
न्तोर्दीक्षा सा शाम्भवी मता॥ शाक्ती ज्ञानवती दीक्षा शिष्यदेहं प्रविश्य तु॥ गुरुणा ज्ञान
मार्गेण क्रियते ज्ञानचक्षुषा॥ मान्त्री क्रियावती दीक्षा कुम्भमण्डलपूर्व्विका॥
सारदायां॥ चतुर्व्विधा सा सन्दिष्टा क्रियावत्यादिभेदतः॥ क्रियावती वर्णमयी
कलात्मा वेधमय्यपि॥ प्रयोगसारे॥ मन्त्रमार्गानुसारेण साक्षात्कृत्वेष्टदेव
तां॥ गुरुः शिष्ये द्वयोर्द्वैधं मन्त्रदीक्षेति सोच्यते॥ रुद्रजामले॥ आणवी च द्विधा
दीक्षा शाम्भवी च तथा पुनः॥ एकैका वापि विहिता द्विःपञ्चते शास्त्रकोविदैः॥
शिवशक्तिसमायोगाज्जन्मान्तरकृतात्शुभात्॥ शिवपूजानुसन्धाना कर्म्म
साम्यं यदा भवेत्॥ शिव एव तदा साक्षाद्दारणाव्या दीक्षया भवेत्॥ विश्वसारे॥

अआ अश्विनी देवः॥ इ भरणी मानुषः॥ ईउऊ कृत्तिका राक्षसः॥ ऋ ॠ ऌ ॡ रोहिणी
मानुषः॥ ए मृगशिरो देवः॥ ऐ आर्द्रा मानुषः॥ ओ औ पुनर्व्वसु देवः॥ क पुष्या
देवः॥ खग अश्लेषा राक्षसः॥ घङ मघा राक्षसः॥ च पूर्व्वफाल्गुणी मानुषः॥
छज उत्तरफाल्गुणी मानुषः॥ झञ हस्ता देवः॥ टठ चित्रा राक्षसः॥ ड स्वाति
देवः॥ ढण विशाखा राक्षसः॥ तथद अनुराधा देवः॥ ध ज्येष्ठा राक्षसः॥
नपफ मूला राक्षसः॥ ब पूर्व्वाषाढा मानुषः॥ भ उत्तराषाढा मानुषः॥ म श्रव
णा देवः॥ यर धनिष्ठा राक्षसः॥ ल शतभिषा राक्षसः॥ व श पूर्व्वभाद्रपदा
मानुषः॥ षसह उत्तरभाद्रपदा मानुषः॥ अं अः ळ क्ष रेवती देवः॥ वक्ष्ये
क्रमे॥ उत्तराद्दक्षिणाग्राश्च रेखाः कुर्य्याच्चतुर्दश॥ दशरेखाः पश्चिमाः स्युः
कर्त्तव्या वीरवन्दिते॥ अश्विन्यादिक्रमेणैव विलिखेत्तारकाः पुनः॥ अका
रादिक्षकारान्तान् द्विचन्द्रवह्निवेदकान्॥ [illegible] भूमी
न्दुनेत्रचन्द्राश्च अश्लेषान्तं खगेऽप्रिये॥ द्विभूनेत्र नेत्रयुग्माश्चेन्दुनेत्रा
ग्नियुग्मकान्॥ मघादिकोऽपि ज्येष्ठान्तं द्वितीयं न वतारकं॥ वह्निभूमी
न्दुचन्द्रांश्च युग्मेन्दुनेत्रनाडिकान्॥ वेदेन भेदितान् वर्णान् रेवत्यन्त
गताः क्रमात्॥ तथा चानिवक्ष्ये॥ पूर्व्वोत्तरत्रयञ्चैव भरण्यार्द्रा च रोहिणी॥
इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः॥ ज्येष्ठा शतभिषा मूला
धनिष्ठाश्लेषकृत्तिकाः॥ चित्रा मघा विशाखाः स्युस्तारा राक्षसदेवताः॥

~~अश्विनी~~ ~~देवः~~	~~भरणी २ मानुषः~~	~~कृत्तिका राक्षसः~~	~~रोहिणी मानुष~~

अश्विनी अ आ देवः	भरणी इ मानुषः	कृत्तिका ई उ ऊ राक्षसः	रोहिणी ऋ ॠ लृ ॡ मानुषः	मृगशिरा ए देवः	आर्द्रा ऐ मानुषः	पुनर्वसु ओ औ देवः	पुष्या क देवः	अश्लेषा ख ग राक्षसः
मघा घ ङ राक्षसः	पूर्वाफल्गुनी च मानुषः	उत्तराफल्गुनी छ ज मानुषः	हस्ता झ ञ देवः	चित्रा ट ठ राक्षसः	स्वाती ड देवः	विशाखा ढ ण राक्षसः	अनुराधा त थ द देवः	ज्येष्ठा ध राक्षसः
मूला न प फ राक्षसः	पूर्वाषाढा ब मानुषः	उत्तराषाढा भ मानुषः	श्रवण म देवः	धनिष्ठा य र राक्षसः	शतभिषा ल राक्षसः	पूर्वभाद्र व श मानुषः	उत्तरभाद्र ष स ह मानुषः	रेवती लक्ष अं अः देवः

अश्विनी रेवती पुष्या स्वाति हस्ता पुनर्वसुः। अनुराधा मृगशिरः श्रवणा देवतारकाः॥

तथा॥ स्वजातौ परमप्रीतिर्मध्यमा भिन्नजातिषु॥ रक्षोमानुषयोर्नाशो वैरं दानवदेवयोः॥ जन्मसम्पद्विपत्क्षेमप्रत्यरिः साधको वधः॥ मित्रं परमामित्रञ्च जन्मादीनि पुनः पुनः॥ जन्मतृतीयपञ्चमसप्तमानि नक्षत्राणि वर्ज्जनीयानि॥ तथान्तरमाष्टनवभद्राणि युगयुग्मगतानि च॥ इतराणि न भद्राणि तत्र जानिमरणं विशेषेण॥ इत्यादि॥ तत्र स्वनक्षत्राद्देवनक्षत्रं गणनीयं॥ स्वनक्षत्रात्तु नेस्वनामाद्यक्षरसम्बन्धिनक्षत्राद्देवनक्षत्रं गणनीयं॥ प्रादक्षिण्येन गणयेत् साधकाद्यक्षरात् सुधीः॥ प्रकारान्तरनिबन्धे॥ प्राप्यालाभान्यष्टु प्राह्यं रुद्रस्याद्रिरुरुःकरं॥ लोकलोपपदुप्रायः खलो योभेषु भेदिताः॥ पक्षैकत्र्यद्विरूपाव निभुजशशीयुग्मेन्दुपक्षाः॥ युग्मैकद्वियुग्मनेत्रेन्दुपक्षाग्निचन्द्रकान्॥ त्रयशाशी भूरेकपक्षेन्दुनेत्राग्निवेदाः॥ वर्णाः क्रमात् स्वराश्यन्त्यौ रेवत्यंशगतावुभौ॥ जन्मनक्षत्रादयं परिगणयेत् जन्मसम्पत् क्रमेण सुधीरिति वचनात्॥ तथा च पिङ्गलायां॥ प्रकटे यस्य नक्षत्रं न स्यज्जन्मर्क्षतो भवेत्॥ अथ अकथह चक्रं॥ चतुरस्रे लिखेद्वर्णान् चतुःकोष्ठसमन्विते॥ चतुःकोष्ठेषोडशकोष्ठरतियावकः॥ विश्वसारे॥ चतुरस्रं लिखेत् कोष्ठं चतुःकोष्ठसमन्वितं॥ पुनः श्चतुष्कं तत्रापि लिखेद्धीमानेकमेण तु॥ ततः षोडशकोष्ठेषु अकारादिवर्णान् प्रादक्षिण्येन लिखेत्॥ तत्क्रमः॥ इन्द्राग्नि रुद्रनवनेत्रयुगर्क्कदिक्षु ऋत्वष्टषोडशचतुर्द्दश भौतिकेषु॥ पातालपञ्चदशवह्निहिमांशुकोष्ठे वर्णान् लिखेल्लिपिभवान् क्रमशस्तु धीमान्॥ नामाद्यक्षरमारभ्य यावन्मन्त्रादिमाक्षरं॥ चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्टयं॥ पुनः कोष्ठगकोष्ठेषु सव्यते नाम्न आदितः॥ सिद्धः साध्यः सुसिद्धोरिः क्रमाज्ज्ञेया विचक्षणैः॥ सव्यतो दक्षिणतः॥ कल्पद्रुमे॥ पूर्वापरायतं रेखापञ्चकं तत्र प्रकल्पयेत्॥ तथैव दक्षिणोदीच्यक्रमेण पञ्चकं॥ यथा षोडशकोष्ठानि सम्पद्यन्ते तथा लिखेत्॥ विश्वसारे॥ दक्षिणावर्त्तयोगेन कोष्ठे वर्णान् लिखेत् सुधीः॥ येनैव लिखनं कुर्य्यात्तेनैव गणनं स्मृतं॥ सिद्धः सिद्ध्यति कालेन साध्य

अ क थ ह	उ ङ प	आ ख द	ऊ च फ
ओ ड व	लृ झ म	औ ढ श	ॡ ञ य
ई घ न	ऋ ज भ	इ ग ध	ॠ छ ब
अः त स	ऐ ठ ल	अं ण ष	ए ट र

[illegible]

सुजपहोमतः॥ सुसिद्धो महएव देव रिपुर्मूलं निकृन्तति॥ तन्त्रान्तरे॥ सिद्धार्णा
वाञ्छ्वाः प्रोक्ताः साध्यास्तु सेवकाः स्मृताः॥ सुसिद्धाः पोषका ज्ञेयाः शत्रुवो
घातकाः स्मृताः॥ जपेन वन्धुः सिद्धः स्यात्सेवको धिकसेवया॥ ==
पुष्णाति पोषकोरिष्टं घातको नाशयेद्ध्रुवं॥ सिद्धः सिद्धो यथोक्तेन द्विगु
णात्सिद्धसाधकः॥ सिद्धः सुसिद्धो र्द्धजपात्सिद्धारिर्हन्ति वान्धवान्॥ साध्यः
सिद्धो द्विगुणकः साध्यः साध्यो निरर्थकः॥ तत्सुसिद्धो द्विगुणजपा
त्साध्यारिर्हन्ति गोत्रजान्॥ सुसिद्धः सिद्धो र्द्धजपात् तत्साध्यो द्विगुणोधि
कात्॥ तत्सुसिद्धो महाहादेव सुसिद्धादिः स्वगोत्रहाः॥ अरि सिद्धः सुतान्
हन्यात् अरिसाध्यस्तु कन्यकाः॥ तत्सुसिद्धस्य पत्नीघ्नस्तदरिर्हन्ति साधकं॥
अथ वैरिमन्त्रपरित्यागप्रमाणमाह तन्त्रे॥ गवांक्षीरे द्रोणमिते जपेन्मन्त्रं
शतात्मकं॥ पीत्वा क्षीरं जपेत्तद्वत्समुच्चार्य्य त्यजेत्तथा॥ अनेनैव विधानेन वैरि
मन्त्राद्विमुच्यते॥ अदिमन्त्रे विदित्वा तु न पुनः प्रजपेच्च तत्॥ संत्यज्य तं देव
तायास्तस्या अन्यं भजेन्मनुं॥ द्रोणपरिमाणं यथा तन्त्रान्तरे॥ पलद्वन्द्वं तु प्र
सृतिः कुडवं तच्चतुष्टयं॥ चतुर्भिः कुडवैः प्रस्थं प्रस्थाश्चत्वार आढकं॥
चतुर्भिराढकै र्द्रोणः कथितो मानवेदिभिः॥ प्रकारान्तरमाह रुद्रयामले॥
वटपत्रे लिखित्वारिमन्त्रं स्रोतसि निक्षिपेत्॥ एवं मन्त्रविमुक्तिः स्या
दित्याह भगवान् शिवः॥ इति अकथचक्रं॥

चतुर्विधा तु सा दीक्षा ब्रह्मणा भाषिता पुरा॥ क्रियावती कलावती वर्ण
बोधमयी पुनः॥ ताः क्रमेण पिकथ्यन्ते सर्व्वसम्पत्प्रदाः शुभाः॥ तद्
क्तं रुद्रयामले॥ सर्व्वासामेव दीक्षाणां मुक्तिः फलमखण्डितं॥ अ
विरोधाद्भवत्येषा प्रासङ्गिक्यस्तु भुक्तयः॥ अथाधिवासः॥ रुद्रयाम
ले॥ गुरुणात्मना शिष्यः सर्व्वं कुर्य्याद्विधानतः॥ गुरुणा कारये
त्किंम्वा शिष्यः सर्व्वं हरेत्सुधीः॥ चन्दनागुरुकर्पूरै र्धूपयेद्यागमण्डपं॥
गृहं प्रविश्य विधिना तत्र विघ्नान्विनाशयेत्॥ कृताञ्जलिपुटो भूत्वा
[illegible]
[illegible]
[illegible]

मन्त्रमेनं समुच्चरेत्॥ ॐ सूर्य्यः सोमो यमः कालो महाभूतानि पञ्च वै॥ ए
ते शुभाशुभस्येह कर्म्मणो नव साक्षिणः॥ घटस्यारोपणं कुर्य्यान्मन्त्रेणानेन
देशिकः॥ घटारोपणमन्त्रोयं सर्व्वतन्त्रेषु सम्मतः॥ ॐ भूरसि भूमिरस्यदि
तिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री पृथिवीं यच्छ पृथिवीं दृंह पृथिवीं मा
हिंसीः॥ भूमिशोधनमित्युक्तं सर्व्वतन्त्रेषु सम्मतं॥ मन्त्रेणानेन देवेशि शुद्ध
धान्ये विनिक्षिपेत्॥ ॐ धान्यमसि धिनुहि देवान् धिनुहि यज्ञं धिनुहि यज्ञप
तिं धिनुहि मां यजन्यं॥ ॐ आ गोमन्त्रोदानामश्वा कामायूं शा दीर्घा मनुप्रमि
तिदशानुमेषां देवो वः सविता हिरण्यपाणिः॥ प्रतिगृह्णात्वच्छिद्रेण शीला
चक्षुषेत्वा महीनांपयोसि॥ हस्तमानं घटं कृत्वा नवरत्नोदरेण च॥ घटं संस्था
पयेत्तत्र मन्त्रेणानेन देशिकः॥ ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः॥
पुनरूर्जा निवर्त्तस्व सा नः सहस्रं धुक्ष्वोरुधारा पयस्वती पुनर्म्मा विशताद्र
यिः॥ मन्त्रेणानेन देवेशि घटं संस्थापयेत्ततः॥ मुक्तामाणिक्यवैदूर्य्यगोमे
दवज्रविद्रुमान्॥ पद्मरागं मरकतं नीलञ्चैव क्रमान्नव॥ नवरत्नानि तत्
त्रैवानिक्षिपेद्धिमवानधि॥ मेरुतन्त्रे॥ पुष्पं नीलञ्च वैदूर्य्यं विद्रुमं मौक्तिकं
तथा॥ ततो मरकतं वज्रं गोमेदं पद्मरागकं॥ प्रोक्तानि नवरत्नानि देशिकेन्द्र
वित्तमैः॥ ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यं॥ भवा वाजस्य संगथे॥
मन्त्रेणानेन देवेशि जलेन द्याद्घटोपरि॥ ॐ धन्वना गा धन्वनाजिं जयेम धन्व
नातीव्राः समदो जयेम॥ धनुः शत्रोरपकामं कृणोति धन्वनाः सर्वाः प्रदिशो
जयेम॥ मन्त्रेणानेन देवेशि शीखां दद्याद्घटोपरि॥ ताम्बूलं श्रीफलं
दद्यात् कदलीनां विशेषतः॥ ॐ श्रीश्च ते लक्ष्मीश्च पत्न्या अहोरात्रे
पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्॥ इष्णन्निषाणामुम्म ईशानः सर्व्वलोकं
म ईशानः॥ मन्त्रेणानेन देवेशि घटे पुष्पं विनिःक्षिपेत्॥ सफलं शालि
चूर्णञ्च सवारञ्च घटोपरि॥ विनिःक्षिप्याथ विधिना क्षीरशाखि समा
न्वितं॥ सुवस्त्राच्छादनं कुर्य्यान्मन्त्रेणानेन साधकः॥ ॐ वस्त्रञ्च पावनं
श्वेतं वरुणेन विनिर्म्मितं॥ मया निवेदितं भक्त्या वस्त्रञ्च प्रतिगृह्यतां॥
कथितो जम्बूचूर्णेन इन्दुवल्लीदलेन च॥ घटं संवेष्टय विधिना सिन्दूरादि
विभूषितं॥ स्थापयेत्तं घटं मन्त्रमुच्चार्य्य यत्नतः सुधीः॥ कथितो जम्बूचूर्णेने
ति प्रदर्शनार्थमुक्तमन्येनापि तद्विशेषो मेरुतन्त्रे तृतीयप्रकाशे॥ पञ्च
शादोषधीक्वाथैः पूरयेत्तदनन्तरं॥ एकोनसंहिता सा अश्ववर्णौषध्यः क्र
मादिमाः॥ चन्दनञ्चापि रक्ताख्यं चन्दनञ्चागुरुस्तथा॥ ==

अथ अकडमचक्रं॥ रेखाद्वयं पूर्वपरेण कुर्यात् मध्यतो याम्यकुबेरभे



दात्॥ महेशरक्षोधिपतिक्रमेण तिर्यक् तथा वायुहुताशनेन॥ अकारादिक्षकारान्तान् क्लीबहीनान् लिखेत्ततः॥ ऋ ॠ वर्णद्वयं लृ ॡ तद्धि क्लीबं प्रचक्षते॥ एकैकक्रमतो लेख्यान् मेषादिषु वृषान्तकान्॥ गणयेत् क्रमशो भद्रे नामादिवर्णपूर्वकान्॥ मेषादितोपि मीनान्तं गणयेत् क्रमशः सुधीः॥ जपुः स्वनामतो मन्त्री यावन्मन्त्रादिमाक्षरं॥ रत्नावल्यां॥ द्वादशाख्ये राशिचक्रे कूटखण्डविवर्जितान्॥ आदिशान्तान् लिखेद्वर्णान् पुरतो यावदीश्वरं॥ सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धादयः पुनः॥ नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके॥ सुसिद्धस्त्रिसप्तमे रुद्रे वेदाष्टद्वादशे रिपुः॥ एतत्तेकथितं देवि अकडमादिकमुत्तमं॥ इदन्तु गोपालविषयकमेव॥ गोपाले कडमः स्मृत इति वचनात्॥ शिवविषयेपि॥ वैष्णवं राशिसंशुद्धं शैवञ्चाकडमं स्मृतं॥ इतिजामलीयात्॥

तथा च वाराहीतन्त्रे॥ ताराशुद्धिर्वैष्णवानां कोष्ठशुद्धिः शिवस्य च॥ राशिशुद्धिस्त्रिपुरे च गोपाले कडमः स्मृतः॥ इति अकडमचक्रं

अथ ऋणीधनीचक्रं॥ तद्यथा॥ कोष्ठान्येकादशान्येव वेदेन पूरिता

द्वी	द्वी	द्वी	०	३	४	४	०	०	०	३
अ आ	इ ई	उ ऊ	ऋ ॠ	लृ ॡ	ए	ऐ	ओ	औ	अं	अः
क	ख	ग	घ	ङ	च	छ	ज	झ	ञ	ट
ठ	ड	ढ	ण	त	थ	द	ध	न	प	फ
ब	भ	म	य	र	ल	व	श	ष	स	ह
२	२	५	०	०	२	१	०	४	४	१

साधकाङ्काः

नि च॥ अकारादि हकारान्तान् लिखेत्कोष्ठेषु तत्त्ववित्॥ प्रथमं पञ्चकोष्ठेषु ह्रस्वदीर्घक्रमेण तु॥ द्वयं द्वयं लिखेत्तत्र विचारेषु साधकः॥ शेषेष्वेकैकशो वर्णान् क्रमशस्तु लिखेत्सुधीः॥ तथा॥ द्वौ द्वौ स्वरौ पञ्चसु कोष्ठकेषु शेषान् स्वरान् षट्क्रमेकं॥ कादीन् हशेषान् विलिखेत्ततो वर्णान् एकैकमेकादशकोष्ठकेषु॥ षट्कालकालवियदग्निसमुद्रवेदखाकाशशून्यदहनाः खलु साध्यवर्णाः॥ युग्मद्विपञ्चवियदम्बरयुक्पा

शाङ्क्योमाब्धिवेदशशीनः खलु साधकार्णाः॥ नामाजेरुला द
कठवाद् गजभुक्तशेषं ज्ञात्वोभयोरधिकशेषमृणं धनं स्यात्॥
अस्यार्थः॥ साध्यवर्णान् स्वरव्यञ्जनभेदेन पृथक् कृत्वा षट्
कालाद्यङ्कैर्गुणितान्॥ कृत्वा तथा साधकनामाक्ष[illegible]॥
रान्॥ स्वरव्यञ्जनरूपेण पृथक् कृत्वा युग्माद्यैरङ्कैर्गुणि
तान् कृत्वा अष्टसंख्याभिर्हृत्वा भयोः साध्यसाधकयो
र्यदधिकं तद्धनं यन्नूनं तदृणं एवं ज्ञात्वा मन्त्रं दद्यात्॥ मन्त्रश्चे
दृणी भवति तदा मन्त्रः शुभदो भवति धनी चेन्न तथा॥ तन्त्रा
न्तरे॥ मन्त्रोयद्यधिकाङ्कः स्यात्तदा मन्त्रं जपेत्सुधीः॥ समेपि च ज
पेन्मन्त्रं न जपेदृणाधिके॥ शून्ये मृत्युं विजानीयात्तस्माच्छू
न्यं परित्यजेत्॥ ऋणाधिके धने॥ तथा॥ इन्द्राक्षि नेत्र रविपञ्च
दशार्तुवेदवन्ह्यायुधाष्ट नवभिर्गुणितांश्च साध्यान्॥ दिग्भूगिरि
श्रुति गजाग्नि मुनीषुवेद षड्वह्निभिस्तु गुणितानथ साधकार्णा
न्॥ षट्कालेत्यादिकं तु विष्णुविषयं रामार्च्चनचन्द्रिकाधृतत्वादिति
केचित्॥ वस्तुतस्तु पूर्व्वस्यैव विवरणमिदं॥ तथा च॥ इन्द्राक्षि नेत्र
इत्याद्यभिधाय॥ नामार्णकोष्टाङ्कमथाभिहन्यादेकादिरुद्राङ्कग
तेक्रमेण॥ इति व्यक्तं रुद्रयामले॥ साध्याङ्कान् साधकाङ्कांश्च
पूरयेद्गृहसंख्यया॥ गुणितेतु हृते षाभिर्यच्छेषं जायते स्फुटं॥
तदङ्कं कथयाम्यत्र एकादशगृहास्थितं॥ इत्युक्तौ षट्कालकाल
इत्युक्तं॥ तन्त्रार्णवे॥ मन्त्रोऋणी शुभफलदो घ्न शुभो धनी च॥
तुल्यं यदा च सफलः

कर्पूरोशीरकुष्ठानि वालकं चापि केशरं॥ कक्कोलकं जातिफलं जटामांसी
मुरा तथा॥ ग्रन्थिकं रोचनां जाती पत्रं पिप्पलबिल्वकौ॥ पृश्निपर्णी चित्रक
श्चैकलरङ्कः कर्त्रिनं तथा॥ कटफलञ्चापि गुञ्जा च दद्रुहं वककाश्मरी॥
पद्मकोषं शङ्खपुष्पी मयूरस्य शिखा तथा॥ प्लक्षोग्निमन्थश्च तथा मुद्ग
पर्णी कुशाः पुनः॥ पाषाणभेदकः कृष्णशङ्खपुष्पी च रोहिणी॥ शो
णाको वृहती चैव पाटली मुखकर्णिका॥ तुलसी पीरवराइन्द्रवल्ली
भृङ्गाभिधा पुनः॥ ततोपराजिता तालमूली वापि कताञ्जली॥
दूर्वा श्रीदेवकन्याख्या भाग्यो रव्याभद्रमुस्तकं॥ लङ्करहिताश्चैताः पञ्चा
शत् संख्यकाः इति॥ यद्यपि प्रथमकाण्डे पञ्चाशादौषधयो निरूपिता
स्तथाप्येकपञ्चाशत्वप्राप्त्यर्थमुक्तस्य दुरूहत्वनिवृत्तये क्रमभेद
ज्ञापनाय च पुनर्द्दर्शिता॥ दुग्धवृक्षत्वचः क्वाथैर्बृह्मवृक्षोद्भवैस्तथा॥
गन्धपङ्कप्रसूनादि नागस्तैर्वा शुभैर्जलैरिति॥ ततो घटं स्थिरी कुर्यात्
यावद्दीक्षाविधिर्भवेत्॥ ॐ स्थिरो भव विडङ्ग आशुर्भव वाज्यर्व्वन्
पृथुर्भव सुषदस्त्वमग्नेपुरीषवाहनः॥ मन्त्रेणानेन देवेशी स्थिरी
करणमुत्तमं॥ ततः कृताञ्जलिर्भूत्वा मन्त्रमेनं पठेत्ततः॥ ॐ
ॐ गुरुभ्यो गणपतिभ्यश्च वो नमो विरूपेभ्यो विश्वरूपेभ्यश्च वो नमः॥
व्रातेभ्यो व्रातपतिभ्यश्च वो नमः॥ नमो गृत्सेभ्यो गृत्सपतिभ्यश्च वो नमः॥
पुण्याहं वाचयेदादौ स्वस्तिवाचनपूर्वकं॥ ॐ स्वस्ति न इन्द्रो वृद्धश्र
वाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः॥
स्वस्ति नो वृहस्पतिर्द्दधातु॥ अस्त्राय फडिति मन्त्रेण भौमान् वि
घ्नान् विदारयेत्॥ दिव्यदृष्ट्या दिव्यविघ्नान् दूरयेच्च चतुर्द्दिशि॥
दिव्यदृष्टिलक्षणं॥ तन्त्रैव॥ अनिमेषाक्षिदृष्टिश्च दिव्यदृष्टिः प्रकीर्तिता॥
माषभक्तेन चान्नेन यावकेन च संयुतं॥ अजाकर्णस्य रक्तेन दुग्धे
न मधुरेण च॥ माषभक्तबलिं दद्याद्भूतप्रेतपिशाचके॥ ॐ भू
ताः प्रेताः पिशाचाश्च पातालभूतलास्थिताः॥ पर्व्वतागे तथा वृक्षे
गृहक्षेत्रादिषु स्थिताः॥ तुष्टा भवन्तु ते सर्वे मम गृह्णन्तु मं बलिं॥
यजेच्च रक्तकुष्टमैरक्ते माहिषशोणितैः॥ मत्स्यमांसादिभिर्भक्ष्ये
दुग्धैश्च विधिनामुना॥ बलिं दद्याद्यतस्तत्रापि तदा मङ्गलमारभेत्॥
दीक्षायां धर्म्मकर्म्मरूपत्वेन तत्र विघ्ननिवारणमुक्तं योगिनीतन्त्रे उत्तर
खण्डे षष्ठपटले॥ तीर्थप्रासादकरणे धर्म्मारम्भे विशेषतः॥ व्रतयज्ञ

समारम्भे विघ्नानि निवसन्ति वै ॥ तानि संपूजयेदादौ वलिभिर्मोदकादि
भिः ॥ अन्यथा जायते विघ्नमिति जानीहि मे प्रिये ॥ अथापराणि विघ्ना
नि शरीरे निवसन्ति वै ॥ मनसा तानि निर्हार

कार्यितो मुनीन्द्रैः । अन्यच्च - कृत्ये तन्त्रुमवाप्नोति धने च विफ
लं भवेत् । ऋणेन प्राप्तिमात्रेण सर्वसिद्धिः प्रजायते । प्रकारा
न्तरं । नामाद्यक्षरमारभ्य यावन्नक्षत्रादिमाक्षरं त्रिधा कृत्वा ।
मुनिभिर्भक्तं तदन्यद्विपरीतकं । अस्यार्थः साधकनामाद्य
क्षरतो गणनया यावन्नक्षत्राद्यक्षरं तत्संख्यां त्रिधा कृत्वा ।
सप्तभिर्हृत्वाऽवधिकं ऋणं शेषं धनं स्यात् । अन्यादिति मं
त्राद्यक्षरमारभ्य यावत्साधकनामाद्यक्षरं भवेत् तावत्सं
ख्यां सप्तगुणं कृत्वा त्रिभिर्हरेत् । अन्यच्च पिंगलामते । साध्य
नाम द्विगुणीतं साधकेन समन्वितं । अष्टाभिस्तु हरेच्छेषं त
दन्यद्विपरीतकं । अस्यार्थः साध्यनाम स्वरव्यंजनभेदेन
द्विगुणीकृत्य साधकनामाक्षरेण स्वरव्यंजनभेदेन संयो
ज्य अष्टाभिर्हृत्वा ऋणं धनं ज्ञेयं । अन्यदिति साधकनामाक्षरा
न् स्वरव्यंजनभेदेन साध्याक्षरेण स्वरव्यंजनभेदेन संयोज्य
अष्टाभिर्हृत्वाऽधिकं ऋणं शेषं धनं ज्ञेयं । नामग्रहणप्रका
रमाह । सनत्कुमारीये । पितृमातृकृतं नाम त्यक्त्वा शर्म्मादिदे
वकान् । श्रीवर्णज्ञनतो हृत्वा वक्त्रे प्रयोजयेत् क्रमात् ।

स्तानि भक्षरणु मम प्रिये । काश्चान्नि वर्ह्निको देवी काश्चित्त्रिवर्तकेस सकृत्संक
धा सप्तिकर्बविदूरं वा पापानुसरणं चैव आलस्येनापि दूष ल मेव वा
णं शोकमोहज्वराव्याधि तारुण्यं धनलालसा कलहं मा
र्घ्यया साधं दुर्भिक्षं गदसंकटं नानाव्रतसमाकीर्णं धार्मि
कोऽस्मीति मानसः प्राप्त शोकसर्वधर्मस्य कारणेहीनपक्षि
के वृक्षपत्रं च वल्कली धात्री वृक्षफलं तथा शालिग्रामशिला
खण्डं प्रतिमां दारुजां तथा मानुषं ब्राह्मणं चैव स्वयंभूवर्तुल मं
शिलां एवं शंबूकभेदं च [illegible] मांसं [illegible] दुष्प्रापा दावार-
मे देवं जीर्णजातं जलं तथा गंगायां दान दीक्षा पंच पर्वदेवेच मृ
त्तिकां इत्येतानि च विघ्नानि न हं यान्ति च पुनः पुनः पूजयित्वा विधानेन

नाम ग्रहणं प्रकार माह पिङ्गलायां। प्रसिद्धं यद्भवेन्नाम
किम्बास्य जन्म नामच। पतीना पुष्य पोजन गुरुणा
यत्कृतं भवेत्। तन्त्रान्तरे। लोक प्रसिद्धमथवा मातापित्रा
तथाकृतं। रुद्रजामले - सुप्तो जागर्ति येनासौ दूरतः
प्रतिभाषते वदन्यन्य मनस्कोपि तन्नाम ग्राह्यमेवच॥
देवता भेदे चक्र विचारस्याप्यथ माह वाराही तन्त्रे नाम
सारोच। तारा शुद्धिर्वैष्णवानां कोष्ठ शुद्धिः शिवस्य च
राशि शुद्धिस्त्रैपुरे च गोपालेह कडमः स्मृतः। अकडमो राम
चंद्रस्य गणेशे हर चक्रकम्। कोष्ठ चक्रं वराहस्य महा-
लक्ष्म्याः कुलाकुलं नामादि चक्रं सर्वेषां भूत चक्रं तथैव च
त्रैपुरे तारके चक्रं शुद्धं मंत्रं जपेत्सुधीः। तथा - वैष्णवं
राशि संशुद्धं शैवं चाप्यकथं स्मृतं कालिकायाश्च तारायाः
स्तारा चक्रं शुभावहं चण्डिकायाः स्तारके दैः गोपालेह कडमं
स्मृतं हर चक्रे सर्व मंत्रे धनाधिको न चाश्रयेत्

द्वारदेशेन साधयेत् कवचेनैव बीजेन सम्प्रकुर्व्या जपेनच
निःसार्य तान् विघ्नान् तान् सर्वान् तदा रक्षां दिशेत्सुनः॥
विश्वसार तन्त्रे। आत्मानं रक्षयेत्तत्र वह्नि प्राचीर योगतः वह्नि बीजं
चतुर्दिक्षु प्राचीरं भावयेद्धिया। तदा तारत्रयं दद्याद्वह्नि बीजेन
दक्षिणः ऊर्ध्वोर्ध्व क्रम योगेन गुरुंश्च प्रणमेत्ततः। ॐ गुरुभ्यो
नमो नित्यं तथाच गुरुपादुकां परं परापरं देवि परात्परमतः परं
क्रमेण प्रणमेद्धीमान् ॐकारादि उदीरितान्। गणेशं द-
क्षिणे नत्वा संमुखे चेष्ट देवतां। गणेशं स्थापयेत्तत्र पूर्वे
केतु घटे सुधीः। आवाहयाम्यहं देवं गणेशं शिव नंदनं।
व्याघ्र चर्माम्बर धरं व्याल यज्ञोपवीतिनं। गणकोट्या परिवृतं
देवं मोदक भोजनं। अविघ्नेशं महाकायं सर्व लोकैक पूजितं।
बालिन सर्व शान्त्यर्थं रौद्र भावाहयाम्यहं पश्येहि भगवद्देव।
सर्वविघ्न विनाशक। इमां पूजां गृहाणत्वं सर्वमे सफलं कुरु।
सिन्दूर पुष्प पुष्पाद्यैः पूजयेच्छिव नंदनं आवाह्यावाहयेद्दे
सर्वत्रायं विधिः स्मृतः। स्वागतमसि ततः प्रश्नं प्रपुनर स्म-
न्वितं आसनेन ततो दत्वा पाद्यार्घ्यं निवेदयेत् ॐ पाद्यं सुवा-
सितं देव सर्व भक्त सुखावहं हरपात्रा क्षम हरं पाद्यं तत्प्रति गृह्यतां

अरणाधिको शुभं विपाद्ध नाधिको च नोविधिः दोषान्
संशोध्य गणितापन्नस्य दोषो द्भवस्य च अरणी मंत्रः शुभ
फला धनी मंत्रोऽशुभ प्रदः तुल्यं यदा शुभ फलं कथितं
मुनि सत्तमैः॥ अन्यत्रापि - अन्ये मृत्युमवाप्नोति धनेच
विफलं भवेत् अरणेच प्राप्तिमात्रेण सर्व सिद्धिस्तु जायते
इति अरणी धनी चक्रं

पाद्यं नमः पाद युगे स्वाहार्घ्यं शिरसि स्थितं मधुपर्कं
स्वधान्ते तु पुनराचमनीयकं स्नानीयंच तथा कुर्यात्
पुनर्गन्धादिकं ततः वस्त्रं यज्ञोपवीतंच नमोन्ते परि कल्पयेत्
सुत्तं भद्रं स्वधान्तेतु धूपं दीपं विधानतः क्रमेण निःक्षिपेत्तत्र
देवाय विधिर्निर्मिता अर्घ्य पात्रे प्रदायार्घ्यं ततः शृणु वरानने
अर्घ्योदकं भवेच्चाखं श्यामाक यव दूर्वके नाना गन्ध समायुक्तं
कुशाग्रश्च तिल सर्षपं विष्णुक्रान्तंच यवकं स्वड् र्घ्यं प्रकीर्तितः
ॐ कारादौ चैवहि मंत्रेण अर्घ्यं दद्याच्च साधकः॥ पाद्य मंत्रेण
कुर्वीत तथाचाचमनीयकं। ॐ नमः स्वाहा समायुक्तं ब्रह्मत्व
फल हेतवे मयानिवेदितं भक्त्या मधुपर्कं गृहाण मे। मूलमंत्रेण
सर्वत्र ॐकारादि नमोन्विते। दध्नाच मधुसर्पिभ्यां मधुपर्कः
प्रकीर्तितः। यज्ञोपवीत मंत्रेण दद्याद् यज्ञोपवीतकं। यज्ञोपवीत
मंत्रस्तु। ॐ यज्ञोपवीतं परमं पवित्रं बृहस्पतेर्यत्सहजं
पुरस्तात् आयुष्य मग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बल
मस्तु तेजः। ॐ नानारत्नैश्च घटितं विश्वकर्मादि निर्मितं
सर्वाङ्ग शोभाभरणं गृहाण फल हेतवे। ॐ वनस्पति
रसोत्पन्नो गन्धाढ्यो गंध उत्तम आघ्रेयः सर्वदेवानां
धूपोयं प्रतिगृह्यतां। ॐ सुप्रकाशो महादीपः सर्वतस्तिमिरापहः।
सबाह्याभ्यंतरे ज्योतिर्दीपोयं प्रतिगृह्यतां। प्रदीपावलिभिः
कुर्यात् निकटे धूप दीपके। प्रक्षालनाय हस्तस्य पश्चा-
त्पात्रं क्षिपेत्सुधीः शान्त कुम्भ प्रपूर्णेन मंडपं रचयेत्सुधीः
गणेशं पूजयित्वाच अर्कं विष्णुं शिवं शिवां पूजयेद्विधिना
तत्र घटे सर्व समृद्धये कूर्चं मुष्टिं क्षिपेद्यो षडङ्ग मंत्रेण तु
साधकः तिलान् कुशान् सर्षपांश्च कूर्चं मुष्टिः प्रकीर्तिता

अथ दीक्षा प्रकरणं— गुरुर्दीक्षा पूर्वदिने स्वशिष्य
मभिमंत्रयेत् दर्भ शय्यां परिष्कृत्य । शिष्यं तत्र निवेशयेत्
स्वाप मंत्रेण मंत्रज्ञः शिष्यो शीघ्रं प्रबन्धयेत् तन्मंत्रं
स्वाप समये पठे द्वारत्रयं शिरः श्रीगुरोः पादुकां ध्यात्वा
उपवासी जितेन्द्रियः नारोदिलिखयं मूल पाराधेदिट ईशिन ॥
स्वपमानस्य मंत्रोयं शम्भुना परिकीर्तितः मंत्रांतरं - नमोजय
त्रिनेत्राय पिङ्गलाय महात्मने रामाय विश्वरूपाय स्वप्नाधिपतये
नमः । स्वप्ने कथय मे तथ्यं सर्व कार्येष्वशेषतः । क्रियासिद्धिं
विधास्यामि त्वत्प्रसादान्महेश्वर । इति मंत्रेण सन्निध्याय
देवं प्रार्थ्य स्वपेच्च वा । स्वप्ने शुभाशुभं दृष्टं पश्चेद्गुरोः
शिष्युं गुरुः कन्या छत्रं रथं दीपं प्रासादं कमलं नदीं ।

विकिरान प्रक्षिपेत्तत्र सप्त सप्त शराहुता । विकिरा दीक्षायां
वक्ष्यंते । प्रणवानुना वस्त्रमंत्रेण । ततो गुरुः स वेधांत्र
गत्वा स्वस्यासने विशेत् । मेरुतंत्रे ॥ संचिंत्य मंत्रेण
मूर्तिमेवं तस्मिन् गुरुक्रमैः । तस्यां मूर्तौ समभ्यार्च्य
पूजयेद्दिव्य देवतां । स्मृत्वा मूल मंत्रं मंत्री सम्यङ् नाडी
मुखाश्रयः । निर्गमय्य च चैतन्यं नासिकाग्र विनिर्गतं
अञ्जलौ मातृका पद्मे महः पुष्पान्विते गुरुः मस्तकं
समुत्थाप्य तस्यामावाहयेत्ततः । स स्थापनं सन्निधानं
सन्निरोधं तत्सकरेत् । सम्मुखी करणं चापि सकलीकरणं
ततः । ततो वगुण्ठनं कार्यं मत्स्येन करणं ततः । परमी
करणं कुर्यात् क्रमशः स्वस्वमुद्रया क्रमादिद्युर्दास्ये तेन
उपचारान्प्रकल्पयेत् आसनादि समस्तानां उपचारान् प्रक-
ल्प्य च । ततो मंत्र विधानेषु ज्ञेयान् वरणान्यपि पुनः
पूर्वादि काष्ठासु क्रमादिन्द्रादिकान् यजेत् लोक
पालान् मंडलेषु कुंभोपरि च गेत्रबा ऐरावतं पुण्डरीकं
वामनं कुमुदं जनो पुष्पदंतं सार्वभौमं सुप्रतीकं तदुक्तः
संघाते लोकपालानां न दक्षिणं प्रपूजनं । इन्द्रादि प्रपूज-
नात्पूर्वं ब्राह्म्यादि पूजनमपि विश्वसारे । अष्ट दिक्षु चाष्ट
कुम्भाव कार्य तेषु प्रकारितारं ब्राह्म्यादि मातृका पूज्याः

कुंजरं वृषभं मांसं समुद्रं कपिलं द्रुमं । पर्वतं तुरगं मेध्य
माम मांसं सुरासवं स । एवमादीनि सर्वाणि दृष्ट्वा सिद्धि
मवाप्नुयात् । इति मंत्र सिद्धि साधनार्थं शिष्याभिमंत्रणम् ।
अथ दीक्षा कालः । मंत्रारंभस्तु चैत्रे स्यात् समस्त पुरुषा-
र्थदः । वैशाखे रत्न लाभः स्याज्ज्येष्ठे च मरणं भवेत् आषाढे
बंधुनाशः स्यात् पूर्णायुः श्रावणे भवेत् प्रजानाशो भवे-
द्भाद्रे आश्विने रत्न संचयः कार्तिके मंत्रसिद्धिः स्यान्मार्ग
शीर्षे तथा भवेत् पौषेतु शत्रुपीडा स्यान्माघे मेधावि-
वर्धनम् फाल्गुने सर्वे कामास्युर्मलमासं विवर्जयेत्

सर्वतंत्र समान्विताः ज्ञात्वा ज्ञान विधानेन गंध पुष्पाक्ष
वारिभिः दण्डं कमण्डलुं करं अक्षसूत्राभयं तथा बि-
भ्रती कनक च्छायां ब्राह्मी कृष्णाजिनोज्ज्वला १ । शूलं कपालं
परशुं चरणं पोत्रं मनोहरं वहंती हेम संकाशा ध्येया
माहेश्वरी शुभा २ अंकुशं दण्डखट्वांङ्गं पाशं च दधती
करैः ध्येया बंधूक संकाशा कौमारी शर्मदायिनी ३ चक्रं
घण्टां गदां खड्गं बिभ्रती सुमनोहरा तमालश्यामला
ध्येया वैष्णवी शर्मदायिनी ४ मुशलं करवालं च खेटकं
दधती हलं करैश्चतुर्भिर्वाराही ध्येया कालघनच्छविः ५
अंकुशं तोमरं विद्युत्कुलिशं बिभ्रति करैः ७ मुण्डस्रङ् म-
ण्डिता ध्येया चामुण्डा रक्तविग्रहा ८ अक्षस्रजं बीजपूरं
कपालं पंकजं करैः वहंती हेम संकाशा महालक्ष्मी
हरिप्रिया ८ ॥ मेरुतन्त्रे । विधाय पूजामेवं हि धूप
दीप निवेदनैः कृते निवेद्ये च ततो मण्डलं परितः
क्रमात प्रवालांकुर पत्राणि स्थापनीयानि मंत्रिणा
वेदिकायाः दक्षभागे कृत्वा स्थण्डिलं उत्तमं संस्थाप्य
वह्निं संस्कृत्य वैश्वदेवं समारभेत् यथाविधिस्तु ना
स्तत्र गन्धाद्यै देवतां यजेत् ततः प्रणव पूर्वाभिर्हु
त्वा व्याहृतिभिः पुरा उद्वास्य मूलमंत्रेण पायसेन घृतेन
च पञ्चविंशतिभिः पश्चाद्धुत्वा व्याहृतिभिः पुरा

ऐन्द्री नीलनिभेन्द्राणी ध्येया सर्वसमृद्धिदा ६
शूलं कपालं नारीशः कपालं दधती करैः

चैत्रे तु गोपाल विषयं गोत्रमुक्तत्वात् । मधुमासे भवेद्दीक्षा दुःखाय
मरणाय च । इति वचनान्तरान्यत्र । तथा ज्येष्ठे मृत्युप्रदा विद्या
आषाढ़े सुख संपदः । इति योगिनी हृदयादाषाढ़े श्रीविद्यायां न दोषः ॥
अत्र च मासः सौर एव सौरे मासि शुभा दीक्षा न चान्द्रे न च ना-
क्षत्रके । इति गौतमीयात् ॥ वैशंपायन संहितायां ॥ मंत्रस्यारंभनं
मेषे धन धान्य प्रदं भवेत् वृषे मरणमाप्नोति मिथुनेऽपत्य
नाशनं कर्कटे मंत्र सिद्धिः स्यात्सिंहे मेधाविवर्धनम् कन्या
लक्ष्मी प्रदा नित्यं तुलायां सर्व सिद्धयः वृश्चिके स्वर्ण लाभः
स्याद्धनुर्मान विनाशनम् मकरः पुण्यदः प्रोक्तः कुम्भो धन
समृद्धिदः मीना दुःख प्रदो नित्य मेवं मास विधि क्रमः ॥
अथ वार नियमः ॥ रविवारे भवेद्वित्तं सोमे शान्तिर्भवेत्
किल आयुरङ्गारके हन्ति तत्र दीक्षां विवर्जयेत् बुधे सौन्दर्य
माप्नोति ज्ञानं स्याद् बृहस्पतौ भृगौ सौभाग्य माप्नोति यशो
हानि शनैश्चरे ॥

संपूज्य तां चन्दनाद्यैः पीठ मूर्तौ नियोजयेत् अर्घ्यं वि-
सृज्य विधि विशेषेन पायसेन बलिं हरेत् पार्श्वदेभ्यश्चंद-
नादि पुष्पाक्षत समन्वितां तत उत्थाप्य नैवेद्यं तत्स्थलं
शोधयेत् सुधीः पुनर्बीजे चोपचारैः पञ्चभिर्दर्शयेत्ततः
दर्पनं व्यजनं छत्रं चामरं मुखवासकं सकलं च जपे-
न्मंत्री मूलमंत्रं समाहितः । विश्वसारे । जपं समर्प्य
विधिना तदा कुर्वीत मङ्गलम् द्विजस्त्रीणां ब्राह्मणा-
नामाशीर्वादं प्रगृह्य च जय शब्दैर्ब्रह्म शब्दैर्ब्राह्मणा-
न् परितोष्य च बंधु वर्गं प्रतोष्याथ अधिवासं ततो
दिशेत् मंत्रेणानेन द्रव्येण क्रमेण देशिकोत्तम अ-
धिवासं प्रकुर्वीत शिष्यस्य सावधानतः ओंकारं पूर्व-
मुच्चार्य नमोऽन्तेन समर्पयेत् ॐ भूरसीति च मंत्रेण
मृत्तिकां प्रक्षिपेत्ततः ॐ गन्धद्वारां दुराधर्षां नित्य पुष्टां
करीषिणीं ईश्वरीं सर्व भूतानां त्वामिहोपह्वये श्रियम्
गंधं दद्याद्विधिना मंत्रेणानेन साधकः ॐ प्रपर्व-
तस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयाना
आववृत्रन्नुदगा गदं ता । अहिं बुध्न्यमनु रीयमाणा विस्मे

अथ तिथि निर्णयः आगम कल्पद्रुमे । प्रतिपदि कृता दीक्षा
ज्ञान नाश करी मता द्वितीयायां भवेज्ज्ञानं तृतीयायां शुचिर्भ-
वेत् चतुर्थ्यां वित्त नाशः स्यात्पञ्चम्यां बुद्धि वर्धनं षष्ठ्यां
ज्ञान क्षयं सौख्यं च लभते सप्तमी दिने अष्टम्यां बुद्धि नाशः
स्यान्नवम्यां वपुः क्षयः दशम्यां राज सौभाग्य मेकादश्यां
शुचिर्भवेत् द्वादश्यां सर्व सिद्धिः स्यात्त्रयोदश्यां दरिद्रता
तिर्यग्योनिश्चतुर्दश्यां हानिर्मासावसानके पक्षान्ते
धर्म वृद्धिः स्यादनध्यायं विवर्जयेत् ॥ अनध्याय माह ।
सन्ध्या गर्जित निर्घोष भूकंपोल्का निपातने पतान-
न्यांश्च दिवसान् ऋतुसंधिं परिवर्जयेत् द्वितीया
पञ्चमी चैव षष्ठी चैव विशेषतः द्वादश्यामपि
कर्तव्यं त्रयोदश्यामथापि वा । इति यत् षष्ठी त्रयोदशी
विधानं तद्विष्णु विषयं राघवार्चन चंद्रिका धृतत्वात्
पञ्चमी सप्तमी षष्ठी द्वितीया पूर्णिमा तथा त्रयोदशी
तु दशमी प्रशस्ता सर्व कामदा । इति सनत्कुमारीय व-
चनात् षष्ठी विधानमपि शिव विषये दशमी सप्तम्यो-
र्निषेध माह । शुक्ल पक्षस्य दशमी सप्तमी च विशेषतः नि-
न्द्या सदैव षष्ठी स्यादिति शैवागमान्तरे ॥

विक्रमस्य मासि विष्णोर्विक्रान्त मासि वै भवेत्वा । मंत्रेणा-
नेन विधिना शीलां दद्याद्विचक्षणः ॥ धान्य मंत्रेण
धान्यस्य दानं मंत्रेषु सम्मतम् ओंकाण्डात् काण्डात्
प्ररोहन्ती परुषः परुष परि एवा नो दूर्वे प्रतनु सहस्रेण
शतेन च मंत्रेणानेन देवेशि दूर्वां दद्याद्विधानतः । ॐ श्री-
श्चनेति च मंत्रेण पुष्पं दद्याद्विधानतः ॐ या फलिनीति
च मंत्रेण फलं दद्याद्विचक्षणः ॐ दधिक्राव्णो अकारिषं
जिष्णोरश्वस्य वाजिनः सुरभि नो मुखा करत् प्रण आयूं-
षि तारिषत् । मंत्रेणानेन तं दत्वा अधिवासं समादिशेत्
ॐ घृतवती भुवनानामभिश्रियोर्वी पृथ्वी मधु दुघे सुपेशसा
द्यावा पृथ्वी वरुणस्य धर्मणा वि-भीते अजरे भूरि
रेतसा । मंत्रेणानेन देवेशि दद्याच्छिष्यस्य मस्तके ।

अथ नक्षत्रनिर्णयः। आश्विन्यां सुखमाप्नोति भरण्यां
मरणं ध्रुवं कृत्तिकायां भवेद्दुःखी रोहिण्यां चाकालिर्म
वेत् मृगशीर्षे सुखवानि [redacted] आर्द्रायां बन्धुनाशनं पुन-
र्वसौ धनाढ्यः स्यात्पुष्ये शत्रुविनाशनं अश्लेषायां भवेन्मृ-
त्युर्मघायां दुःखमोचनम् सौन्दर्यं पूर्वफल्गुन्यां प्राप्नोति च
नरोऽसयः ज्ञानं चोत्तरफल्गुन्यां हस्तायाञ्च धनी भवेत्। चि-
त्रायां ज्ञानसिद्धिस्यात्स्वात्यां शत्रुविनाशनं। विशाखायां सुखं
चानुराधायां बन्धुवर्द्धनम् ज्येष्ठायां सुतहानिःस्यान्मूला-
यां कीर्त्तिवर्द्धनम् पूर्वाषाढोत्तराषाढे भवेत्तां कीर्त्तिदायिके
श्रवणायां भवेद्दुःखी धनिष्ठायां दरिद्रता बुद्धिः शतभिषा
यां स्यात्पूर्वभाद्रे सुखी भवेत् सौख्यं चोत्तरभाद्रे च रेवत्यां
कीर्त्तिवर्द्धनम्। आर्द्राकृत्तिकयोर्नैव शस्तु शिववल्लीतरे वि-
षये तथा च- आर्द्रायां कृत्तिकायाञ्च मंत्रारंभः प्रशस्यते।
यदि शास्य कृशानोर्वा मंत्रारम्भः यथाक्रमं। तन्त्रान्तरे
अश्विनी भरणी स्वाति विशाखा हस्त मेषु च ज्येष्ठोत्तरा
त्रये ष्वेवं कुर्यान्मंत्राभिषेचनं इति ज्येष्ठा भरण्योर्विधानं
तत्र रामविषय मगस्य संहितोक्तवात्

ॐ स्वस्तिन इति मंत्रेण स्वस्तिकं विनिवेदयेत् ॐ सिन्धोरिव
प्राध्वने शुघनासो वातप्रमियः पतयन्ति यह्वा घृतस्य
धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः
इति मंत्रेण सिन्दूरं दद्याच्च शिष्यस्य मस्तके। ॐ पुरय
स्त्वं शङ्ख पुण्यानां मङ्गलानाञ्च मङ्गलम् विष्णुना विधृतो
नित्यं मम शांति प्रदो भव इति शङ्खदर्शन मंत्रोऽयं सर्वतन्त्रस्य
सम्मतः ॐ समित्स्योऽज्जन कृणवन्मतीनां घृतमग्ने मधु
मत्पिन्वमानः। वाजी वहन् वाजिनं जातवेदो देवाना
मुद्रित्रियमासवस्थं मन्त्रेणानेन देवेशि कज्जलं विनि
मज्जयेत् ॐ युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः रो
चन्ते रोचना दिवि रोचनां परितो दद्यात् मंत्रेणानेन
सुन्दरि ॐ अन्नपतेऽन्नस्य नो धेह्यनमीवस्य
शुष्मिणः प्रप्रदातारं तारिष ऊर्ज्जं नो धेहि द्विपदेन
चतुष्पदे ॐ विश्व कर्मणे स्वाहा। मंत्रेणानेन देवे
शि स्पर्शनं परिकीर्तितं ॐ हिरण्यगर्भः समवर्त्तताग्रे

अथ योगनिर्णयः विश्वतारे - शुभः किन्तु तथायुष्मान् ध्रुव
योगस्ततः परं प्रीति सौभाग्य योगश्च वृद्धियोगस्ततः परं हर्षण
श्च ततः योगः सर्वे तेच शुभावहाः। रत्नावल्यां योगास्तु
प्रीतिरायुष्मान् सौभाग्यः शोभनो धृतिः वृद्धि ध्रुवः सुकर्मा च
साध्यः शुक्लश्च हर्षणः वरीयांश्च शिवः सिद्धो ब्रह्म इन्द्रश्च
षोड़श ॥ अथ करण निर्णयः - बव बालव कौलव तैतिल
वणिज नन्दन करणानि शुभान्येव सर्वे तन्त्रेषु भा-
षितम्॥ अथ लग्न निर्णयः वृषे सिंहे च कन्यायां धनुर्मीन
स्य लग्नके चन्द्रतारानुकूले च कुर्याद्दीक्षां प्रवर्त्तनम् - तथा -
स्थिरे लग्ने विष्णुमंत्रे शिव मंत्रे चरं शुभं द्विस्वभावगतं
लग्नं शाक्तेमंत्रे प्रशस्यते। अगस्त्य संहितायां। त्रिषडाय
गताः पापाः शुभाः केन्द्र त्रिकोणगाः दीक्षायां तु शुभाः सर्वे
वक्रस्ताः सर्वनाशकाः

भूतस्य जातः पतिरेक आसीत् स दाधार पृथिवीं द्यामुतेमां
कस्मै देवाय हविषा विधेम। मंत्रेणानेन देवेशि कांचनं
परितो न्यसेत्। ॐ रूपेण वैरूप मभ्यागां तथामाविश्ववेद
विभजन्तु सुतमस्य यथा वेद शुक्रं याज्ञेण पश्यव्यन्तरीदं
यत्र स्तुख इध्ये मंत्रेणानेन देवेशि रूप्यं दद्याद्विधानतः
ॐ असौ यस्ताम्रो अरुण उत बभ्रुः सुमङ्गलः ये चेनं रुद्रा
अभितो दिक्षु श्रिताः सहस्रशोऽवैषां हेड ईमहे। मंत्रेणा
नेन देवेशि ताम्रं दद्याद्विधानतः। ॐ रक्षोहणो वलगहनः
पो ह्यपामि वैष्णवानं रक्षोहनो वलगहनो वलयामि वैष्णवान्
रक्षोहनो वलगहनो वस्तरणामि वैष्णवान् रक्षोहनो वलगहन
उपधामि वैष्णवी रक्षोहनो वलगहनः पर्युहामि वैष्णवी
वैष्णवमसि वैष्णवास्थ ॥ मंत्रेणानेन ~~देवेशि~~ सिद्धार्थं
दत्वा बालस्य मूर्द्धनि। ॐ आकृष्णेन रजसा वर्त्तमाना
निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो
याति भुवनानि पश्यन्। मंत्रेणानेन देवेशि दर्पणं प्रति-
पादयेत्॥ ॐ मन्त्रोऽसि ज्जुषतां माज्यस्य बृहस्पति यत

अथ पक्षनिर्णयः शुक्लपक्षे शुभा दीक्षा कृष्णेऽप्या पंचमादिनात् ।
आगस्त्य संहितायां शुक्लपक्षेतु कृष्णे वा दीक्षा सर्वत्र शोभना ।
कालोत्तरेतु भुक्तिकामैः सिते मुक्तिकामैः कृष्णपक्षे इति शेषः
तिथिष्वपि माषेषु विशेषो मुनिभेदितः । रत्नावल्यां
षष्ठी भाद्रपदे ईशे तथा कृष्णा चतुर्दशी कार्तिके नवमी
शुक्ला तथा मार्गे तृतीयकः पौषेच नवमी शुक्ला माघे
शुक्ला चतुर्थिका फाल्गुणे नवमी शुक्ला चैत्रे कामचतु-
र्दशी । त्रयोदशीति केचित् । वैशाखे चातृया चैव ज्येष्ठे
दशहरा तिथिः आषाढे पंचमी शुक्ला श्रावणे कृष्ण पंचमी
एतानि देव पर्वाणि तीर्थकोटि फलं लभेत् । अत्र दीक्षा
प्रकर्तव्या न मासंच परीक्षयेत् न वारं नच नक्षत्रं न
तिथ्यादिक दूषणम् न योग करणं चैव शंकरेण च भा
षितम् । अन्यच्च मतं चैत्रे त्रयोदशी शुक्ला वैशाखे एकादशी
सिता ज्येष्ठे चतुर्दशी कृष्णा आषाढे नाग पंचमी ।

मिमं तनोतु अरिष्टं यज्ञं समिमं दधातु विश्वे देवाः सइह
मादयंतामो प्रतिष्ठ मंत्रेणानेन देवेभ्यो दीपं दद्यात् द्विधा
ततः ॐ वृत्तिपद असि वृत्तिपदे त्वा अन्नपद असि अन्नपदे
त्वा संपद असि संपदे त्वा तेजोसि तेजसे त्वा ॐ प्रशान्तमात्र
तरिति भूतपात्रे शिरसार्थं समस्तं सर्वं देवी चरणयुगलं
वंदनीयं । शारदातिलके, प्रक्षिप्य क्षालिते पात्रे नवताम्र
मयादिके तंडुलान् प्रावृत्ति संयतान् मूल मंत्राभिमंत्रितान्
प्रस्थितिनांच दशाभि द्विष्टा पात्रे मनु जपेत् प्रक्षाल्य पात्र
वदनं विधाय कवचानतः प्राङ्मुखो मूल मंत्रेण देशि
केंद्रस्त्वरं पचेत् हृदयेनाज्येन संसिक्त तच्चा अष्टाभि धारणं
मूलेन वध्वा तत्पात्रं कवचेनावतारयेत् । अस्त्रजपेन्
गास्त्रीर्णे मंडले विधिवत्गुरुः तंचिमज्य द्विधा भागे

श्रावणे एकादशी भाद्रे रोहिण्या सहिताष्टमी आश्विने च महानव्या
महाष्टम्याः प्रभावतः कार्तिके नवमी शुक्ला मार्गशीर्षे तथा
सिता षष्ठी चतुर्दशी पौषे माघे ऽप्येकादशी सिता फाल्गुणे च
सिता षष्ठी चैत्रे कालविनिर्णयः । योगिनी तंत्रे । अयने विषुवे
चैव ग्रहणे चंद्रसूर्ययोः रविसंक्रान्तिदिवसे युगाद्यायां स्वरेष्वपि
मन्वंतरासु सर्वासु महापूजा दिनेषु च चतुर्थी पंचमी चैव
चतुर्दश्यष्टमी तथा तिथयः शुभदाः प्रोक्ता दीक्षा ग्रहण
कर्मणि इत्यादि वचनात् चतुर्दश्यष्टमी तिथि विषये ।

मेकं देवाय कल्पयेत् अन्यद्भागंच जुहुयात् अपरं देशिकः स्वयं
शिष्येन सार्धं भुंजीत विहिताचमनं ततः आचान्तं शिष्य
मादाय सकलीकृत्य देशिकः तालप्रमाणं हृत्ताम्रं क्षीरि
वृक्षादि सम्भवम् दन्तकाष्ठं ततो दद्यात् ध्यात्वा तिष्य-
तात्मने दन्तान् विशोध्य स पुनस्तं प्रक्षाल्य विसर्जीते
यथाविधि समाचान्तं शिखावंध्याभिरक्षितं विधाय सार्ध
ममुना वेद्यां दर्भास्तरे गुरुः शायीत तस्यां तां रात्रि
मधिवासः समीरितः विशेषस्तु मेरु तंत्रे द्रष्टव्यः ॥

अथाङ्कुरारोपण प्रयोगः

तत्र दीक्षादिवसात् प्राक् नवमे सप्तमे पञ्चमे शुभे वासरे
वाक्षि मण्डपान्तरे पञ्च हस्ताभिताली पञ्च हस्तानि पूर्व
पश्चिम क्रमेण पातयित्वा दक्षिणोत्तर क्रमेण द्वादश
अङ्गुलान्तरितान्येकादश सूत्राणि पातयेत् तेन चत्वारिंशत्
कोष्ठा भवन्ति तेषां वहिर्लेखकोष्ठ वीथी मार्जयेत् मार्जि
त प्रकार स्त्र प्रथमं पूर्वस्यां चतुःकोष्ठात्मिका मेकां वी-
थीं ततो दक्षिणस्यां मध्य कोष्ठात्मिका मपरां पश्चि-
मस्यां चतुःकोष्ठात्मिका मन्या उत्तरस्यां मध्य कोष्ठात्मि
कामितरांच मार्जयेत् ततोऽन्तश्चतुष्कस्य पूर्व
पश्चिम पार्श्वयोर्द्वे वीथ्यौ द्विकोष्ठात्मिके पुनर्मार्जयेत्

चतुर्थीति गलेषु विषयं तत्तत् कल्पोक्तवारतिथिते स्वीमा
सेषु दीक्षोक्ता ग्रहणे शुभा सूर्यस्य ग्रहणकालस्य समो नो
नास्ति भूतले विशेषतो महादेव्याः दीक्षाग्रहणकर्मणि
तत्र यद्यत्कृतं सर्वं अनंतफलदं भवेत् न वार तिथि मा
सादि शोधनं सूर्यपर्वणि एवं चंद्रग्रहणेऽपि तथा
च रुद्रजामले न कुर्यात् शाक्तिकी दीक्षा उपरागे
विभावसौ न कुर्यात् वैष्णवी तां तु यदि चंद्रमसो
ग्रहः एतच्च गोपाल श्रीविद्येतर विषयं अन्येषु पर्व
योगेषु ग्रहणे चंद्रसूर्ययोः इति गौतमीयात् प्र
शस्ता सकला दीक्षा स्वस्ववारे तदा भवेत् सूर्यग्र
हणकालेन नान्यदन्वेषितं भवेत् इतियोगिनीहृदयात्

तेन मंडले चतुष्कोष्ठात्मकं कोष्ठत्रयं भवति ततः
चतुष्कोष्ठत्रयस्यापि द्वादशपदानि प्रत्येकं चतुष्कोष्ठं
श्वेतादिभि रजोभी रंजयेत् तत्र वायुपदे श्वेतमाग्नेये
पीतं नैऋते अरुणमीशाने कृष्णः ततः श्यामलेन मार्जि
तवीथी रापूरयेत् तेषु पदेषु पालिका पंचमुखी सरावा
णां प्रक्षालितं त्रिगुणसूत्रवेष्टितं शुष्कगोमयचूर्ण
वालुकामृद्भिः रक्तोत्तर परिपूरितं हरिद्राद्युक्त
रूपं कृष्णवर्णं व्रणादिरहितं पश्चादिक्रमेण वह्निकोण
मारभ्येशानकोणपर्यंतं प्रत्येकं चतुष्कोष्ठेषु स्थापयेत्
ततः पश्चिमदिशि पालिकाचतुष्के विष्णुं मध्ये पालि
काचतुष्के ब्रह्माणं पूर्वस्यां सरावचतुष्के रुद्रं ध्यात्वा
वाह्य पूजयेत् ततो वामीति मंत्रेण विष्णु विषये ॐ न
मो भगवते वासुदेवायेति मंत्रेण दुग्धेनाभ्यसाच बीजानि
प्रक्षाल्य बीजोपरि दातव्यं मंत्रमष्टोत्तरशतं जपेत् ततः

नारदीये तु विशेषो यथा दीक्षाकालं प्रवक्ष्यामि तीरतंत्रानु
सारतः कृष्णपक्षस्य चाष्टम्यां शुभे लग्ने शुभे क्षणे रवौ
भाद्रपदायुक्ते मित्र तारादि संयुते अथवाप्यनुराधायां रेवत्यां
वा प्रशस्यते ज्ञानीया छोभनं कालं मंत्रस्य ग्रहणं प्रति
उषे चैव विशाखेण कार्त्तिके च विशेषतः । सूर्यग्रहणे
विशेषमाह रत्नावलीधृतयामले । श्रीपरापानि बीजानि
लोपादेर्गर्भयोमनुः सूर्यस्य ग्रहणे — को त्वकां मुक्ति
फलप्रदः अमावास्या सोमवारे भौमवारे चतुर्दशी सप्तमी
रविवारे च सूर्यपर्व शतैः समाः । कुलार्णवे — सप्तमी रवि
वारे च सोमे दर्श स्तथैव च चतुर्थी कुजवारे च अष्टमी च
बृहस्पतौ देवपर्व समा ज्ञेया तासु दीक्षां समाचरेत् - यम
ले। पुण्यतीर्थे कुरुक्षेत्रे देवीपीठ चतुष्टये प्रयागे श्रीगिरौ

वंकौ स्कंदंति ष्पावे वायुं कुलखे वह्निमा च कांग्नि सर्वं तं मुदेवा सोमं
तिले वैवस्वतं शालौ प्रजापतिं सर्षपे पूर्वतनं स्यामाके सूर्यं माषे च
वरुणं तं ब्रह्मवा जागलीमि स्थापयित्वा ततः सोमं पूजयित्वा ... ॐ
... ॐ ... पंचकाय सर्वोपराय ... सर्वलोक
प्रधानाय सर्वात्मने नमो नमः इति मंत्रेण तेषु पात्रेषु बी
जानि निर्वपेत् ततो हरिद्राचूर्णमिश्रितजलेन गंधमिश्रित
जलेन च तानि सिंचयेत् उक्तप्रकारजलसेचनं होमपूजनं चाधि
वासदिनपर्यंतं प्रत्यहं कुर्यात् ततो नूतन वस्त्रत्रयेन तानि पात्रा
णि आच्छाद्य प्रत्येकरात्रिषु देवताभ्यो बलिं दद्यात् तत्र प्रथमरात्रौ
ॐ भूतेभ्यो नमः इति मंत्रेण गंधपुष्पे दत्वा लाजातिलदधिशर्करामिश्र
बलिं दद्यात् ततः स्थापनमार्जनादि कुर्यात् द्वितीयरात्रौ तु पितृभ्यो
नमः इति मंत्रेण गंधपुष्पे दत्वा सतिलान्नतंडुलौ बलिं दद्यात् तृती
यरात्रौ ॐ यक्षेभ्यो नमः इति गंधपुष्पे दत्वा दधिशर्करालाजैर्बलिं
दद्यात् चतुर्थरात्रौ ॐ नागेभ्यो नमः इति गंधपुष्पे दत्वा नारिके
लोदकशर्करापिष्टकैर्बलिं दद्यात् पंचमरात्रौ ॐ ब्रह्मणे नमः इति
गंधपुष्पे दत्वा सपंकजान्नतंडुलेन बलिं दद्यात् षष्ठरात्रौ शि

कार्यं कालाकालं न शोधयेत् ॥ विष्णुयामले ॥ देवीबोधं समारभ्य
यावत्स्यान्नवमीतिथिः । कृत्वा तावत् बुधै र्दीक्षा सर्वाभीष्टफलप्रदा ।
शुक्लपक्षे विशेषेण तत्र पञ्चतिथिरष्टमी तत्रापि शारदी दुर्गा यत्र
देवीगृहे गृहे तत्र दीक्षा प्रकर्तव्या मासर्क्षादीन्न शोधयेत् । तथा ॥
बोधने चैव दुर्गाया कालाकालं न शोधयेत् शुरो कारव्याष्टमी
यत्र रामाज्ञानवमी तथा लग्ने वा यच्च वा लग्ने यत्र तत्रति पाव
पीगुरोराज्ञानुरूपेण दीक्षा कार्या विशेषतः चतुर्थ्यांगारवारे च ।

बाया नम इति गंधपुष्पं दत्वा सप्तपान्नं बलिं दद्यात् सप्तमरात्रौ ॐ
विघ्नवे नमः इति गंधपुष्पं दत्वा शुद्धोदकेन बलिं दद्यात् ततः पायसा
दिना लोकपालेभ्यो बलिदानं तत्रोऽशान्त पूर्वयोर्मध्ये ब्रह्मणे नैऋ
त वरुणयोर्मध्ये अनंताय बलिं दद्यात् प्ररूढानंकुरानन्योजनप
येत् । अष्टमे षं कुरेषु शांत्यादिकं कुर्यात् इति अंकुरारोपणं

अधिवासप्रयोगः

तत्रादौ गुरुर्गृहं प्रविश्य चंदनागुरुधूपाद्यैर्गृहं सुवासितं कृत्वा
विघ्नानां विनाशाय ॐ सूर्य्यसोम इत्यादि पठित्वा घटस्थापनं कु
र्यात् ततः क्रमस्तु ॐ भूरसीति भूमिशोधनं १ ॐ धान्यम
सि इति मंत्रेण तत्र शुक्लधान्यनिःक्षेपः २ ॐ आग्राए इति मंत्रेण प्र
मालस्य घटस्योदरे नवरत्नदानं ३ ॐ आजिघ्र इत्यादि मंत्रेण
तत्र तस्य स्थापनं ४ ॐ आप्यायस्व इति मंत्रेण घटोपरि जलदानं
५ ॐ धन्वनेति तदुपरि शाखादानं ६ तदुपरि ताम्बूलस्य श्री
फलस्य च दानं कदलीफलस्य वा ७ ॐ श्रीश्च तेति तदुपरि पुष्प
दानं ८ ततः सफलशालिपूर्णपात्रस्य घटोपरि नि
विधानं ९ ॐ वसु च इति गौरी रागविशाखा सहित वस्त्रार्पणं
१० ॐ रूपं चापरादौ षाधि सूजनेन घटमूरणं ११ इंद्र वल्याघट वे
ष्टनं १२ घटे सिंदूरदानं १३ ॐ स्थिरो भवेति दीक्षापर्यंतं घट
स्थापरीकरणं १४ एवं घटं संस्थाप्य ॐ गुरुभ्यो नम इत्यादि

दिवसे त्रिदिनस्पर्शे तत्र लग्नादिकं किञ्चिन्न विचार्यं
कथंचन । समयातंत्रे - युगाद्यायां जन्मदिने विवाहे दि
वसे तथा विषुवायनयोर्द्वंद्वे नैव किंचिद्विचारयेत् । तथा
शिष्यानाहूय गुरुणा कृपया यदि दीयते तदा लग्नादिकं
किञ्चिन्न विचार्यं कदाचन सर्वे वारा ग्रहाः सर्वे नक्षत्राणि च
राशयः यस्मिन्नहनि मंत्रदो गुरुः सर्वे शुभावहाः - योगिनी
तन्त्रे - ग्रहणे च महातीर्थे नास्ति कालस्य निर्णयः ॥

पठित्वा ॐ यजमानस्य पुण्याहमित्यादिना पुण्याहं वाच
यित्वा ॐ स्वस्ति न इति स्वस्तिवाचनं कृत्वा ॐ अपस्याय
फडिति भौमान् विघ्नान् निमेषादिदृष्टिरूपदिव्या दृष्ट्या
चतुर्दिशि दिव्यान् विघ्नानपसार्य ॐ भूता ऐज्ञा इति
मंत्रेण माषभक्तेनान्नेन पायसेन जाकरीरन्नेन दुग्धेन
मधुर द्रव्येण बलिं दत्वा रक्तपुष्पेण तान् पूजयेत् ततो
हुमिति सप्त कृत्वो जप्तेन विकरेण सर्वान् निःसार्य रक्षिते
जलधारया चतुर्दिक्षु वह्निप्रकारं कल्पयेत् ततो वामिते
ऊर्ध्वादि क्रमेण तालत्रयं दत्वा ॐ गुरुभ्यो नमः । एवं गुरु
पादुकाभ्यः परमगुरुभ्यः परापरगुरुभ्यश्च ऊर्ध्वादि क्रमेण
वामे नत्वा दक्षिणे ॐ गणेशाय नमः मध्ये इष्टदेवो
नमः इति प्रणमेत् ॐ आवाहयाम्यहमित्यादिना गणेशं
ध्यात्वा पञ्चोपचार इत्यादिना घटे आवाह्य सिंदूररक्तकुसुमा
दिना तं पूजयेत् ततस्तु स्वागतं प्रश्नोत्तरान् तोरं आसन
दानं ॐ पाद्यमिति पादयोर्नमः इति पाद्यदानं शंखोद
क श्यामाकदूर्वा कुश तिल सर्षपा पराजितायव रूप षडङ्गा
र्घं गन्धपुष्पं शंखे निधाय ॐ कारणादिति स्वाहेति
शिरस्यर्घदानम् आचमनीयस्वाहेति मंत्रेण आचमनीय
दानं ॐ नम इति दधिमधुघृत रूप मधुपर्कस्य स्वधेति
दानं मूलमंत्रेण स्वधेति पुनराचमनीयदानं मूलमंत्रेण
नम इति स्नानीयदानं ॐ यज्ञोपवीतमिति यज्ञोपवीतदानं

अथ वक्ष्यामि दीक्षायाः स्थानं तंत्रानुसारतः गोशालायां गुरोर्गेहे देवा
गारे च कानने पुण्यक्षेत्रे तथोद्याने नदीतीरे च मंत्रवित् धात्रीबिल्वसमी
पे च पर्वताग्रे गुहासु च गंगायां तु तटे वापि कोटिकोटिगुणं भवेत् ति
थिशुद्ध्यानमाह गयायां भास्करक्षेत्रे विरजे चंद्रपर्वते चट्टले च मतंगे च
तथा कन्याश्रमे तु च नैव शुद्धीयात् ततो दीक्षां तीर्थेष्वेतेषु पार्वती वाराही
तंत्रे सूर्यो लोपदिवा वृद्धो गुरवादित्यो भवेद्यदि मेषवृश्चिकसिंहेषु
तदा दोषान विद्यते महाविद्यासु सर्वासु कालादिविचारो नास्ति तदुक्तं
मुंडमालातंत्रे कालादिशोधनं नास्ति न चामित्रादिदूषणं ०

ॐ नानारत्नैर्भूषितेभ्य आभरणदानं मूलेन नम इति गंधदानं मूलेन वौषडिति
पुष्पदानं वनस्पतीति धूपदानं ॐ हं प्रकाश इति दीपदानं मूलेन दीपा
वलोपि ने नम इति नीराजनं मूलेन निवेदयामीति नैवेद्यदानं ततः प्राग्
क्तेन नमो गुरुभ्यो इति वदनं इति गणेशं संपूज्य एवं क्रमेण [illegible]
दुर्गाघटे पूजयेत् ततः ॐ फट् इति मंत्रेण तिलकुशासर्षपरूपकार्थं [illegible]
प्रक्षिपेत् ततः ॐ अस्त्राय फडिति समंत्रकृत्वा संजप्य लाज चंदन श्वेत सर्ष
पमन्न दूर्वा मूल विघ्नविनाशकं विकिर प्रक्षेपं कुर्यात् ततो गुरुर्वेदि
कोपरि स्वीयासने उपविश्य मूलेन सत्रिंकल्पयित्वा वा ह्यनुज्ञां वा व
त्वादि मुद्रां प्रदर्श्य सनातनं पुष्पांते नेष्टदेवतां संपूजयेत्
ततो ऽगावर्णादि संपूजयेत्

अथ मालाप्रकरणं नित्यातंत्रे नवमपटले ॥ ईश्वर उवाच अथ दे
मालां समाश्रित्य मातृकावर्णरूपिणी अथ तु रुद्राक्षमयी भोग
मोक्षप्रदायिनी राजवश्यकरी सर्वसिद्धिदा नात्र संशयः यथा मुक्ता
फलमयी तथा स्फाटिकनिर्मिता रुद्राक्षमाला गीर्दिजे मोक्षदा
च समृद्धिदा प्रवालघटिता माला वश्यदा कर्मसाधिनी
माणिक्यरचिता माला साम्राज्यफलदायिनी पुत्रजीवकमाला
तु विद्यालक्ष्मीप्रकाशिनी पद्मबीजाक्षमाला तु महालक्ष्मीप्रदा
यिनी रक्तचंदनबीजाक्षमाला वश्यफलप्रदा मुंडमालातंत्रे द्वितीयपट
ले च स्फाटिकैर्मौक्तिकैर्माला [illegible] स्यात् रुद्राक्षैर्वै पुत्रजीवपुत्रैर्पि धनदा

 56

अथ मालानिर्णयः सनत्कुमारसंहितायां — तर्जनीमध्यमानामा कनि
ष्ठा चेति ताः क्रमात् तिस्रोंगुल्यस्त्रिपर्वाणो मध्यमा चैकपर्विका प
र्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत् तत्क्रममाह सनत्कुमारसं
हितायां — अनामामध्यमारभ्य कनिष्ठादित एव च तर्जनीमूलप
र्यंतं दशपर्वसु संजपेत् तथा — अनामामूलमारभ्य कनिष्ठा
दित एव च तर्जनीमध्यपर्यंतमष्टपर्वसु संजपेत् एतद्वचनं तु श्यो
त्तरशतादिविषयं शक्तिविषये तु नः अनामिकात्रयं पर्व कनिष्ठायाः
त्रिपर्विका मध्यमायाश्च त्रितयं तर्जनीमूलपर्वणि तर्जन्याग्रेत
था मध्ये यो जपेत्स तु पापकृत इति नारदवचनात् तथा हंसपर
मेश्वरे — पर्वद्वयमनामायाः परिवर्तेन वै क्रमात् पर्वत्रयं मध्य
मायास्तु तर्जन्येकं समाहरेत् पर्वद्वयं च तर्जन्या मेरुं तद्विद्धि पार्वती
शक्तिमालाहस्मारव्याता सर्वतंत्रेषु दीपिका अथानामामूला
मारभ्य प्रादक्षिण्यक्रमेण च मध्यमामूलपर्यंतमष्टपर्वसु
संजपेत् इदमष्टोत्तरशतादिविषयं श्रीविद्याविषये तु नः
अनामामध्यमायाश्च मूलाग्रं च द्वयं द्वयं कनिष्ठायाश्च त
र्जन्याश्च त्रयं पहरेश्वरि अनामामध्यमायाश्च मेरुत्वाद्दि
तयं स्मृतं प्रादक्षिण्यक्रमाद्देवि जपेत्त्रिपुरसुंदरी इति यामल

[illegible] स्फटिकमाला तु महासंपत्प्रदा श्रिये
याचारे भोगमोक्षदा [illegible] धूमावतीविधौ तथा मणि
प्रमशानधुस्तूरे मौला एका
रत्नप्रवालैश्च हेमराजतसंभवा मालाकार्या कुशाग्रंथ्या सर्वमो
तंत्रे द्वितीयपटले ॥ पूर्वमनाया
गफलप्रदा समयाचारतंत्रे जप्यायेनाक्षरमते फलं
दिसर्वेषां मालां मरुपयाक्रमं जप्यायेनाक्षरमते फले
देवेभ्यश्च दुर्लभं अक्षमाला प्रथमतो मातृकाक्षररूपिणी
अथ रुद्राक्षमयी माला रतिमोक्षफलप्रदा सर्वसिद्धिकरी माला
अथ रुद्राक्षमयी माला सर्वकार्यफलप्र
सर्वराजवशंकरी प्रवालमाला वश्यपर्यंतं सर्वकार्यफलप्र
दा माणिक्यरचिता माला साम्राज्यफलदायिनी पुत्र
जीविकमाला च लक्ष्मीविद्याप्रदायिनी पद्माक्षरचिता मा।
लाथ स्फाटिकी सर्वकामदा
लाय शोलक्ष्मीप्रदा सदा सुवर्णरचिता माला

वचनात् । कनिष्ठामूलमारभ्य प्रादक्षिण्य क्रमेण च तर्जनी
मूल पर्यन्त मध्यपर्वसु संजपेत् इदमप्यष्टोत्तर शत विषयम् ।
मुण्डमालातन्त्रे - अनामिका त्रयं पर्व कनिष्ठादि क्रमेण तु
तर्जनीमूलपर्यन्तं करमाला प्रकीर्त्तिता अंगुलीर्न वियुं-
जीत किंचिदाकुञ्चिते तले अंगुलीनां वियोगाच्च छिद्रेच
स्रवते जपः । अन्यत्रापि अंगुल्यग्रेषु यज्जप्तं यज्जप्तं मेरु
लंघने पर्वसंधिषु यज्जप्तं तत्सर्वं निष्फलं भवेत् गणना
विधिमुल्लंघ्य यो जपेत्तज्जपं यतः गृह्णन्ति राक्षसास्तेन
गणयेत्सर्वथा बुधः । विश्वसारे जपसंख्यानु कर्त्तव्या
नासंख्यातं जपेत्सुधीः न संख्या कारकस्यास्य सर्वं
भवति निष्फलं । तन्त्रे - हृदये हस्तमारोप्य तिर्य्यक्
कृत्वा करांगुलीः आच्छाद्य वाससा हस्तौ दक्षिणेन
जपेत्सदा नाक्षतैर्हस्त पर्वैर्वा न धान्यैर्न च पुष्पकैः
न चंदनैर्मृत्तिकया जपसंख्यां तु कारयेत् जपेन
याद्रृशी माला संख्याने ऽपि च ताद्रृशी ।

रक्तचंदनमाला च भोगदा मोक्षदा भवेत् रुद्राक्षरचिता
माला सर्वकाम फलप्रदा सर्वमालां प्रपूज्याथ चन्दनेन
विलेपितां समाश्रित्य जपेन्नित्यं यथोक्तफलमाप्नुयात् ।
पद्ममाला प्रसु सुमने पंचाम्नायेषु पूजिता । मुण्डमाला
तन्त्रे - देव्युवाच अक्षमाला तु कथिता फलतो प्रका
शिता । अक्षमालेति किं नाम फलं वा किं वदस्व मे ॥
ईश्वर उवाच ॥ अक्षमाला तु देवेशि काम्य भेदादनेक
धा भवति प्रसु तत्प्रान्ते विस्तारादुच्यते मया अनु
लोमविलोमेन क्लृप्तया वर्णमालया आदि लान्त लादि
अन्तं क्रमेण परमेश्वरि क्षकारं मेरुरूपं च लंघयेन्न
कदाचन । मेरु लंघन दोषस्तु तत्रैव । मेरुहीना च

अपि वर्णमाला । सनत्कुमारीये - क्रमोत्क्रमगतैर्माला
मातृकार्णैः क्षमेरुकैः सविंदुकैः साष्टवर्गैरन्तर्यजनकर्म
णि । आदि कु चु टु तु पु यु शावोष्टौ प्रकीर्त्तिताः । तत्रायमर्थः
अकारादि वर्णान् प्रत्येकं सविंदुं कृत्वा शतं संजप्य अका-
रादीनां वर्णानां कवर्गादीनां चान्त्य वर्णं सानुस्वारं कृत्वा
पूर्वमुच्चार्य जपः कर्त्तव्यः अनेन प्रकारेणाष्टोत्तर शत
संख्य जपो भवति । अन्तर्यजन इत्युपलक्षणं । तथा च सबिंदुं
वर्णमुच्चार्य पश्चान्मंत्रं जपेद्बुधः अकारादि क्षकारान्तां बिंदु
युक्तं विभाव्य च वर्णमाला समाख्याता अनुलोम विलोमिका
इति नारद वचनात् । प्रकारान्तरं विश्वसारे - अनुलोम
विलोमेन वर्गाष्टक विभेदतः मन्त्रेणान्तरितान् व-
र्णान् वर्णेनान्तरितान्मनून् कुर्याद्वर्णमयीं मालां
सर्वतंत्रप्रकाशिनी परमार्णं मेरुरूपं लंघनं नैव
कारयेत् तथा मालिनी विजये स्तत्रा निर्णयमः अत्र
विद्रुम भाषमातृका भुजगीं सुप्तोरग वर्णोज्वलां

या माला मेरु जंघ्या च या भवेत् अप्युक्ता प्रतिकारा च सा
माला निष्फला भवेत् चित्रिणी विषतन्त्वाभा ब्रह्मना-
ड़ीगतान्तरा तया संग्रथिता माला सर्वकाम फलप्रदा
अष्टोत्तर शतं जप्त्वा आदि क्लीवं समाचरेत् ऋ ॠ लृ ॡ
एवं यत्तु चत्वारि क्लीवं प्रचक्षते वर्णानामष्टधिकोवि
काम्यभेदक्रमेण तु अकचटतपयशा अष्ट वर्णाः प्रकीर्त्ति-
ताः ॥ मालया जप विशेषेण फल विशेषस्तु विन्यासतन्त्रे ॥
अक्षमालां प्रपूज्याथ चन्दनेन विलोचने समाश्रित्य
जपेदि दान्त लक्ष्म्याप्त मनन्यधीः योषित् सकला
वश्याः सप्तदीपस्य पार्वति ततो द्विनील द्वयं च पत्र
जपेत्सुधीरवं दिने या नाल नलमार्गे द्रव्यन्या

अत्रोऽह प्रतिरोहितः शतमयी वर्णाख्य काष्ठोत्तरं अ
त्रवैशंपायनसंहितायां प्रलयानलतः सर्वरुद्ररूपेण मन्त्रितो उ
द्धृतं पृथिवी बीजं नोंतेन तं नियोजयेत् प्रलयोद्धृतं वी
जं लकारमनलात्तुनः द्वि लकारं विधाय तत्पुनरंतेन ति
योजयेत् एतेन लकारद्वयं ज्ञेयमिति
अथ मालायां मणिनिर्णयः पद्मबीजादिभिर्माला
दिभिर्माला वर्णयोगे मया उच्यताः रुद्राक्षशंखपद्मा
क्षपुत्रजीविकमौक्तिकैः स्फाटिकैर्मणिरत्नैश्च सौव
र्णैर्विद्रुमैस्तथा राजतैः कुशमूलैश्च गृहस्थस्य माले
का अंगुलिगणनादेकं परं वस्यपदगुणं भवेत् पुत्रजी
वैर्दशगुणं प्रोक्तं शंखे शतगुणं सहस्रकं प्रवालैर्मणिरत्नैश्च दश
साहस्रिकं स्मृतं तदेव स्फाटिकं प्रोक्तं मौक्तिकैर्लक्ष मुच्यते
पद्माक्षैर्दशलक्षं स्यात्सौवर्णैः कोटिरुच्यते कुशग्रंथ्या
कोटिशतं रुद्राक्षैः स्यादनंतकं सर्वैः विरचिता माला तु
णां स्मृतिफलप्रदा कालिकापुराणे रुद्राक्षैर्वा यदि जपे
द्रुद्राक्षे स्फाटिके तथा नान्यमध्ये प्रयोक्तव्यं पुत्रजी

कन्या वश्या भवंतीह ततो लक्षत्रयं मंत्रं जपेत्साधको
त्तमः देवांगना भवंत्येव वश्यास्तस्य महेश्वरि महापात
ककोटि स्नाना नाशयेत्कमलेक्षणे अणिमारोन सौभाग्यं
सौख्यं सौंदर्य्यमाप्नुयात् चतुर्लक्षं प्रजप्याथ महायो
गीश्वरो भवेत् पंचलक्षं जपाद्देवी कुवेरपदवीं व्रजेत् ष
ड्लक्षजपमात्रेण कोविदः सप्तलक्षजपाद्देवि खेचरो
भवेन्ति ध्रुवं अष्टलक्षं प्रजप्याथ देवपूज्यो भवेन्नरः अ
णिमाद्यष्टसिद्धीनां नायको नात्र संशयः राजानो वश्यतां या
न्त्यस्य मोक्षस्तस्य विशेषतः नवलक्षं महादेवि योजपेत्साधकोत्तमः

वादिकं च यत् यद्यन्तं तु प्रयुंजीत मालायां जपकर्मणि तस्य कामं च मोक्षं
च न ददाति प्रियंकरी रुद्रमालायां प्रशस्तं पुत्रजीवैर्माला तेया धर्मा
वता विधौ नरांगुल्यस्थिभिर्माला ग्रथिता सर्वकर्मदा ताडया संग्रथितं
कार्य्यं रक्तेन वा सस्ता प्रिये तदा गोप्या प्रयत्नेन जनन्या जारव
त्प्रिये कामनाभेदे पद्माक्षैर्विहिता माला शत्रूणां नाशिनी नीच
ता कुशग्रंथिमयी माला सर्वपापप्रणाशिनी पुत्रजीवफला
कृता कुरुते पुत्रसंपदं निर्मिता रौप्यमणिभिर्जयमालेप्सित
प्रदा प्रवालैर्विहिता माला प्रयच्छेद्विपुलं धनं भैरवीविद्यायां
तु वाराहीतंत्रे सवर्णमणिभिर्मालां स्फाटिकीं शंखनिर्मितां
प्रवालैरेव वा कुर्य्यात्पुत्रजीवं विवर्जयेत् पद्माक्षैश्चैव रुद्राक्षैः
भद्राक्षैश्च विशेषतः त्रिपुरामंत्रजपादौ तु रक्तचंदनवीजादिभि
प्रशस्ताः तथा च तंत्रे रक्तचंदनमाला तु भोगमोक्षप्रदा भवेत्

रुद्रमन्त्रैस्त्वयं साक्षात्कृता हि तन्न संशयः समयाचारतंत्रे उत्तराखाये तु
या माला मयाः प्रणुवदामि ते अथ वर्णमयी माला सर्वोत्कृष्टा च सा
मता महाशंखमयी माला वांछितार्थफलप्रदा उदुंबरफलस्य
षड्लक्षस्याद्योहितामता योगिनीतंत्रे पूर्वखंडे द्वितीयपटले ईश्वर
उवाच वरुणा मालाम्बुजा प्रोक्ता सर्वमंत्रप्रदीपनी तस्या प्रतिनिधि
देवि महाशंखमयी शुभा महाशंखः करेयस्य तस्यसिद्धिरदूरतः
तद्भावे वीरवंद्ये स्फाटिकी सर्वसिद्धिदा मणिभेदे नफलम्भेद
माह रुद्रमालातंत्रे त्रिंशते स्वार्थफलदा पंचविंशे तु मोक्षदा च
तुर्दशमयी मोक्षदा पंचतीभोगवर्द्धिनी दशपंचात्मिका देवि मार
णोच्चाटने स्थिता स्तंभने मोहने वश्ये वोधने प्रजने ततोः पादुकासिद्धि
सद्ये च शतसंख्या प्रकीर्तिता अष्टोत्तरशतं कुर्य्याद्दद्या सर्वकामद
योगिनीतंत्रे मणिसंख्यां महादेवि मालायाः कथयामि ते पंचवि
शतिभिर्मोक्ष पुष्टौ तु सप्तविंशतिः त्रिंशद्भिर्धनसिद्धिः स्यात्पंचाशत्कंत्र
सिद्धये अष्टोत्तरशतैः सर्वसिद्धिरेव महेश्वरि एतत्साधारणं प्रोक्तं विशेषं
कामिनं वद श्रीशिव उवाच दंतमाला जपे कार्य्या गले धार्या नृणां शु
भा दशानैर्यदि कर्त्तव्या संख्या दंतस्य ते प्रिये सर्वसिद्धिप्रदा माला राजं
दंतेन मेरु स्यात् अन्यत्रापि महेशानि मेरुवेनैव सादिशेत् त्रिपंजपं करे

तथा वैष्णवे तुलसीमाला गजदंतैर्गणेश्वरे त्रिपुराया जपेच्छ्रा
स्तारुद्राक्षैरक्तचंदनैः इंदुमालायां महाशंखमयी माला नी
लसारस्वते विधौ महाशंखस्तु तंत्रे नरललाटास्थिखंडे नरचि
ताजपमालिका महाशंखमयी माला तारादेव्या जपे प्रिये कु
रीनेत्रांतरस्यास्थि महाशंखः प्रकीर्त्तितः मालीनियमस्तु मु
डमालायां अन्योन्यसमरूपाली नातिस्थूलकृशास्तिच कीट
दिभिर्दुष्टानिजीर्णानि नवानि वै तथा च गौतमीये पंचा
शन्मणिभिर्माला त्रिंशद्भिर्धनसिद्धये सर्वार्थाः सप्तविंशत्या
पंचदश्याभिचारिके पंचाशद्भिः काम्यसिद्धिः स्यात्तथा चतु
रोत्तरैः अष्टोत्तरशतैः सर्वसिद्धिरुक्ता मनीषिभिः

कुर्यान्न काम्यमवरोधनार्थं काम्यमपि करे कुर्यान्माला
भावे प्रियंवदे अत्रांगुल्या जपं कुर्यात्साङ्गुष्ठाङ्गुलिभिर्जपेत्
अंगुलेन विना कर्म कृतं तन्निष्फलं भवेत् ॥ उत्पत्तितंत्रे प्रथम
पटले ॥ नित्यं नैमित्तिकं कार्यं करे कुर्याद्विचक्षणः करमाला
महादेवि सर्वदोषविवर्जिता छिन्नभिन्नादिदोषोऽपि करे नास्ति
कदाचन अतएव तु करे देवि माला भवति नाद्भुती ग्रंथिः मा
कुरंडैली मात्रिः पञ्चाशद्वर्णरूपिणी अतएव महेशानि
करमाला महाफला योगिनीतन्त्रे ॥ यथा नयानो गणनं
मालानां तत्र चोपनं पूजां विधाय सन्न्यास तु शुचिः पूर्वमपोषितः
विजनेय चयेन्मौनिरूयं मालां च साधकः ॥ कृतनित्यक्रियः शुद्धः शु
दुर्द्धेह च मंत्रवित् यथाकालं यथाकामं प्रदानप्यानीय यत्नतः ॥ प्र
त्योन्यसमरूपाणी नातिस्थूलकृशानि च कीटादिभिरदुष्टानि
नजीर्णानि नवानि च गव्येन पंचामिस्तानि प्रक्षाल्य च पृथक्
पृथक् द्वर्यादेवं द्रुपुरएवक्त्रीतिभिन्नं युग्मं विवर्जितं त्रिगुणं त्रिगुणी
कृत्य पट्टसूत्रमथापि वा अष्टवर्णेन यापीतं रक्तं तिवरयादि
चारके सूत्रं संपातयेद्विद्वान् तन्त्रस्यास्य पूर्ववत् मालामेकैकमादा
यत्नेन संपातयेत्सुधीः मुखेन मुखं संयोज्य पुच्छे पुच्छं तु योजयेत्
गोपुच्छसदृशी कार्या यथा वा सर्पाकृतिर्भवेत् तत्तज्जातीय ‒ तासु
मेरुं चैनाग्रतो न्यसेत् एकैकमालामध्ये तु ग्रंथिं ग्रंथिं प्रकल्पयेत् उत्पत्तितं
त्रे षष्ठीपटले क्रमात्क्रमात्कृत्या पंचाशद्वर्णमालया योजयस्तदे
व्याख्यातमः परिकीर्तितः अकारादिक्षकारांतः वर्णमाला प्रकीर्तिता

अथ पद्मासनभेदाः हंसमाहेश्वरे कंबलं कोमलं कौशं चारवं कमलाद्य
नं एतेषामासनं श्रेष्ठं च चर्मासनं महेश्वरी लोमशी चैव यदासीनः सदा
सर्वविनश्यति लोमस्पर्शनमात्रेण सिद्धिहानिः प्रजायते काम्यार्थे केवलं
चैव मेषं चर्म रक्तकंबलं कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि
कुशासने मंत्रसिद्धिर्नात्र कार्या विचारणा धरण्यां दुःखसंभूतिर्दौर्भा
ग्यं दारुजासने वंशासने दरिद्रस्यात्पाषाणे व्याधिपीडनं तृणा

स्वयासनं शाक्तानंदतरंगिणीधृतगौरीयामले सलिले यदि कुर्वीत
देवतानां प्रपूजनं तथाप्यासनमासीनो नोत्थितस्तत्र याचरेत्
आसनं कल्पयित्वा तु मनसा पूजयेज्जले आसनस्थो जपेत्मन्त्रमन्या
र्थगतमानसः संमोहनतंत्रे रक्तासनोपविष्टस्तु लाक्षागुरुगृहे स्थि
तः मनः कल्पितरक्तो वा साधकः स्थिरमानसः तूलकंबलवस्त्राणां
सिंहव्याघ्रमृगाजिनं कल्पयेदासनं धीमान्सौभाग्यज्ञानवर्धनं
कौशेयं वा यथा चर्मं वा तैलं तूलमथापि वा सारपत्रं तालपत्रं क
वलं दारवासनं कृष्णाजिने ज्ञानसिद्धिः सुश्रीः स्यात् व्याघ्रचर्मणि
कृष्णाजिने गृहस्थानां नाधिकारः कथंचन नादीक्षितो विशेषेज्जा
तुलक्ष्मसारासने गृही विशेयंति वनस्थश्च ब्रह्मचारी च भिक्षुकः
वस्त्रासने व्याधिनाशः कंबलं दुःखमोचनं जपध्यानतपोहानिं
वस्त्रासनं करोतीति हि अत्र वस्त्रनिषेधः केवलवस्त्रपरः अन्यथावि
रोधापत्तिः कुशा भवेदायुर्मोक्षः स्याद्व्याघ्रचर्मणि अ
ज्ञिने तु भवेत्पुत्री कंबले सिद्धिरुत्तमा शांतिके धवलः प्रोक्तः
सर्वार्थे चित्रकंबले स्यात्पौष्टिके तु कौशेयं कंबले दुःख
मोचनं त्रिपुरापूजने देवि प्रशस्तं रक्तकंबलं नैतद्धि हस्ततो
दीर्घं सार्द्धहस्तान्विविस्तृतं नद्व्यंगुलसमुच्छ्रायं पूजाकर्म
णि संग्रहे आसनं च ततः कुर्याद्वाजिनी चंनचोच्छ्रितं गं
धर्वतंत्रे धरण्यां दुःखसंभूतिर्दौर्भाग्यं दारुजासने आम्र
निंबकदंबानामासनं वंशानां शाने वकुले किंशुके चैव पराग्नेस्तु
हत्याश्रियः वंशोत्पन्नकाष्ठेष्वरगीतः रणबिल्वजानिर्मितं वज्रपासनं

सने यशोहानिः पल्लवे चित्तविभ्रमः जपध्याने तपोहानिं
वस्त्रासनं करोति हि अतएव वस्त्रासनं केवलमेव विरुद्धं
वस्त्रासनं रोगहरमित्यादि वचनेन विशिष्टस्य फलजनक
त्वात् चैलाजिन कुशोत्तरमिति भगवद्वचनाच्च । तथा च

मंत्री दारिद्र्य व्याधि दुःखदं । दारुजासनं विशेषेणेति गंधर्वतंत्रे।
गाम्भारीनिर्मितं शस्तं नान्यदारुमयं शुभं चतुर्विंशत्यंगुलं
हि दीर्घं काष्ठासनं प्रिये षोडशांगुलविस्तीर्णं मनुष्याय
चतुरंगुलं कंबलं चार्मणं शैलं महामाया प्रपूजने
प्रशस्तमासनं देवि कथितं वरवर्णिनि ॥ मुण्डमाला
तन्त्रे तृतीयपटले ॥ व्याघ्राजिनं सर्वसिद्ध्यै ज्ञानसि
द्ध्यै मृगाजिनं वस्त्रासनं रोगहरं वेत्रजं श्रीविवर्द्धनं
कौशेयं पुष्टिदं प्रोक्तं कंबलं सर्वसिद्धिदं षडक्षं वा यदि
वा कृष्णं विशेषात्पुत्र कंबलं मृदुकोमलमास्तीर्णं
संग्रामपतितं हि यत् जंतु व्यापादितं वापि मत्तं वा
नरमासनं गर्भच्युतं त्वचं वापि नारीणां योनिजं त्वचं
सर्वसिद्धिप्रदं देवि सर्वतोपि समृद्धिदं त्वचं वा यो वनस्था
नां कुर्यात् वीरनरासनं श्मशाने काष्ठ घटिते पीठं वा
दारुजं शुभं नाकीर्तितो विशेषात्तु कृष्णसाराजिने गृही
उदासीन वनवासीनः स्नातक ब्रह्मचारिणां कुशाजिना-
म्बरे साक्षं चतुरस्रं समंततः एकहस्तं द्विहस्तं वा चतु
रस्रं समाचरेत् ॥ कर्मविशेषे आसनविशेषस्तु समयाचार
तन्त्रे द्वितीयपटले ॥ मेषासनं तु वश्यार्थं माकुशो व्याघ्रचर्म
च शान्तौ मृगाजिनं शस्तं मोक्षार्थं व्याघ्रचर्म च गोचर्म
स्तम्भने देवि सम्भवे वाजिचर्म च चर्मो खड्गस्य तु चोच्चा
टे विद्वेषे स्वान चर्म च मारणे माहिषं चर्म कर्मोद्दिष्टं
समाचरेत् सर्वकामार्थदं देवि वस्त्रपट्टासनं तथा ऊर्णासनं
कम्बलं वा सर्वकर्मसु शोभितं दुःखदारिद्र्य करणं काष्ठ
पाषाणजासनं स्वर्णादि रत्नजं देवि महासौभाग्य वर्द्धनम्
येनाशु लभते पुण्यं फलं देवस्य दुर्लभं शवासनं तु युग्मगे
मत्तमुण्डासनं तथा श्मशानमासनं देवि भगस्य दर्शनं

गौतमीये - तथा नन्दासने मंत्री पद्माजिन कुशोत्तरे इति ।
योगिनी हृदये - नाकीर्तितो विशेषात्तु कृष्णसाराजिने
गृही विशेषः यतिर्वनस्थश्च ब्रह्मचारी च भिक्षुकः ।आगम
कल्पद्रुमे - मेष व्याघ्र गजोष्ट्र कूर्म दोरंगवाचस्तु षट्
कर्मसु त्वेकं हितासनानि ॥

तथा भगदर्शासनं चैव मैथुनासनकं तथा कृतमैथुनकं
वापि वांछितार्थ फलप्रदं ॥ मात्स्ये पञ्चपञ्चाशत्पटले रुरु
चर्मणि सत्कामः श्रीमोक्षौ व्याघ्रचर्मणि शक्तेः शस्तं कृष्ण
चर्म कृष्णव्याघ्रस्य भामिनि प्रस्तारमथवा तूले चैव रक्ते पीते च
वाससी कंबले पुत्र सिद्धिस्याद्भद्रदारुमयेपि च । तथा योगा-
सनं च कूर्मं च विशेषः गौरीमनुस्मरन् ॥ समयाचारतन्त्रे-
पद्मीमंत्रस्य च ऋषिर्मेरुपृष्ठ उदाहृतः सुतलश्च तथा
छंदः कूर्मो देवोऽस्य सुंदरि आसने विनियोगः स्यात् बद्ध
पद्मासने विशेषः ॥ बद्धपद्मासनं इत्युपलक्षणं ॥ पद्म
स्वस्तिक वीरादि येकासनसमाहितः जपार्चनादिकं
कुर्यादन्यथा निष्फलं भवेत् । इति राघवभट्ट वचनात्
आसनं तु यतीनां कूर्माकारमन्येषां चतुष्कोणं ॥ यथा
राघवभट्ट धृतं ॥ यतीनामासनं शस्तं कूर्माकारं तु
कारयेत् अन्येषां तु चतुष्पादं चतुरस्रं तु कारयेत् ॥ तथा ॥
दानमाचमनं होमं भोजनं देवतार्च्चनं प्रौढपादो न कुर्वीत
स्वाध्यायं चैव तर्पणं ॥ प्रौढपादलक्षणमपि तत्रैव आसना
रूढपादस्तु जानुनोर्वापि जंघयोः कृतावसक्थिकोयस्तु प्रौढ
पादः स उच्यते ॥ इति राघवभट्टधृत प्रौढपादलक्षणं ॥
गोरक्षसंहितायां ॥ आसनानि च तावन्ति यावन्तो जीव
जन्तवः एतेषामखिलान्भेदान् विजानाति महेश्वरः ॥ चतु
रशीति लक्षाणामेकैकं समुदाहृतं । तथा शिवेन पीठानां
षोडशानां शतं कृतं आसनेषु समस्तेषु द्वयमेवमुदाहृतं
एकं सिद्धासनं प्रोक्तं द्वितीयं कमलासनं योनिस्थान
मंघ्रिमूल घटितं कृत्वा दृढं विन्यसेत् मेढ्रे पादमथैक
मेव हृदये कृत्वा समं विग्रहं स्थाणुः संयमितेंद्रियोऽचलदृ
दृशा पश्यन्भ्रुवोरन्तरं एतन्मोक्ष कपाट भेदनकरं सि
द्धासनं प्रोच्यते ॥ इति सिद्धासनं वामोरूपरि दक्षिणं

अथ मालासंस्कारः सनत्कुमारीये अप्रतिष्ठितमालाभिः सर्वं जपति यो
नरः सर्वं तन्निष्फलं विद्यात् क्रुद्धः भवति देवता गौतमीये कार्पासं
सवर्णं तत्त्वं धर्मकामार्थमोक्षदं तच्च विप्रेंद्रकन्याभिर्निर्मितं च शुभे
मतं श्वेतं रक्तं तथा कृष्णं पट्टसूत्रमथापि वा शांतिवश्याभिचा
रेषु मोक्षैश्वर्यजयेषु च शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात्
सर्वेषामेव वर्णानां रक्तं सर्वेप्सितप्रदं त्रिगुणं त्रिगुणीकृत्य ग्रथयेत्सरी
त्यशास्त्रतः मालीरत्नप्रमाणास्तत्त्वं कुर्यात् विचक्षणः एकैकं मातृ
कावर्णं ततः तारं प्रजपेत्सुधीः मालामादाय तत्त्वेन ग्रथयेत्स ध्यमा
गतः ब्रह्मग्रंथिं विधायेत्थं मेरुं च ग्रंथिसंयुतं ग्रथयित्वा पुरो मालां
ततः संस्कारमारभेत् कस्यचिन्मते मूलविद्यया ग्रथयेत् तथा च
एकवीराकल्पे - मातृकावर्णतो ग्रंथिं दद्याद्वा धारयेत् सवर्णा
द्विगुणैर्वापि ग्रथयेत्साधकोत्तमः ब्रह्मग्रंथिं ततो दद्यान्नागपाश
मथापि वा कवचेनावगुंठयान्मालां ध्यानपरायणः सर्वमो
घं ततो मेरुं सत्त्वद्वयसमन्वितं ग्रथयेत्तारयोगेन वगुंठयात्सा

नियमतः संस्थाप्य वामं तथा दक्षोरूपरि पश्चिमेन विधिनाधृ
त्वा कराभ्यां धृतं अंगुष्ठं हृदये निधाय चिबुकं नासाग्रमालोकयेत्
एतद्व्याधिविनाशनकरं पद्मासनं प्रोच्यते अन्यत्रापि वामोरूपरि द
क्षिणं हि चरणं संस्थाप्य वामं तथा दक्षोरूपरि तस्य बंधनविधौ
धृत्वा कराभ्यां दृढं अंगुष्ठौ हृदये निधाय चिबुकं नासाग्रमालो
कयेत् एतद्व्याधिविनाशकारयमिनां पद्मासनं प्रोच्यते ।-
अथ महाशंखः नित्यातंत्रे द्वितीयपटले ईश्वर उवाच महाशंखस्य
माहात्म्यं कथयामि तवानघे सयोनिरवगोमव्यं सर्वदापरमे
वर्टे भगरूपा महामाया शुक्लवर्णा तस्य रा जगदाकर्षिणी
विद्या जगत्सुस्थावराननने तत्रैव गत्या तेसारं जगतां वीजरूपकं
तद्वीजं परमेशानि पंचाशद्वर्णरूपकं गर्भे प्राप्य भवेदस्थिशीशो
र्मज्जासमन्वितं तदस्थितार्द्धं मध्यास्ते पंचाशद्वर्णरूपकं वर्णमा
लां तु देवेशि प्रातःसंजप्य यत्फलं एकैकोच्चारणेनास्थिमालायां
तत्र कीर्तितं इति महाशंखमालाफलं तन्मालाकरणे वर्जनी

साधकोत्तमः ~~ब्रह्मग्रंथिं ततो दद्यान्नागपाशमथापि वा~~ एवं
निष्पाद्य देवेशि प्रतिष्ठां च समाचरेत् । गौतमीये । मुखे मुखं
तु संयोज्य पुच्छे पुच्छं नियोजयेत् गोपुच्छसदृशी माला यद्वा
सर्पाकृतिः शुभा । मुख पुच्छ नियमस्तु छंद सारे । रुद्राक्षस्योन्नतं
प्रोक्तं मुखं पुच्छं तु निम्नगं कलाक्षस्य च सत्त्वांशे सविंदु वि-
नयं मुखं सविंदुकस्य स्थूलांशे पुच्छं सत्त्वदारा स्थिति स्थितः एवं
ज्ञात्वा मुखं पुच्छं रुद्राक्षाणां क्रमाद्वयो गंधजातीयमेकादं
मेरुत्वेनाग्रतो न्यसेत् एकैकं मणिमादाय ब्रह्मग्रंथिं प्रकल्प
येत् एकैकं मातृकावर्णं यथान्यायेन संजपेत् । ग्रंथिनियमस-
त्रैव । त्रिरावृत्त्या ग्रंथिकेन तथा देन विधीयते सार्द्धद्वयावर्तनेन
ग्रंथिं कुर्यात् यथा दृढं भवेत् । उत्पन्नाभ्यामि विकल्पः कालि-
कापुराणे ब्रह्मग्रंथियुतं कुर्यात् प्रतिवीजं यथास्थितं
अथवा ग्रंथिरहितं दृढरज्जुसमन्वितं एवं निर्माय मालां
वै शोधयेन्मानि सत्तमः अश्वत्थपत्रनवकैः पद्माकारं तु
कल्पयेत् तन्मध्ये स्थापयेन्मालां मातृकामूलमुच्चरन् प्रक्षाल-
येत्पंचगव्येन सद्योजातेन सज्जलैः । सद्योजातमंत्रस्तु ।
ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः भवे भवेनादि
भवे भजस्व मां भवोद्भवाय वै नमः चंदनागुरुगंधाद्यैः वाम
देवेन घर्षयेत् । वामदेवमंत्रस्तु । ॐ नमो ज्येष्ठाय नमो
रुद्राय नमः कालाय नमः कालविकरणाय नमो वरा

य मातृतंत्रेव - स्वेच्छामृतं स्त्रियं विप्रं तिर्यग्योनिगतं तथा
रोगिणं यवनं वृद्धं दीक्षितं चापि वर्जयेत् । गायत्र्यपि
तत्रैव वज्राहतं सर्पदष्टं पतित्वा वा जले मृतं व्याघ्रादि
निहितं वापि संमुखे वा रणे मृतं चाण्डालाद्या प्रधानास्ते
ऽस्थिमानस्तु जानयः । बृहन्नीलतंत्रे चतुर्थ पटले । युद्धे
मृतस्य देवेशि चाण्डालस्यास्थिकेन च मृतकस्य विशेषेण
महाशंखः प्रकीर्तितः ॥ नित्यातंत्रे ॥ अत एव महेशानि
अस्थिमाला गले मम ॥ प्रथम पटले ॥ समाश्रित्य महाशंख
मालां वीरपदं व्रजेत् ॥ अथ महाशंखमालाकरणं ॥ तारामाला
तंत्रे द्वितीय पटले नराङ्गुल्यस्थिभिर्माला ग्रथिता एवमेव तु:

प्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय। धूपयेत्तम
घोरेण। अघोर मंत्रस्तु ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोर
तरेभ्यश्च सर्वतः सर्व सर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः।
लेपयेत्तत्पुरुषेण तु। तत्पुरुष मंत्रस्तु ॐ तत्पुरुषाय
विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात्। मंत्र
येत्तं च मे नैव प्रत्येकं तु शतं शतं मेरुञ्च मंत्रयेत्त्वैव मूले
न च शतं शतं। पञ्चम मंत्रस्तु - ॐ ईशानः सर्वविद्याना
मीश्वरः सर्वभूतानां ब्रह्माधिपति ब्रह्मणोऽधिपति ब्रह्मा शिवो
मेऽस्तु सदाशिवोम्। प्रत्येकं तु सकृत्सकृदिति वा तथा च
तत्रैव - प्रत्येकं मंत्रयेन्मंत्री - पञ्चमेन सकृत्सकृत्। तथा
च गौतमीये - समुदाय मालामभिकृत्य - पञ्चमेनैव
सकृत्केन शतान्यसेनेन मंत्रयेदिति दर्शनान्मालायां वा
शत जपः तत्रावाह्य यजेद्देवं यथाविभव विस्तरैः।
मालायां प्राणप्रतिष्ठानन्तरं देवं पूजयेत्। तथा च सन-
त्कुमार संहितायां - संस्कृत्यैवं बुधो मालां तत्प्राणांस्तत्र
योजयेत्। मूलमंत्रेण तां मालां पूजयेद्द्विजसत्तमः। वाराही
तन्त्रे माले माले महामाले सर्वतत्त्व स्वरूपिणि चतुर्वर्ग
स्त्वयि न्यस्तस्तस्मान्मे सिद्धिदो भव मायया। बीजादिकं
कृत्वा रक्तपुष्पैः समर्चयेत् - इति शक्तिविषयं - विष्णु
विषये तु यामले - वाग्भवं च तथा लक्ष्मी मदनादि मालिकां

सर्वसिद्धिप्रदा मोक्षदायिनी वरवर्णिनि नाड्या संस्थापिता
माला कार्य्या रक्तेन वाससा नाडीभिर्ग्रथिता माला
महासिद्धिप्रदा प्रिये॥ स्वतन्त्र तन्त्रेऽपि। आत्मीयदीक्षित
शरीरं तु नरस्य पवित्रस्य च तुलसी गोमयास्पर्शं तथा
गङ्गोदकेन च पवनं ब्राह्मणान्यस्य तत्कार्य्यं साधके
जैनैः अस्पर्श्यं तत्र जातीयात् शालग्राम शिलादिभिः
अथ महाशंख माला संस्कारस्तत्रैव - गुरुं तत्र प्रणम्यादौ
संस्कुर्य्याज्जप मालिकां कृत नित्यक्रियो मंत्री मालां
च कमतो यजेत् ॐ ह्रीं श्रीं क्लीं क्लीं फट्स्वाहा इति मंत्रेण

ततः ॐ तं हृदयवर्णान्तां मंत्रेणानेन पूजयेत्। मंत्रयेन्मूल
मंत्रेण क्रमेणोत्क्रमयोगतः तथैव मातृकावर्णैर्मंत्रयेत्तु
तु मंत्रवित्। योगिनी तंत्रे - होमकर्म्म ततः कुर्य्याद्देवतायाभा-
वसिद्धये अष्टोत्तर शतं हुत्वा सम्पात्याज्यं विनिक्षिपेत्। होम
कर्म्मण्यशक्तश्चेद्द्विगुणं जपमाचरेत्। नान्यमंत्रं जपेन्मं-
त्री कम्पयेन्न विधूनयेत्। कंपनात्सिद्धिहानिः स्याद्धूननं
बहुदुःखदं शब्दे जाते भवेद्रोगः कराद्भ्रष्टे विनाशकृत्
छिन्ने सूत्रे भवेन्मृत्युस्तस्माद्यत्नपरो भवेत्। जपान्ते
कर्णदेशे वा उच्चदेशेऽथवा न्यसेत्। ॐ त्वं माले सर्वदेवानां
सर्वसिद्धिप्रदा मता तेन सत्येन मे सिद्धिं देहि मातर्नमोऽस्तु ते
उत्थाप्यापरि पूज्याथ गोपयेद्यत्नतो मही कामनार्थदे
अंगुलि नियम माह गौतमीये - तर्जन्यंगुष्ठ योगेन शत्रु-
च्चाटन कर्म्मणि अंगुष्ठ मध्यमा योगात् सर्वसिद्धिः सु-
निश्चिता अंगुष्ठानामिका योगात् दुःखान्ते वादने मते ज्ये
ष्ठा कनिष्ठा योगेन शत्रुणां नाशनं मतं वैशम्पायन

समुधाभिमंत्र्य चषकादि पात्रादौ निःक्षिपेत् ततस्वाभा-
हन्यादि मुद्रया देवीं तत्रावाह्य सपरिवारामुपचारैः सं
पूज्य तां वासिनि धेनुमुद्रया मृतीकृत्य कवचेनावगुण्ठ
यत्स्य मुद्रया च्छाद्य देवी स्वरूपं तां मालां ध्यायन् विंदु
प्रक्षेपं कुर्य्यात् तत्र मंत्रः ॐ ह्रीं स्वाहा ॐ हूं स्वाहा ॐ
हूं स्वाहा ॐ फः स्वाहा ॐ फट् स्वाहा ॐ ह्रीं श्रीं स्वाहा ॐ
ह्रीं हूं स्वाहा ॐ ह्रीं फट्स्वाहा इति सम्प्राप्य विंदु प्र-
क्षेपणं कृत्वा कस्तूरी धूपयित्वा चषकादि पात्रादु
द्धृत्य मालामभिमंत्रयेत् तत्र मंत्रः ॐ ह्रीं श्रीं महा
वाजिनि महाघोर रूपे कर्कश महास्थि मगुले प्र
विश सर्वसिद्धिं प्रयच्छ ॐ ह्रीं श्रीं ह्रीं स्वाहा ॐ महा
कपालिनि महाघोर रूपे स्वाहा इत्यनेन मंत्रेण दूर्वा
क्षतैरभ्यर्च्य कामबीजेनोद्दीपनं कृत्वा उपचारै
रभ्यर्च्य मातृका मंत्रेण संदीप्य ॐकारेण वेष्टयेत्

संहितायां — अंगुष्ठमध्यमाभ्यां च चालयेन्मध्यमध्यतः गणयित्वा
न स्पृशेदेनां मुक्तिफलोपहरणात्क्रमः जीर्णे सूत्रे पुनः सूत्रं ग्रन्थयित्वा
शतं जपेत् प्रमादात्पतितेो हस्तात् शतमष्टोत्तरं जपेत् जपेन्निषिद्ध
संस्पर्शे क्षालयित्वा यथोदितं छिन्नेपि अष्टोत्तरशतजपः कार्यः
तदुक्तं कुब्जिकातन्त्रे — छिन्ने सूत्रे पुनः सूत्रं ग्रथयित्वा शतं जपे
दिति करभ्रष्टछिन्नयोस्तुल्यफलत्वात् ॥ प्रकारान्तरमागम
कल्पद्रुमे — भूतशुद्ध्यादिकां पूजां समाप्य तत्र पूजयेत् गणेश
विष्णीशान दुर्गाश्चावाह्य मंत्रवित् पञ्चगव्यं ततः क्षिप्त्वा हंसमंत्रेण
मंत्रवित् तस्मादुत्तोल्य तां मालां स्वर्णपात्रे निधापयेत् पयोदधि
घृतक्षौद्रशर्करादेरनुक्रमात् तोयधूपान्तरैः कृत्वा पञ्चामृत
विधिं ततः क्रमादत्रैव संस्थाप्य स्नापयेत् शीतलैर्जलैः ततश्चन्दन
+ सौगन्धिकस्तूरीकुंकुमादिभिः तामालिप्य हंसमंत्र ~~मष्टोत्तर~~
मष्टोत्तरशतं जपेत् तस्यां नवग्रहांश्चैव दिक्पालांश्चात्र पूजयेत्
ततः संपूज्य च गुरुं गृह्णीयान्मालिकां शुभां ॥ इति

ततः हूं ह्रीं ह्रूं ओं हूं श्रीं ह्रूं ओं हूं हूं ओं ह्रूं फट् ह्रूं ओं स्वाहा ओं हूं महायो
गिनी त्रिभुवनतारिणि महाशंखाख्यमध्ये निवासं कुरु सर्वसिद्धिं
देहि सुरामांसोपहारान् गृह्ण गृह्ण गृह्णापय गृह्णापय ह्रीं श्रीं
ह्रूं फट् स्वाहा इत्यनेन यथोक्तद्रव्येण बलिं दत्वा संहारमुद्रया देवीं
विसर्ज्य निमूलतस्थाने मालां स्थापयेत् विन्दुप्रक्षेप इत्यत्र विन्दुः
सुराविन्दुरित्यर्थः एवं शोधयित्वा पश्चान्मालासंस्कारविधाने
नापि संस्कारः करणीय इति तान्त्रिकाः तंत्रे — अकल्पादिहिता
माला महाशंखाख्यमालया तथा चैवान्यया घटिता महाशं
खाः प्रकीर्तिताः अत्राख्यपदेन गुरूपदेशादिग्राह्यमिति तान्त्रि
काः इति महाशंखमालासंस्कारः
पुरश्चरणविशेषोल्लिख्यते कंकालमालिनीतंत्रे । अथवान्यप्र
कारेण पुरश्चरणमुच्यते अष्टम्यां च चतुर्दश्यां नवम्यां वीरवं
दिते सूर्योदयं समारभ्य यावत्सूर्योदयान्तरं तावज्जप्तागते
शांतकः सर्वसिद्धीश्वरो भवेत् अथवान्यप्रकारेण पुरश्चरणा
मुच्यते अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोरपि सूर्यमारभ्यले

अथ पुरश्चरणं योगिनीहृदये गुरोराज्ञां समादाय सुदान्तः
करणो नरः ततः पुरश्चर्यां कुर्यात्तां त्रीहिं सिद्धिकाम्यया जीव
हीना यथा देही सर्वकर्मसु न क्षमाः पुरश्चरणहीनोपि तथा मंत्रः
प्रकीर्तितः तस्मादादौ स्वयं कुर्यात्गुरुं वा कारयेद्बुधः योगिनीहृद
ये गुरोरभावे विप्रं वा सर्वशास्त्रहिते रतं सिद्धं शास्त्रविदं मित्रं ना
नागुणसमन्वितं स्त्रियं वा सद्गुणोपेतां सद्भावां नियोजयेत् आदौ
पुरश्चर्यां कर्तुं स्थाननिर्णय उच्यते गौतमीये — पुण्यक्षेत्रं नदी
तीरं गुहापर्वतमस्तकं तीर्थप्रदेशाः सिन्धूनां संगमः पावनं म
हत् उद्यानानि विविक्तानि विल्वमूलं तटं गिरेः तुलसीकाननं
गोष्ठं वृषशून्यं शिवालयं अश्वत्थामलकीमूलं गोशाला
जलमध्यतः देवतायतनं कूलं समुद्रस्य निजालयं साधनेषु प्रशस्ता
नि स्थानान्येतानि मंत्रिणां सूर्यस्याग्नेर्गुरोरिन्दोर्दीपस्य च जल
स्य च विप्राणां च गवां चैव सन्निधौ शस्यते जपः अथवान्यैरे
त्र यत्र चित्तं प्रसीदति । तथा — गृहे शतविधं पुण्यं गोष्ठे लक्षगुणं भ
वेत् कोटिदेवालये पुण्यमनन्तं शिवसन्निधौ बुद्ध्यामले जपमेक
यस्य यावत्सूर्यास्तमनं भवेत् तावत्जप्त्वा तिशान्तकः सर्वसिद्धीश्वरो
भवेत् अथवा व्यजनस्य प्रान्तो राज्याह्नसमस्त्रवा उदयात्तोदि
वा जप्त्वा सर्वसिद्धीश्वरो भवेत् तेनासने च वा देवीप्रसन्नमारभ्य मा
स्रतः नपितोदयपर्यन्तं सर्वसिद्धीश्वरो भवेत् अथवा मासप्रका
रेण पुरश्चरणमुच्यते सूर्योदयात्समारभ्य घटिकादशकं क्र
मात् ऋतवः स्युर्वसन्ताद्याः अहोरात्रं दिने दिने वसन्तग्रीष्मवर्षा
ख्या शरद्धेमन्तशैशिराः वसन्तश्चापि पूर्वाह्ने ग्रीष्मो मध्याह्न उ
च्यते अपराह्णः प्रावृषः स्युः प्रदोषः शारदः स्मृतः अर्द्धरात्रे व
हेमन्तः शेषे चापि शिशिरः स्मृतः सूर्योदयात्समारभ्य वसन्तो
न्ते समाहितः तावज्जपेन्महेशानि पुरश्चर्याहि सिद्ध्यति ततः द
शादिकं कृत्वा शक्तियुक्तश्च साधकः गुरवे दक्षिणां दत्वा सर्वसि
द्धीश्वरो भवेत् अथवान्यप्रकारेण पुरश्चरणमुच्यते ग्रीष्मा
दिषु महेशानि षड्ऋतुष्व साधकः कृष्णकृजम्रा वरारोहे पुर
श्चर्याहि सिध्यति पूर्वोक्तविधिना सर्वं कर्तव्यं वीरवंदिते अतो

गुणं गेहे गोष्ठे शतगुणं स्मृतं वनान्तरे शतगुणं तडागे च सह-
स्रकं नदीतीरे लक्षगुणं नगाग्रे कोटि सम्मितं शिवालये कोटि
शत मनन्तं गुरु सन्निधौ तथा - गेहे गोष्ठे वनारामे नदी नग शि-
वालये गुरो र्वा सन्निधौ यत्र स जपः परमो मतः म्लेच्छ दुष्ट मृग
व्याल शंकातङ्क विवर्जिते एकान्ते पावने निन्दा रहिते भक्ति संयुते
स्वदेशे धार्म्मिके देशे सुभिक्षे निरुपद्रवे रम्ये भक्तजनस्थाने नि
वसेज्जापकः प्रिये गुरूणां सन्निधाने च चित्तैकाग्र्य स्थले तथा ए
षामन्यतमं स्थान माश्रित्य जप माचरेत् यत्र ग्रामे जपेन्मंत्री
तत्र कूर्म्मं विचिन्तयेत् ॥ गौतमीये - पर्वते सिन्धुतीरे वा पुण्या
रण्ये नदी तटे यदि कुर्य्यात्पुरश्चर्य्यां तत्र कूर्म्मं न चिन्तयेत्
ग्रामे वा यदि वा वास्तौ गेहे तच्च विचिन्तयेत् अथ पुरश्चरणे
भक्ष्यादि नियमः । गौतमीये - पुरश्चरण कृन्मंत्री भक्ष्याभक्ष्यं
विभावयेत् अन्यथा भोजनाद्दोषात् सिद्धि हानिः प्रजायते प्र-
शस्तान्नं च सम्प्रोक्तं यान्यं त्रसिद्धि समीक्षया तस्मान्नित्यं प्रयत्नेन
शस्तान्नाशी भवेन्नरः ॥ अगस्त्य संहितायां - दधि क्षीरं घृतं
गव्यं पेक्षारं गुड़ वर्जितं तिलाश्चैव सितामुद्गाः कंदं केमूक
वर्जितं नारिकेल फलं चैव कदली लवणी तथा आम्रमामलकं

जम्बातु कृत्वनो शक्तितः पूजयेत् शिवं एव माचर्य्य कुर्व्वंवै
ध्यानाना मीश्वरो भवेत् ॥ अथ वार पुरश्चरणं स्वतंत्रतंत्रे रवि
वारादि सर्वेषु वारसंख्या सहस्रकं जप्त्वा मंत्रं सदा देवि साधकः
सिद्धि भाग्भवेत् पुरश्चरण मेतद्धि नात्र कार्य्या विचारणा एवं
विधिं समाचर्य्य दशांशं तु तदाचरेत् गुरवे दक्षिणां दत्वा
सर्वकाम मवाप्नुयात् ॥ अथ तिथि पुरश्चरणं तत्रैव - प्रति
पत्तिथि मारभ्य कुहू र्वा यद्भवेत्प्रिये तिथिसंख्या क्रमेणैव वर्द्धये
च्च सहस्रकं एवं जप्त्वा तदा मंत्री सर्वकाम मवाप्नुयात् पुर-
श्चरमेतद्धि कथितञ्च वरानने प्रति पत्तिथि मारभ्य राका
यावद्भवेत्प्रिये तावन्मंत्रं प्रजपेत् तिथिसंख्या क्रमेण तु सर्व
भाव समायुक्तो जायते भुवि साधकः एतेनैव सम्प्रसिद्धिः स्या
न्नात्र कार्य्या विचारणा ॥ अथ मास नियत कार्य्य - अद्ये
त्यादि वैशाखे कार्त्तिके माघे वा मासि अमुक राशिस्थिते
भास्करे अमुके पक्षे ऽमुकतिथि वारभ्य अमुक गोत्रः श्री
अमुक देव शर्म्मा अमुक देवताया अमुक मंत्रसिद्धि कामो
ऽमुक संक्रान्त्या मारभ्य मेष तुला मकरस्थ रविं भास्कर

चैव पनसं च हरीतकी व्रतारम्भे प्रशस्तं च हविष्यं मन्यते बुधैः ।
व्रतान्तरे इति । हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः कलाय
कङ्गुनीवारा वास्तूकं हिलमोचिका षष्टिका कालशाकञ्च मूलकं
केमुकेतरत् लवणे सैंधव सामुद्रे गव्ये च दधि सर्पिषी पयो
नुद्धृत सारं च पनसाम्र हरीतकी पिप्पली जीरकं चैव नागरङ्गक
तिंतिड़ी कदली लवली धात्री फलान्य गुड़ मैक्षवं अतैलपक्वं
मुनयो हविष्यान्नं प्रचक्षते भुंजानो वा हविष्यान्नं शाकं
यावक मेव वा पयो मूलं फलं वापि यत्र यत्रोपलभ्यते रम्भा
फलं तिंतिडीकं कमला नागरङ्गकं फलान्येतानि भोज्यानि
पथ्योऽन्यानि वर्जयेत् । यन्त्र योगिनी तन्त्रे - चिंचां च नालिका
शाकं कलायं लकुचं तथा कदम्बं नारिकेलं च व्रते कूष्माण्डकं
त्यजेत् तन्त्र व्रतान्तरे बोध्यं - अथ वर्ज्यानि । विवर्जयेन्मधु
क्षारं लवणं तैलमेव च ताम्बूलं कांस्य पात्रं च दिवाभोजन
मेव च । तथा - क्षारं च लवणं मांसं गंजनं कांस्य भाजनम्

अद्येहममुक देवताया अमुक मंत्र सि सहस्र संख्याक जपमेकै
धन्वन्तर तद्दशांश होम तद्दशांश तर्पण तद्दशांशाभिषेक
तद्दशांश ब्राह्मणभोजन रूप पुरश्चरण महं करिष्ये इति
संकल्प्य मासं व्याप्य हविष्यान्न भुक् नियमस्थः अयुतं
सहस्रं कृत्वा जपेत् ततः सौर ज्येष्ठ सौर मार्गशीर्ष सौर फा-
ल्गुन प्रथम दिनेषु होमादिकं कृत्वा दक्षिणां कुर्य्यात्
यथा अद्येत्यादि कृतैतत् अमुके मासि अमुक राशिस्थे
भास्करे अमुक पक्षे अमुकतिथावमुक गोत्रः श्री अमुक देव
शर्म्मा अमुक राशिस्थ रवि कालीन अमुक देवताया अमुक
मंत्र अयुत संख्याक जप तद्दशांश होम तद्दशांश तर्पण तद्दशां
शाभिषेक तद्दशांश ब्राह्मणभोजन रूप पुरश्चरण कर्म्मणः
साङ्गतार्थं दक्षिणामिदं काञ्चनं वह्नि दैवतं अमुक गोत्राय
श्री अमुक देव शर्म्मणे गुरवे तुभ्यमहं सम्प्रददे । ततोऽच्छि
द्राव धारणं कुर्य्यात् ॥ अथ वारादि पुरश्चरण संकल्पमाह
अद्येत्यादि अमुके मासि अमुक राशिस्थे भास्करे अमुक पक्षे
अमुक तिथावारभ्य अमुक गोत्रः श्री अमुक देव शर्म्मा अमुक
देवताया अमुक मंत्रसिद्धि कामः रवि वारादि सर्व वारेषु

माषाढकीमसूरांश्च कोद्रकांश्चनकानपि। अन्नं पर्युषितं चैव
निःस्नेहं कीटदूषितं। रामार्चनचन्द्रिकायां। मैथुनं तत्कथालापं
तद्गोष्ठीं परिवर्जयेत् ऋतुकालं विना मंत्री स्वस्त्रियं नाभि
संस्पृशेत् लवणं चैव यत्क्षारं तथा तौद्रं रसान्तरं कौटि
ल्यं दोरमभ्यंगमनिवेदितभोजनं असंकल्पितकृत्यं च वर्ज्ज-
येन्मर्दनादिकं स्नायाच्च पंचगव्येन केवलामलकेन वा मंत्र
जप्तात्तु पानीयं स्नानाचमनभोजनं कुर्य्याद्यथोक्तविधिना
त्रिसंध्यं देवतार्चनं त्रिसंध्यमेकसंध्यं वा न मंत्रं केवलं
जपेत् शक्त्या त्रिसवनं स्नानमशक्तो द्विः सकृद्वा अस्नातस्य
फलं नास्ति न चातर्पयतः पितॄन् अपवित्रकरो नग्नः शिरो
ऽसं प्रावृतोपि वा प्रलपन् प्रजपेद्यावत्तावन्निष्फलमुच्यते।
नारदीये - मदुनोष्णं सुपक्वं च कुर्य्याद्वै लघुभोजनम् नैवेद्य-
यान्नं यथाशक्ति स्वधा भुंजीत साधकः। कुलार्णवे - यस्या
न्नपानपुष्टांगः कुरुते धर्म्मसंचयं अन्नदातुः फलस्यार्द्धं
कर्त्तुश्चार्द्धं न संशयः तस्मात्सर्व्वप्रयत्नेन परान्नं वर्ज्जयेत्सुधीः
पुरश्चरणकाले तु सर्व्वकर्म्मसु शंकरि जिह्वा दग्धा परान्नेन
करौ दग्धौ प्रतिग्रहात् परस्त्रीषु मनो दग्धं कथं सिद्धिर्वरानने।
परान्नं भिक्षेतरविषयं। भिक्षायाः तस्य स्वतंत्रोत्पादनात्।
तथा च - दैविकाचारयुक्तानां शुचीनां श्रीमतां सतां स-
त्कुलस्थानजातानां भिक्षाचाराय जल्पकं विहाय वर्त्तिं

अमुकदेवताया अमुकमंत्रस्य वारसंख्यकसहस्रजपरूप
पुरश्चरणमहं करिष्ये इति संकल्पयेत् ततः शेषदिने
तत्परदिने वा अद्येत्यादि अमुकदेवताया अमुकमंत्रस्य
रविवारावधिकरण वारसंख्यकसहस्रजपतद्दशांश
होमतद्दशांशतर्पणतद्दशांशब्राह्मणभोजनकर्म्मा
ण्यहं करिष्ये ततो दक्षिणा अद्येत्यादि कृतैतद्रवि
वारावधिकरण वारसंख्यक सहस्रजपतद्दशांश
होमतद्दशांशतर्पणतद्दशांशाभिषेकतद्दशांश
ब्राह्मणभोजनरूपपुरश्चरणकर्म्मणः सांगतार्थं
दक्षिणामिदमित्यादि।। तिथिपुरश्चरणे सर्व्वमेवं सर्व्वत्र
वारशब्दस्थाने तिथिशब्दप्रयोगः।। अथ मासपुरश्चर
ण संकल्पः अद्येत्यादि अमुकगोत्रः श्रीअमुकदेवशर्म्मा

नास्ति वस्तु किंचिद्दत्वाथवा परेभ्यः सति सम्भवे चात्र
संभवे तीर्थवासादि विशुद्धात् पर्वतादिरिक्ते ग्रामे गत्वा जपात्
तत्रासमर्थश्चेत्तद्दिनं विशुद्धाद्याचेत् यावद्दिनमात्रमर्थं रक्षा
ति रागादधिकं न सिद्धिः प्रज्ञायते कल्पशते रसुष्या सकृदुच्चारि
ते शब्दे प्रणवं समुत्कीर्त्तयेत् प्रोक्तेऽपारसवे सद्ये प्राणायामं स-
कुर्य्यात् बहुफलार्थी आचम्य न्यस्यंगानि ततो जपेत् इतोप्येवं
तथा स्पृश्य स्थानानां स्पर्शनेपि च एवमादीश्च नियमान् पुर
श्चरणकृच्चरेत् विण्मूत्रोत्सर्गशंकादियुक्तः कर्म्म करोति
यः जपार्च्चनादिकं सर्व्वमपवित्रं भवेत् प्रिये मलिनाम्बरकेशादि
मुखदौर्गंध्यसंयुतः यो जपेत्तं दहत्याशु देवता गुप्तसंस्थिता
आलस्यं जृंभणं निद्रां क्षुतं निष्ठीवनं भयं नीचांगस्पर्शनं कोपं
जपकाले विवर्जयेत् एवमुक्तविधानेन विलम्बं त्वरितं विना
उक्तसंख्यं जपं कुर्य्यात्पुरश्चरणसिद्धये देवतागुरुमंत्राणा
मैक्यं संभावयन्धिया जपेदेकमनाः प्रातः कालेमध्यंदिना
वधि यत्संख्या समारब्धं तत्कर्त्तव्यमहर्निशं यदि न्यूनाधिकं
कुर्य्याद्व्रतभ्रष्टो भवेन्नरः। गौतमीये - नवोत्तेन पतितं व्रात्यं
पिशुनं देवनिंदकं तथानास्तिकं विप्रं तथाविश्वविनिंदकं।
मुण्डमालायां - यत्संख्यया समारब्धं तज्जप्तव्यं दिने दिने
न्यूनाधिकं न कर्त्तव्यमासमाप्तं सदा जपेत् प्रजपेदुक्तसं-
ख्यायाश्चतुर्गुणं जपः कलौ।। अन्यत्रापि - कृते जपस्तु

अमुकदेवताया अमुकमंत्रसिद्धिकामः सूर्य्योदयात्समारभ्य
वसंतांतं यावत् अमुकदेवताया अमुकमंत्रस्य जपरूप
पुरश्चरणमहं करिष्ये अन्यत्र ग्रीष्मऋत्वादिव्यापक जपरूप
पुरश्चरणमहं करिष्ये एवं सर्व्वत्र।। जपान्ते पूजां कृत्वा दक्षि
णां कुर्य्याद्यथा। अद्येत्यादि अमुकदेवताया अमुकमंत्र
स्य वसंतऋतुव्यापक जपरूपपुरश्चरणकर्म्मणः सां
गतार्थं दक्षिणामिदमित्यादि। एवं सर्व्वत्र। तर्पणाभिषेक
प्रयोगो यथा आचम्य सामान्यार्घ्यं कृत्वा आसनशुद्धिं
कृत्वा प्राणायाम ऋष्यादिन्यास करांगन्यासौ च कृत्वा
ध्यात्वा मानसैः संपूज्य पुनर्ध्यात्वा जले देवं समावाह्य उद
कात्मकं अमुकदेवतायै नमः। उदकात्मक मर्घ्यं।

कस्योक्ते त्रेतायां द्विगुणो जपः द्वापरे त्रिगुणः प्रोक्तश्चतुर्गुणो
जपः कलौ । कुलार्णवे – न्यूनातिरिक्तकर्म्माणि न फलन्ति कदा
चन यथाविधिकृतान्येव तत्कर्म्माणि फलन्तीह भूशय्या ब्रह्म
चारित्वं मौनं चार्य्यसेविता नित्यं त्रिसवनं स्नानं क्षुद्रकर्म्म विव-
र्ज्जनं नित्यपूजा नित्यदानं देवतास्तुति पूर्ब्बकं नैमित्तिकार्च्चनं चैव
विश्वासो गुरुदेवयोः जपनिष्ठा द्वादशैते धर्म्माः स्युर्मन्त्रसिद्धिदाः
स्त्रीशूद्रपतितव्रात्य नास्तिकोच्छिष्टभाषणं असत्यभाषणं
चैव जृम्भणं परिवर्ज्जयेत् सत्येनापि न भाषेत जपहोमार्च्चना
दिषु अन्यथानुष्ठितं सर्व्वं भवत्येव निरर्थकं पुरश्चरणकालेतु
यदि स्यान्मृतसूतकं तथापि कृतसंकल्पो व्रतं नैव परित्यजेत् ।
योगिनीहृदये – शयीत कुशशय्यायां शुचिवस्त्रधरः सदा प्रत्यहं
क्षालयेत् शय्यामेकाकी निर्भयं स्वपेत् असत्यभाषणं वाच्यं कौटि
ल्यं परिवर्ज्जयेत् वर्ज्जयेद्गीतवाद्यादि श्रवणं नृत्यदर्शनं अ-
भ्यङ्गं गन्धलेपञ्च पुष्पधारणमेवच त्यजेदुष्णोदकेस्नानमन्यदेव
प्रमज्जनं । तत्रैव – नैकवासा त्यजेत्मन्त्रं बहुवासाकुलापि वा । वै
शम्पायनसंहितायां – विपर्य्यासं न कुर्य्याच्च कदाचिदपि मोहतः
उपर्य्यधो बहिर्वस्त्रे पुरश्चरणकृन्नरः विनियोगे निधानेतु भवे
दनियमः क्वचित् पतितानामन्त्यजानां दर्शने भाषणे श्रुते
क्षुतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत् तदाचम्य चेत्प्रा-
प्तो प्राणायामं षडङ्गकं कृत्वा सम्यग्जपेच्छेषं यद्वा सूर्य्यादि
दर्शनं । आदिशब्दाद्वह्नि ब्राह्मणञ्च । तन्त्रान्तरे – मनः संहरणं

इत्यनेन उदकाञ्जलिके रूपचारैः संपूज्य संध्योक्तविधिना
परिवारान् संतर्पयामि नमः इत्यनेन संतर्प्य आत्मानं
देवतारूपं ध्यात्वा नमो नमस्ते मुद्राया अमुकदेवता मम
भिषिच्यामि इति कुम्भमुद्रया मूर्द्धानमभिषिच्य संहारमुद्रया
देवं विसर्ज्जयेत् अथ श्रीदुर्गाया रहस्य पुरश्चरणं स्वतन्त्र
तन्त्रे – श्रीपार्व्वत्युवाच – कथयस्व महादेव सिद्धिकारण
मुत्तमं येन सिद्धिं समायान्ति सर्व्वे मन्त्राश्च सिद्धिदाः येषु येषु च
कालेषु पुरश्चरणं भवेद्ध्रुवं ॥ शिव उवाच कथयामि समासेन
शृणुष्व पर्व्वतात्मजे – मेषे दशसहस्रञ्च प्रजपेन्मन्त्रमुत्तमं
पुरश्चरणमेतद्धि जायते सुरवल्लभे वृषराशौ यदा मन्त्रम
मुत्तमं प्रजपेत्सुधीः तेन तत्र सुसिद्धिः स्यान्नात्र कार्य्या
विचारणा मिथुनेच तथा मन्त्री मयुतं मन्त्रमुत्तमं प्रजपेत्
प्रयतो नित्यं पुरश्चरणमुच्यते कर्कटे च यदा मन्त्री ह्ययुतं

शौचं मौनं मन्त्रार्थचिन्तनं अव्यग्रत्वमनिर्व्वेदो जपसंपत्तिहेतवः उष्णी
षी कञ्चुकी नग्नो मुक्तकेशो गणावृतः अपवित्रकरोऽशुद्धः प्रलपन्
जपेत्क्वचित् अनासनः शयानो वा गच्छन् भुञ्जान एव वा अप्रावृत
करो कृत्वा शिरो वा प्रावृत्यापि वा चिन्ताव्याकुलचित्तो वा क्रुद्धो
भ्रान्तः क्षुधान्वितः रथ्यायामशिवस्थाने न जपेत्तिमिरावृते
उपानद्गूढपादो वा यानशय्यागतोऽपि वा प्रसार्य्य न जपेत् पादौ
कुक्कुटासन एव वा न यज्ञकाष्ठे पाषाणे न भूमौ नासने स्थितः
च मार्ज्जारं कुक्कुटं क्रौञ्चं श्वानं शूद्रं कपिं खरं दृष्ट्वा
चम्य जपेच्छेषं स्पृष्ट्वा स्नानं विधीयते । सर्वत्र जपे अयं
नियमः मानसे तु नियमो नास्त्येव । तथा च – अशुचिर्वा
शुचिर्व्वापि गच्छन् तिष्ठन् स्वपन्नपि मन्त्रैकशरणो विद्वान्
मनसैव सदाभ्यसेत् न दोषो मानसे जाप्ये सर्व्वदेशेपि
सर्व्वदा । श्यामादि जपे तु तत्प्रकरणविशेषो वक्तव्यः । जप
फलमाह शिवधर्म्मे – जपनिष्ठो द्विजश्रेष्ठोऽखिलयज्ञ
फलं लभेत् सर्व्वेषामेव यज्ञानां जायतेऽसौ महाफलं जपेन
देवता नित्यं स्तूयमाना प्रसीदति प्रसन्ना विपुलान् कामान्

मन्त्रमुत्तमं प्रजपेत्प्रयतो नित्यं पुरश्चरणमुच्यते कर्क
टे च यदा मन्त्री सहस्रं प्रत्यहं जपेत् तेन सर्व्वार्थसिद्धिः स्या
त्पुरश्चरणकृद्भवेत् सिंहे च सर्व्वमन्त्राणामयुतानां दशं
जपेत् धर्म्मार्थकाममोक्षाणां फलभाग्भवति ध्रुवं कन्या-
यां च यदा मन्त्री मन्त्रं मन्त्रपरायणः सहस्रद्वादशं चैव ज-
पेन्नियममानसः पुरश्चरणमेतद्धि सर्व्वकामार्थसाधनं
इहलोके सुखं भुक्त्वा चान्ते देवीपुरं व्रजेत् तुलायां प्रत्यहं
मन्त्री सहस्रं साधको जपेत् अनेन विधिना देवि पुरश्च-
रणकृद्भवेत् वृश्चिके चायुतं मन्त्रं शय्यायां प्रजपेत्सुधीः
तेन सर्व्वार्थसिद्धिः स्यात्पुरश्चर्य्याफलं लभेत् धनुषि च
यदा मन्त्रे जपेदयुतमादरात् इहैव कन्दर्पसमो धनवान्
जायते सुधीः मकरे च यदा मन्त्रं जपेत् साधकसत्तमः
अयुतानि च चत्वारि प्रत्यहं जपमानसः धर्म्मार्थभाव
यन्नित्यं पुरश्चरणमुच्यते कुम्भे चैव यदा मन्त्रं जपे
दयुतमादरात् तेन सर्व्वार्थसिद्धिः स्यात्पुरश्चरणकृद्भ
वेत् मीने चैव यदा देवि प्रजपेदयुतद्वयं पुरश्चरणमित्याहुः

दधान्तुक्तिं च शाश्वतीं । पक्षरक्षः पिशाचाश्च ग्रहाः सर्पाश्च
भीषणाः ज्वलितं नोपसर्पन्ति भयभीताः समन्ततः । वाच्यनार
दीययोः । यावन्तः कर्मयज्ञाः स्युः प्रतिष्ठादितपांसि च सर्वे ते जप
यज्ञस्य कलां नार्हन्ति षोडशीं माहात्म्यं वाचिकस्यैतज्जप
यज्ञस्य कीर्तितं तस्माच्छतगुणोपांशुः सहस्रो मानसः स्मृतः
तथा च तन्त्रे - मानसः सिद्धिकामानां पुष्टिकामैरुपांशुकः वा-
चिको मारणे चैव प्रशस्तो जप ईरितः । गौतमीये - शक्त्या त्रिसन्ध्यं
नं स्नात्वा महाज्ञो हि सकृद्वा त्रिसन्ध्यं प्रजपेन्मंत्रं पूजनं
च समाचरेत् । संध्यात्रये पूजां कृत्वा जपमष्टोत्तरं शतं त्रिसन्ध्यं
पकदा वा भवेत्पूजा जपेत्पूजनं विना जपान्ते वा भवेत्पूजा
पूजान्ते वा जपेन्मन्त्रं प्रातः कालं समारभ्य जपेन्मध्यं
दिनावधि । मध्यंदिनावधीति नैनियम परं किंत्वधिक
काल व्यवच्छेदपरं । अन्यथा तत्समये जपनियमे कदा
चित् जिह्वाया जाड्याज्जाड्येन प्रतिनियत संख्याया अपूरणे
अधिकेनैव वा नियमभंगः स्यात् । मनः संहृत्य विषयात्

सर्वागम विशारदः । सर्वत्र जपनं कार्यं रात्रौ वा मैथुनेऽपि
वा शय्यायां विशेषेण परयोषित्समागमे त्रिविष्टपसदा
देवि जपेन्नियतमानसः एवंविधं जपं कृत्वा दशांशं
च तदाचरेत् दक्षिणां गुरवे दत्वा सिद्धिभाग् भव
ति ध्रुवं । येषु येषु नक्षत्रेषु जायते सिद्धिरुत्तमा
कथयामि समासेन शृणु त्वं पार्वतीजज्ञे आश्विन्यां
प्रजपेन्मन्त्रं साधकः सहस्रकं तेनास्मिन् सिद्धि
माप्नोति साधको नात्र संशयः द्वि सहस्रं यदा
मंत्रं भरण्यां च जपेत्सुधीः यश लोके परि
त्यज्य धनेन च धनाधिपः कृत्तिकायां जपेन्मं
त्रं द्वि सहस्रं च साधकः रोहिण्यां च यदा मंत्रं
जपेत्साधकसत्तमः सहस्रं वा शतं वापि
सर्वकाममवाप्नुयात् मृगशीर्षे यदा मंत्रं
नियतं प्रजपेत्सुधीः सहस्रपंचकं चैव दे-

मंत्रार्थगतमानसः नद्रुतं न विलंबं च जपेन्मौक्तिकहारवत् जा
पस्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः धियायदक्षरश्रेणीं
वर्णस्वरपदात्मिकां उच्चरेदर्थमुद्दिश्य मानसः जपः
स्मृतः । जिह्वौष्ठौ चालयेत्किंचिद्देवतागतमानसः
किंचित् श्रवणयोग्यः स्यादुपांशुः स जपः स्मृतः । वि
शुद्धेश्वरतंत्रे - निजकर्णागोचरो यः स जपो मान
सः स्मृतः । उपांशु निजकर्णस्य गोचरः परिकीर्तितः
मंत्रमुच्चारयेद्वाचा स जपो वाचिकः स्मृतः उच्चैर्जपादि
शिष्टः स्यादुपांशुर्दशभिर्गुणैः जिह्वाजपः शतगुणः
सहस्रो मानसः स्मृतः तंत्रांतरे उच्चैर्जपोऽधमः प्रोक्तः उपांशु
र्मध्यमः स्मृतः उत्तमो मानसो देवि त्रिविधः कथितो जपः जि
ह्वाजपस्तु विशेषः केवलं जिह्वया बुधैः वृत्तौ ह्रस्वो बाधितेन
रति दीर्घो बहुदायः अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत्
मनसा यत्स्मरेत्स्तोत्रं वचसा वा मनुं स्मरेत् उभयं निष्फलं याति
भिन्नभांडोदकं यथा गौतमीये यस्मारेस्यितामंत्राः
प्रोक्तो वर्णास्तु केवलाः सोहं मनध्वन्युच्चारिता प्रभुत्वं
प्राप्नुवंति ते मंत्राक्षराणीवित् प्राज्ञो प्रोतानि परिभाव
येत् तमेव परमव्योम्नि परमानंदबृंहिते दर्शयत्यात्म

आर्द्रायां जपते मंत्रं साधके हंसमाहितेः
स्यात्समो भवेत् ।
षट्सहस्रं यदा देवि सर्वकामार्थसिद्धये पुनर्वसुसमायो
गे सहस्रं मंत्रमुत्तमं जपनात्साधको नित्यं लभते च सुरो
त्तमं पुष्यायां च जपेन्मंत्रं सप्तानां च सहस्रकं तेन सर्वसु
सिद्धिः स्यात्सुरश्रेष्ठ र्याधिको विधि आश्लेषायां यदा मंत्रं मं
त्रीदेवेशि माहितः सहस्रषट्कं चैव जपेत्सर्वार्थसिद्धये द
शसहस्रं मघायां च जपेन्मंत्रं समाहितः पुरंदरसमो

सद्भावं पूजाहोमादिभिर्विना। गौतमीये दशाक्षर पटले – मूलमंत्रं
प्राणबुद्ध्या सुषुम्ना मूलदेशके मंत्रार्थं तस्य चैतन्यं जीवं ध्यात्वा
पुनः पुनः। कुलार्णवेऽपि – मनोऽन्यत्र शिवोऽन्यत्र शक्तिरन्यत्र
मारुतः न सिद्ध्यन्ति वरारोहे कल्पकोटि शतैरपि जात सूतक
मादौ स्यादन्ते च मृत सूतकं सूतक द्वय संयुक्तो यो मंत्रः सर्व
सिद्धिदः। तत्रैव – तस्माद्देवि प्रयत्नेन ध्रुवेण पुटितं मनुं
अष्टोत्तर शतं वापि सप्तवारं जपादितः जपान्ते च ततो जप्त्वा
चतुर्वर्ग फलाप्तये ब्रह्मबीजं मनोर्दत्वा चाद्यन्ते परमेश्वरि
सप्तवारं जपेन्मंत्रं सूतक द्वय मुक्तये मंत्रार्थं मंत्रचैतन्यं यो न
जानाति नवेत्तियः शतकोटि जपेनापि तस्य सिद्धिर्न जायते ह्रुम्
बीजाश्रये मंत्रा न दास्यन्ति फलं प्रिये मंत्राश्चैतन्य सहिताः
सर्व सिद्धि कराः स्मृताः चैतन्य रहिता मंत्राः प्रोक्त वर्णास्तु
केवलाः फलं नैव प्रयच्छन्ति लक्षकोटि शतैरपि मंत्रोच्चारे कृते
यादृक स्वरूपं प्रथमं भवेत् शते सहस्रे लक्षे वा कोटि जापेन
तत्फलं हृदये ग्रंथिभेदश्च सर्वावयव वर्द्धनं आनन्दाश्रूणि
पुलको देहावेशः कुलेश्वरि गद्गदोक्तिश्च सहसा जायते नात्र संशयः
सकृदुच्चरितेऽप्येवं मंत्रे चैतन्य संयुते दृश्यन्ते प्रत्यया यत्र पारं
पर्यं तदुच्यते मासमात्रं जपेन्मंत्रं भूतलिप्यादि संयुतं क्रमो
त्क्रमात्सहस्रं तु तस्य सिद्धो भवेन्मनुः। तच्च भूतलिपिः।
पंचह्रस्वाः संधि वर्णा व्योमेरावन्ति जलंधरा अन्त्यमाद्यं द्वितीयं
च चतुर्थं मध्यमं क्रमात् पंच वर्गा दशार्णाश्च स्युर्बीजं तत्स्वते
भूमिः सह एवा भूतलिपिः प्रोक्ता द्विचत्वारिंश दक्षरैः एवं
जपं पुरा कृत्वा तेजोरूपं समर्पयेत् देवस्य दक्षिणे हस्ते

दत्वा साधको विचरेद्भुवि एकादश सहस्रं तु यक्षिण्यये जपेत्
सुधी कुबेर इव वित्ताढ्यो जायते साधकोत्तमः उत्तरा त्रि-
तये देवि सहस्र द्वादशात्मका जप्यन्ते साधकेर्नित्यं सर्व
कामार्थ सिद्धये हस्तायां च जपेद्देवि त्रयोदश सहस्रकं
सूर्यस्येव समो भूत्वा विचरेद्भुवि साधकः चित्रायां च ज
पेन्मंत्रं द्वि सहस्रं च साधकः नानाभोग समायुक्तो भवे-
द्भुवि पुरंदरः स्वात्यां सर्वार्थ सिद्धिः स्याद्विसहस्रस्य जापतः

68

कुशपुष्पार्घ्य वारिभिः सफले तद्विभाव्यैवं प्राणायामं समा
चरेत् जपस्यादौ जपान्तेच त्रितयं त्रितयं चरेत्। शक्ति विषये
देव्या वाम हस्ते। तथाच – एवं जपं पुराकृत्वा गंधाक्षतकुशो
दकैः जपं समर्पयेद्देव्या वाम हस्ते विचक्षणः जपान्ते प्रत्यहं
देवि होमयेत् तद्दशांशकं तर्पणं चाभिषेकं च तत्तद्दशांशतो हुते
प्रत्यहं भोजयेद्विप्रान् न्यूनाधिक्य प्रशान्तये अथवा सर्व संपूर्णे
होमादिकं यथा चरेत्। मुंडमालायां – यस्य यावान् जपः प्रोक्त
तद्दशांशं जपः क्रमात् तत्तद्द्रव्यैर्जपस्यान्ते होमं कुर्याद्दिने
दिने लक्ष संख्यायां पूर्णायां होम माचरेत् तथा होमाद्यशक्तेश्च-
यद्यदङ्गं भवेद्भंगं। तत्संख्या द्विगुणो जपः होमाभावे जपः का
र्यो होम संख्या चतुर्गुणः विप्राणां क्षत्रियाणां च रससंख्या
गुणः स्मृतः वैश्यानां वसुसंख्याक मेषां स्त्रीणां मयं विधिः
पंचवर्णमास्थितः शूद्रः सच तस्य विधिं चरेत् अनाश्रितस्य
शूद्रस्य दिक् संख्या समीरितः शूद्रस्य विप्रभक्तस्य तत्पत्न्या
सदृशो जपः प्रपंचसारे योगिनी हृदये – होम कर्मण्यशक्तानां
विप्राणां द्विगुणो जपः इतरेषां तु वर्णानां सर्वेषां त्रिगुणो मतः
त्रिगुण इति त्रिगुणादि होम संख्या त्रिगुण जपः क्षत्रियेण कार्यः
वैश्येन चतुर्गुणः शूद्रेण पंचगुणः। तदुक्तं कुलप्रकाशे – यद्-
यदंगं विहीनं स्यात्संख्या द्विगुणो जपः कुर्वीत त्रि चतुः पंच
यथा संख्यं द्विजातयः एतेन स्त्रीशूद्राणां होमाधिकारः तथा
च शूद्राणां च्यस्तमीरितमिति कुंड प्रकरणे शारदायां स्त्रीणां
होमाधिकारश्च तत्रैव – लाजैस्त्रिमधुरोपेतैर्होमं कन्याप्रय
च्छति अनेन विधिना वश्यमेति वांछितं अतएव स्त्रीणां
होमाधिकारः सच ब्राह्मण द्वारा – तथा च तंत्रान्तरे –
ॐकारोच्चारणाद्धोमात् शालग्राम शिलार्चनात् ब्राह्म
णी गमनाच्चैव शूद्रश्चाण्डालतां व्रजेत् इति वाक्यावि
रोधात् तथा स्त्रीणामपि सर्व वैदिक कर्म्मसु शूद्र तुल्य
प्रतिपादनात् स्त्री शूद्र कर संस्पर्शो वज्रपातो ममोपरि

साधके हव्याहनगमि जायते नात्र संशयः विशाखायां
पदमंत्रं वसुः सहस्रकं प्रिये जपेच्च साधको नित्यं सोमवत्
प्रियदर्शनः अनुराधायां एवादेवि मंत्री मंत्रं सदा जपेत् पुत्र
पौत्र समायुक्तः खेचरो जायते ध्रुवं ज्येष्ठायां च पदामंत्रं
द्विसहस्रं विचक्षणः जपन्नाप्नोति सिद्धिं नात्र कार्या

इति भगवद्वचनात् । नृसिंहतापनीये तु — सावित्रीं प्रणवं यजुर्लक्ष्मीं
स्त्रीशूद्रयोर्नेच्छन्ति समृत्योऽधो गच्छन्ति नेच्छन्तीति पर्यन्तं पराशर
भाष्येऽपि गोविंदभट्ट धृतं । स्वाहा प्रणव संयुक्तं शूद्रे मंत्रं दददद्विजः
शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिं । यजुः देवः । लक्ष्मी श्री
बीजमित्यर्थः तथा नारायण कल्पेऽपि अष्टाक्षरो महामंत्रः सर्वार्थः
शूद्रयोषितः प्रणवादिश्च यो मंत्रो न स्त्रीशूद्रे प्रशस्यते इति सर्व
स्त्रीणां शूद्रप्रवक्तुर्वहारः शूद्रस्यापि स्वकर्तृक होमे इति केचित् । तथा
च वाराहीतन्त्रे । यदि कामो भवेत्तत्र शूद्रोऽपि होमकर्मणि वह्नि
जायां परित्यज्य हृदयांतेन होमयेत् । सर्वेषां त्रिगुण जपः तथा च
वाराहे — यदङ्गं विहीयेत तत्संख्या त्रिगुणो जपः कर्त्तव्यस्त्वांग
सिद्ध्यर्थं तदशक्तेन भक्तितः न वेदङ्गं विहीयेत तद्विशिष्टमवाप्नुयात्
विप्रभोजनमात्रेण व्यंगं सांगं भवेद्ध्रुवं यद्यद् भुंक्ते द्विजः साक्षा
त्तत्तद्भुंक्ते हविः स्वयं । तथागस्त्य संहितायां — यदि होमेऽप्यशक्तः स्यात्
पूजायां तर्पणेऽपि वा तावत्संख्या जपेनैव ब्राह्मणाराधनेन वा भवे
दंगरूपेनैव पुरश्चरणमाप्यवै । वीरतन्त्रे — नियमं पुरुषे ज्ञेया
न योषित्सु कथंचन न न्यासो योषितामत्र न ध्यानं न च पूजनं
केवलं जपमात्रेण मंत्राः सिद्ध्यंति योषितां । आचार्य्यमते विप्र
भोजनेऽप्यनुकल्पः । तथा च मुण्डमालायां — यदि पूजाद्यशक्त
स्त्वं द्रव्याभावेन सुंदरि केवलं जपमात्रेण पुरश्चर्या विधीयते ।
अत्र ब्राह्मणभोजनमावश्यकमेव — सर्वथा भोजयेद्विद्वान् कृत
संकल्पसिद्धये । विप्राराधनमात्रेण व्यंगं सांगं भवेद्ध्रुवं । कुलार्ण
वे — दीक्षाहीनांश्च यस्तु भोजयेद्वा स्वमंदिरे स याति परमे
शानि नरकानेकविंशतिम् — एवं यः कुरुते देवि पुरश्चरणकं
प्रिये सर्वपापविनिर्मुक्तो देवी सायुज्यमाप्नुयात् । तथा — तद्दक्षिणेन
विप्रांश्च कौलिकांश्च भोजयेत् क्षीरखण्डाद्यभोज्यैश्च बहुमानपुर
स्सरं । तत्रैव — गुरवे दक्षिणां दद्याद्भोजनाच्छादनादिभिः
गुरुसंतोषमात्रेण सर्वसिद्धिर्भवेद्ध्रुवं गुरोरभावे तत्पुत्राय तत्पत्न्यै
वा निवेदयेत् तयोरभावे देवेशि ब्राह्मणेभ्यो निवेदयेत् सम्यक् सिद्धिक
मंत्रस्य पंचांगोपासनेन च सर्वे मंत्राश्च सिद्ध्यंति तत्प्रसादात्कुले
श्वरि गुरुमूलमिदं सर्वमित्याहुस्तन्त्रवेदिनः एकग्रामे स्थितो नरः
नित्यं गत्वा वंदेत वै गुरुं गुरुरेव परं ब्रह्म तस्मात्तं नमस्येत्

विचारणा मालायां च जपेन्मंत्रं सहस्रपञ्चकं प्रिये नानासिद्धि
मवाप्नोति साधको नात्र संशयः श्रवणायां यदा मंत्रं द्विसहस्रं
जपेत्सुधीः अष्टसिद्धिर्भवेत्तस्य नात्रैव संशयः प्रिये धनिष्ठायां
जपेन्मंत्रं द्विसहस्रं समाहितः वरुणेन समो भक्त्या जायते ॥

तदन्ते महतीं पूजां कुर्य्यात्साधकसत्तमः सुवासिनीं कुमारींश्च भूषणै
रपि भूषयेत् मिष्टान्नं बहुशः कार्य्यं भुंजीत बन्धुभिस्सह एवं सि
द्धमनुर्मंत्री साधयेत्सकलेप्सितान् । तन्त्रे — अथवान्य प्रकारेण
पुरश्चरणमुच्यते ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्वमुपोषितः नद्यां
समुद्रगामिन्यां नाभिमात्रोदके स्थितः स्पर्शादिमुक्तिपर्यन्तं जपेन्मंत्र
मनन्यधीः । यदि नद्यादि दूषिता नदी भवति तदा कर्तव्यं तदाह
रुद्रयामले — अपि शुद्धोदके स्नात्वा शुचौ देशे समाहितः ग्रासादि मुक्ति
पर्य्यन्तं जपेन्मंत्रमनन्यधीः इति कृत्वा न संदेहो जपस्य फलभा
ग्भवेत् । नद्यभावे — यद्वा पुण्योदके स्नात्वा शुचिः पूर्वमुपोषितः
ग्रहणादिविमोक्षान्तं जपेन्मंत्रं समाहितः । उपवासासमर्थे तु
तत्रैव — अथवान्यप्रकारेण पौरश्चरणिको विधिः चंद्रसूर्यो
परागे च स्नात्वा प्रयतमानसः स्पर्शनादिविमोक्षान्तं जपेन्मंत्रं
समाहितः जपाद्दशांशतो होमं तथा होमात्तु तर्पणं तर्पणस्य द
शांशेन चाभिषेकं समाचरेत् अभिषेकदशांशेन कुर्य्याद् ब्राह्मण
भोजनं एवं कृत्वा मंत्रस्य जायते सिद्धिरुत्तमा गोपालमंत्र
तर्पणे तु होमसंख्यार्थं । यथा — इह गोपालमंत्राणां तर्पणे होम
संख्यया इत्यादि । इत्थं स्नात्वा स संकल्प्य विमोक्षान्ते जपं चरेत्
तावत् यत्नादिकं कुर्य्यात् ग्रहणान्ते शुचिः पुमान् एवं जपा
न्मंत्रसिद्धिर्भवत्येव न संशयः । ग्रहणे जपस्यावश्यकत्वं । आ
ख्यायेरनुरोधेन यदि जप्यं त्यजेन्नरः सम्भवेद्देवताद्रोही
पितृघ्नः सप्त नयेत्यधः । इति सनत्कुमारवचनात् वस्तुतस्तु
आरब्धे पुरश्चरणविषयमिदम् । तथाहि — आरब्धे पुरश्च
रणे यदि ग्रहणं भवेत्तदा शास्त्राद्यनुरोधेन जपं न त्यजेत्
एवं राज्ञावापि पुरश्चरणविषयं वेदितव्यमिति सर्वं समंजसं

साधको भुवि शतभिषायां यदा मंत्रं द्विसहस्रं जपेत्सुधीः
सम्मतपातकान्तु चोत्करणाग भवति ध्रुवं रेवत्यां च महा
मंत्रं बहुः सहस्रकं तथा जप्त्वा स्तुत्वा सदा देवि सोमलोकमवा
प्नुयात् रात्रौ वा मैथुने वापि शय्यायां च व्यवस्थितः प्रजपेत्सा
धको नित्यं साधयेत्तन्मनोहितं सर्वदा प्रजपेन्मंत्रं हविष्या
शी दिवा शुचिः दक्षिणां गुरवे दद्यात् यथाविभवविस्तरं
अथवान्यप्रकारेण पुरश्चरणमुच्यते वक्ष्यादिवर्णैनैव पुरश्च
रणमुच्यते । विस्कुंभादिषु योगेषु यो जपेज्जपसंख्यया सह
स्रं साधको नित्यं सर्वसिद्धिपरायणः पुरश्चरणमेतद्धि

योगिनीहृदये - कल्पोक्तविधिना मंत्री कुर्याद्धोमादिकं ततः
अथवा तद्दशांशेन होममार्ग्गांश्च समाचरेत् । तथा जपनन्तरं दशां
शेन क्रमाद्धोमादिकं चरेत् तदन्ते महतीं पूजां कुर्याद्ब्राह्मणभोजनं
ततो मंत्रस्य सिद्ध्यर्थं गुरुं संपूज्य तोषयेत् एवंच मंत्रसिद्धि
स्यादेवताच प्रसीदति । क्रियासारे - दीक्षाहीनाव यस्तत्र यस्तु
भोजयेद्वा स्वमंदिरे सयाति परमेशानि नरकानेकविंशतिम् - यद्यपि
पुरश्चरणमिदं पंचांगपरं तथापि - जपहोमौ तर्पणं चाभिषेकं
विप्रभोजनम् पंचांगोपासनं लोके पुरश्चरणमुच्यते । तथापि
ग्रहणादौ पुरश्चरणपदं गौणं जपमात्रपरं । स्पर्शादयान्तमारभ्य
यावत्सूर्योदयावधि तावत्तजपो महेशानि पुरश्चरणमिष्यते
इत्यादौ तथा दर्शनात् तत्र होमादेरभावात् नहि कथं ग्रहणपुरश्च
रणे होमादिरिति चेत् वचनादेव ज्ञायते नच पुरश्चरणस्य पंचांग
त्वात् सर्वत्र तदेवास्त्यादि वाच्यं ग्रहणे तद्विधानमनर्थकं स्यात्
किंच ग्रहणे होमादिनियमाभावात्तत्र होमादिः ग्रहणपुरश्चरणे
होमादिविधानस्तु प्रकृतिभूत पंचांग पुरश्चरणस्तुत्यत्व
बोधनाय अतएव ग्रहणे पंचांगस्वरूप पुरश्चरणे कृते
मुख्यप्रयोगे प्यधिकार इति प्रकटीकृतम् । तदकरणे केवल
जपमात्र पुरश्चरणे नाधिकार इति सर्वसम्मतमिति । पुरश्च
रणकालस्तु वशोहीतंत्रे - चंद्रतारानुकूले च शुक्लेपक्षे
शुभे हनि आरंभेत पुरश्चर्यां हरौसुप्ते नचाचरेत् ग्रहणे
चमहातीर्थे न कालमवधारयेत् । प्रातेप्रसवस्य रुद्रयामले -
कार्तिकाश्विन वैशाख माघेष मार्गशीर्षके फाल्गुणे श्रावणे
दीक्षा पुरश्चर्या प्रशस्यते ग्रहणेच महातीर्थे न काल
मवधारयेत् यत्तास्तेप्यस्तोदये दीक्षा पुरश्चरणयोर्निषेध

तंत्रे तंत्रे निरूपितं संक्रांतिषु च सर्वासु विषुवादिषु कार्त्तिके
संक्रांतेरनुसारेण वर्द्धयेच्च सहस्रकं पूर्वमुक्तो जपेन्मंत्रं यथा
र्थी सर्वदा प्रिये शत्रुनाशाय सततं प्रजपेन्मासिमोत्सवं: लो
कानां वश्यहेत्वर्थं लक्ष्म्यर्थं वा महाप्रिये उत्तराभिमुखो भूत्वा
जपेन्मंत्रं समाहितः शत्रुनाशाय सततं दक्षिणाभिमुखो जपे
दिति हरगौरीसंवादे रहस्यपुरश्चरणं ॥ अथ ग्रहणपुरश्चरणं
ग्रहणन्तु बहुधा राहोर्दर्शनं साधु चंडाल स्वरूप इति किंवदंती ॥
तस्य दर्शनं कथं पुरुषजनकमिति संदेहे मातृकाभेद तंत्रे

माह तन्त्रांतरे - ग्रस्तास्ते मुदिते नैव कुर्यादीक्षाजपं प्रिये कृते
नाशोभवेदाशु ह्यायुः श्रीसुत संपदां
अथ पुरश्चरणप्रयोगः तत्र तावद्भूमेः परिग्रहं कृत्वा पुरश्चरणा
प्राक् तृतीयदिवसे होमादिकं कृत्वा विधाय वेदिकामाश्चतुर्दिक्षु
कोणे क्रोशमेवं वा क्षेत्रं चतुरस्रं आहारादिविहारार्थं परिकल्प्य
तत्र कर्म चक्रानुरूपं मंडपं विधाय एकभक्तं च कुर्यात् तदपरदिने
स्नानादिकं विधाय शुद्धः सन् वेदिकाया आनुर्दिक्षु अश्वत्थोदुंबर
प्लक्षाणामन्यतमस्य वितस्तिमात्रान् दशकीलकान् ॐ नमः
सुदर्शनाय अस्त्राय फट् इति मंत्रेणाष्टोत्तरशताभिमंत्रितान् वेदि
काया दशदिक्षु येचात्र विघ्नकर्तारो भुविदिव्यन्तरिक्षगाः विघ्न
भूतास्त्रये चान्ये मम मंत्रस्य सिद्धिषु मयैतत्कीलितं क्षेत्रं परि
त्यज्यविदूरतः अपसर्पंतु ते सर्वे निर्विघ्नं सिद्धिरस्तुमे इत्य
नेनानिखनेत्य तेषु ॐ नमः सुदर्शनाय अस्त्राय फट् इति अस्त्रं
संपूज्य तेषु पूर्वादि क्रमेण इंद्रादि लोकपालान् पूजयेत् यथा -
ॐ भूर्भुवः स्वः इंद्रादिलोकपाल इहागच्छ इत्यावाह्य पंचोपचारैः
पूजयेत् एवं क्रमेणान्यानपि पूजयेत् तथाच मुंडमालायां - पुण्य
क्षेत्राणि वै कृत्वा कुर्याद्भूमि परिग्रहं तथास्यमुख मंत्रस्य पुरश्चरण
सिद्धये ममैषं गच्छतेभूमि मंत्रोयं सिद्धिदायिनी । तथाच -
ग्रामे कोशमितं स्थानं तथादेशेच्छया मतम् नगरादावपि
क्रोशं क्रोशयुग्ममथापि वा क्षेत्रं कायादि तु विहारार्थं प्रकल्प
येत् आहारादि विहारार्थं तावन्तीं भूमिमाक्रमेत् दीर्घ वक्षोद्भ
वान् कीलान् अस्त्र संजाप्य यंत्रितान् निखनेद्दशदिग्भागे ते
ष्वस्त्रंच प्रपूजयेत् लोकपालान् पुनस्तेषु गंधाद्यैः पूजयेत्सुधीरिति

षष्ठपटले - चंडिकोवाच - राहुग्रासोऽत्र विख्यातः सर्वत्र परमेश्वर
पुरुषं कथं कथं देव तस्य स्पर्शो द्विजः करे निरूपके तथा नाथ
चेतिमे संशयो हृदि कथयस्व परानंद यज्ञादन्यं प्रकाशय ॥ श्रीशंकर
उवाच ॥ शृणु सर्वांग सुभगे ग्रहणं चोत्तमोत्तमं ग्रहणं त्रिविधं
देवि चंद्रसूर्याग्नि संयुतं शक्रे ललाटे नेत्रे च वह्नि स्तिष्ठति सर्वदा
वामनेत्रे तथा चंद्रो दक्षे सूर्यः प्रतिष्ठितः शंभुनम्येन देवेशि
स्मरणं क्रियते यदि तदेव ग्रहणं देवि शक्ते युक्तः सदाशिवः वामनेत्रे
चुंबिते च भास्कर ग्रहणं तथा ललाटे चुंबिते चाग्नि ग्रहणं परमेश्वरि
शिवबीजं यतो वह्नि रेतोरूपः सुरेश्वरि राहुशिवः समाख्यातः

ततो मध्यस्थाने क्षेत्रपालं वास्तोष्पतिं च संपूज्य सर्वविघ्नविनाशार्थं
गणपतिं पूजयेत् यथा- ॐ अद्येत्यादि मम कर्तव्यामुककर्मणि चतुरक्षर पुरश्चरणक
र्म्मणि विघ्नविनाशार्थं गणेशपूजामहं करिष्ये इति संकल्प्य वेदिका
मध्ये पंचोपचारैर्गणेशं पूजयेत् तदुक्तं- क्षेत्रपालादिकं पूजयेद्
विधानतः क्षेत्रेशं वास्तुनाथानं विघ्नराजं समर्चयेत् दिक्पालेभ्यो
बलिं दद्यात्ततः क्षेत्रं समाविशेत् ततो माषभक्तादिना पूजितदे
वताभ्यो बलिं दद्यात् ॐ ये रौद्रा रौद्रकर्म्माणो रौद्रस्थाननिवासिनः
मातरोप्युग्ररूपाश्च गणाधिपतयश्च ये विघ्नभूतास्तथैवान्ये दि
ग्विदिक्षु समाश्रिताः सर्वे ते प्रीतमनसः प्रतिगृह्णन्त्विमं बलिं इत्य
नेन दध्यादिकुम्भस्तेभ्यो बलिं दद्यात् ततो गायत्रीं जपेत् तथा च-
प्रातः स्नात्वा तु गायत्र्याः सहस्रं प्रयतो जपेत् ज्ञाताज्ञातस्य पापस्य
क्षयार्थं प्रथमं ततः विप्रान् संतर्पयेद् यत्नोपरण्याच्छादनासनैः
बहुभिर्वस्त्रभूषाभिः संपूज्य गुरुमात्मनः आरभेत् जपं पश्चात्तत
दनुज्ञापुरःसरमिति मंत्रभेदेन व्यवस्था गायत्री पुनरत्र देवता
याय यायो गोविंद वृंदावने- जपात्पूर्वं जपेत्क्लृ इत्थं गायत्रीं सर्व

स्त्रिगुणः शान्तिरीरिता शिवशक्त्या समायोगात् पूरणं परमेश्वरि शिव
शक्त्यासमायोगकालो ब्रह्ममयः प्रिये अत एव महेशानि शक्त्यादी
न्न विचारयेत् निषिद्धदिवसे योगे तु यद्योगं परमेश्वरि तदेव परमेशा
नि शक्त्यादिगणनं चरेत् शिवशक्तिसमायोगात् सर्वत्र सुखमयं जगत्
मासपक्षतिथीनां च नो ज्ञायं परमेश्वरि दृष्टिमात्रेण जप्तव्यं तदा
सिद्धो भवेद् ध्रुवं तत्कालं परमं कालं विहितं पंचीरवंदिते तत्र यद्यत्
कृतं सर्वं बहुकिं कथ्यते मया एतत्तु गुप्तं मे देहि तव स्नेहान्मयाकाशि
तं न वक्तव्यं यथोरत्ये प्राणांतेपि सुरेश्वरि अज्ञानं तत्फलं कीर्तिता
त्र जपदशांशहोमादिकमपि न कर्त्तव्यं तदुक्तं गायत्रीतंत्रे प्रथम
ब्राह्मणपरिच्छेदे- चंद्रसूर्योपरागे च जप्त्वा ब्रह्ममयो भवेत्
मंत्रस्य परमेशानि न च होमादिकं चरेत् कृते होमादिके भ्रष्टे तत्
पंचपुष्टं भवेत् जपमात्रे महेशानि अनंतफलमुर्यथा अनंतस्यम

पापस्यामुक प्रमाणेन पत्रसोन्यून हिमवे इति कस्य गायत्री स्वर
सादन्यत्रापि तथा अत एव सोमसूर्यग्रह साधारणमिति तत्पुन
रत्यंत पापशंकया अद्येत्यादि ज्ञाताज्ञात पापक्षयकामः अ-
धोत्तरसहस्र सावित्री जपमहं करिष्ये इति संकल्प्य जपेत् तत्र
उपवासं हविष्यं वा कुर्यात् परदिने उक्तस्नानादिकं
कृत्वा स्वस्तिवाचनपूर्वकं संकल्पं कुर्यात् ॐ अद्येत्यादि
अमुकदेवतायाः अमुकमंत्रसिद्धि प्रतिबंधकाशेषदुरित
क्षयपूर्वकं तन्मंत्रसिद्धिकामोऽद्यारभ्य यावत्कालेन स्ये
त्स्यामि तावत्कालं अमुकमंत्रस्य उक्तसंख्यक जप तद्दशांश
तर्पण तद्दशांशाभिषेक तद्दशांशब्राह्मणभोजनरूप पुरश्चर-
णमहं करिष्ये इति संकल्प्य भूतशुद्धि प्राणायामादिकं कृत्वा स्व
स्वमुद्रां बध्वा स्वस्व पद्धत्युक्तक्रमेण देवतां संपूज्य दीपं प्रज्वलि
ताकारां देवतां हृदये कृत्वा प्रातःकालमारभ्य मध्यंदिन
यावत् जपं कुर्यात्- ततो होम तत्तत्तर्पणम् - कुलार्ण
वे- तर्पणस्तु ततः कुर्यात् तीर्थोदैश्चंद्रमिश्रितैः जलैर्देवं
समावाह्य पात्राद्येरुपचारकैः- संपूज्य विधिवद्भक्त्या पारि
वारसमन्वितं पद्मैकमंजलिं तोयं परिवारान् प्रतर्पयेत्

हेशानि दशांशकेन जायते। क्राक्षानंदतरंगिण्यां दादसोल्लास
धृत वीजार्णव तन्त्रीय षोडश पटले- एकदा परमेशानि कामा
ख्यायां महेश्वरि दृष्टोपरागं यत्कार्यं तच्छृणुष्व वरानने
कुतः स्नानं कुतः संध्या प्राणायामः कुतः प्रिये भूतशुद्धिः
कुतो भद्रे कुतः पूजा वरानने कालातीतभयादेव सर्वं सं
त्यज्य कामिनि संकल्पं मानसं कृत्वा जपं कृत्वा वरानने पंचांगै
र्विहीनोपि सिद्धो भवति नान्यथा मंत्रं विद्या महेशानि कवचं
स्तवमेव वा ध्यानं वा परमेशानि न्यासं वा कमलेक्षणे एकोच्चारेण
गिरिजे तद्भवेद् दशकोटयः अशेषं तज्जपं देवि ग्रहणे चंद्रसूर्ययोः
तत्कथं परमेशानि क्रियते जपसंख्यकं अत एव महेशानि होमो
नास्ति शुचिस्मिते अभिषेकं च देवेशि तथा तर्पणमेव च भोजनं च
महेशानि नास्त्यत्र कमलानने चंद्रसूर्यग्रहे देवि पंचांगं
नास्ति कामिनि पंचांगेन विहीनोपि सिद्धो भवति नान्यथा
संकल्पं विधिवद्देवि मानसं यदुपस्थितं तत्संकल्पं विजानीयात्
ग्रहणे चंद्रसूर्ययोः तस्मात्तु चपलापांगि संकल्पं नैव कारयेत्
संकल्पमानसं देवि चतुर्वर्गफलप्रदं ततोपि मानसं देवि


ततो होमं दशांशेन तर्पयेत्परदेवतां संपूर्णायास्तु संख्यायाः पुनरेकैकमंजलिं। तर्पण वाक्यांतु स्नान प्रकरणे वक्तव्यं अथाभिषेक वाक्यं तु - तमोऽहं त्वां मूलमुच्चार्य्य अमुक देवतामहमभिषिंचामि इति करस मुद्रया स्वमूर्द्धि अभिषेचयेत्। तथाच गौतमीये - तमोऽहं त्वां मूलमुच्चार्य्य तदंते देवताभिधां। द्वितीयां तामहं पश्चादभिषिंचाम्यनेन तु अभिषिंचेत्स्वमूर्द्धानं तोयैः कुम्भाख्य मुद्रया। शाक्तविषये नील तंत्रे - मूलांते तामचोच्चार्य्य सिंचामीति नमः पदमिति ततो ब्राह्मणान् भोजयित्वा दक्षिणां कुर्य्यात् ऊँ अद्येत्यादि कृतैतदमुक देवताया अमुक मंत्र पुरश्चरण कर्म्मणः सांगतार्थं दक्षिणामिदं कांचनं वान्हि दैवतं अमुक गोत्राय गुरुवे तुभ्यमहं संप्रददे। ततोऽच्छिद्रावधारणं।

मुख्यं संकल्पमीरितं व्यर्थं हि स्थूल संकल्पं ग्रहणे परिकीर्तितं संकल्पेन विनादेवि यत्किंचित्कुरुते नरः व्यर्थमेव हितं सर्वं तस्मात्तत्स्नानकं परम्। प्रथमे प्रहरे देवि चंद्रग्रासं यदा भवेत् तद्दिवदिवसे भुक्त्वा सत्वरं नरकं व्रजेत् निशीथे तु यदा देवि ग्रसेच्चंद्रं यदा तमः तद्दैवदिवसे भुक्त्वा पीत्वानन्दमयो भवेत् चंद्र ग्रहणाः कालेतु जप यत्नादिकं चरेत् रात्रौ भुक्त्वा च पीत्वा च जप यत्नादिकं चरेत् सर्वेषु विद्या मंत्रेषु सौर गाणपत्ये तथा शाक्ते मंत्रे महेशानि प्रशस्तः सततं जपः इति वीजार्णवे तंत्रे शिवेन परिकीर्तितं एतत्कल्पे सानिलां त्वल्पानि नामपि चोच्यते। गांधर्वे। अथवान्य प्रकारेण पुरश्चरणमुच्यते ग्रहणेऽर्कस्य चेंदोर्वा शुचिः पूर्वमुपोषितः नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः ग्रहणादि विमोक्षान्तं जपेन्मंत्रं समाहितः दृष्ट्वा स्नात्वा स संकल्पो विमोक्षान्तं जपं चरेत् जपस्यतु दशांशेन होमं कुर्य्याद्यथाविधि होमार्थं तद्विगुणितं जपेन्मंत्रं समाहितः। होमस्य तु दशांशेन तर्पणं समुपाचरेत् अभिषेकं दशांशेन ब्राह्मणान् भोजयेत्ततः तदंते महतीं पूजां कुर्य्यात्साधक सत्तमः गुरुवे दक्षिणां दत्वा भक्त्या विप्रांश्च तर्पयेत्। काली तंत्रे। अथवान्य प्रकारेण पुरश्चरणमिष्यते चंद्र सूर्य्य ग्रहे चैव ग्रासादवधि विमुक्तितः यावत्संख्यं मनुं जप्त्वा तावद्धोमादिकं चरेत्। यामले - अर्घि शुद्धपदके स्नात्वा शुचौ देशे समाहितः ग्रासादिमुक्ति पर्य्यंतं

अथ ग्रहण पुरश्चरण संकल्पः तद्यथा - ऊँ अद्येत्यादि राहुग्रस्ते दिवाकरे निशाकरे वा अमुकगोत्रः श्री अमुकदेवशर्म्मा अमुकदेवताया अमुक मंत्र सिद्धि कामो ग्रासादि मुक्ति पर्य्यंतं अमुक मंत्र जप रूप पुरश्चरणमहं करिष्ये। इति संकल्प्य जपेत् तत्सद्दिने तदपरदिने वा स्नानं विधाय ऊँ अद्येत्यादि अमुक मंत्रस्य कृतैतद् ग्रहण कालीन इयत्संख्यक जप तद्दशांश होम तद्दशांश तर्पण तद्दशांशाभिषेक तद्दशांश ब्राह्मण भोजन कर्म्माहं करिष्ये इति संकल्प्य होमादिकं कर्म्म कृत्वा पूर्ववत् दक्षिणादिकं कुर्य्यादिति पुरश्चरण प्रयोगः॥


जपेन्मंत्रमनन्यधीः एवं जप्त्वाप्यसंदिग्धो जपस्य फलभाग्भवेत् ग्रहण पूर्वाह्ने उपवासाशक्तस्य फल दुग्धादि भोजनं प्रमाणायात् हविष्याचरणं शास्त्रं निमित्तानि स्वदेये तस्मांगत्वा भावादुपवासं विनैव पुरश्चरणमिति गुरवः अत्र शाक्तस्कुवर्णिणः एके गौरिव सोपतीति निंदा श्रवणमुपदिष्ट विषयं उपादिष्टस्य तु जपस्यावश्यकत्वं, नेथ हिंसा वदितिमन्याः सनत्कुमारीये - श्राद्धादेरलरोधेन यदि जापं त्यजेन्नरः सभवेद्देवता द्रोही पितृन् समनयत्यधः इत्यारव्य पुरश्चरण विषयंस्य

अथ वीर पुरश्चरणं - लक्षमात्र जपेनैव पुरश्चरणमुच्यते क्षत्रियाणां द्विलक्षं स्याद्वैश्यानां च त्रिलक्षकं शूद्राणां तु चतुर्लक्षं पुरश्चरणमुच्यते लक्षमात्रं जपेद्देवी हविष्याशी दिवा शुचिः रात्रौ निशीथे तो वक्त्रे पीत्वा कुलरसं प्रिये कुर्यान्नारीगणोपेतो जपेन्मंत्र मनन्यधी एवमत्र विधानेन दशांशं होममाचरेत् तद्दशांशं तर्पणं च तद्दशांशाभिषेचनं तद्दशांशं विप्रभोज्यं कीर्तितं परमेश्वरि पुष्परामकरंदेन होम तर्पणमाचरेत् ~~तद्दशांशं तर्पणं~~ एवं प्रयोगमात्रेण सिद्धो भवति नान्यथा वाक्सिद्धिं लभते देवि कवित्वं निर्मलं प्रिये धनेनाधि कुबेरः स्याद्विद्यया स्याद्बृहस्पतिः एकस्य जीपतो मत्वा मंत्रे शक्ति सर्वामुपायात् प्रयोगारंभ कालेच सुरा दुग्धमयी भवेत् लोहितं वा भवेद्देवि मांसं पुष्पसमं भवेत् सुरापात्रं भवेद्रत्नं मांसं वा त्र विशेषतः कलाकलान्तरं चैव पुष्पं पुष्पान्तरं भवेत् नवनीतं मांसतुल्यं मांसं पुष्पं भवेत्प्रिये एवं नाना साधकेंद्रो जायते च क्रमेण तु पश्चात् प्रत्ययो देवि लभते नात्र संशयः




RESEARCH LIBRARY
J. & K. GOVT. SRINAGAR
MS No.
Date





NATIONAL MISSION FOR MANUSCRIPTS
MANUS DATA

DSO 00001 7992

Record No.	Organization / Individual 7992

Name of the Institution: Oriental Research Library University Campus, Hazaratbal, Srinagar. ✗ Personal Collection	Communication Address: Department of Libraries and Research Municipal Complex, Karanagar, Srinagar.

Title of the Text: Tantrasāra Other Title	Bundle No: ✗ Acc. No./Manuscript No. 2498
Author: N.G	No. of Folios 125 Pages 250
Commentary: NO	Size of Mss. 34×21 Cms Material: Paper/palm leaf/birch-bark/cloth/leather/others
Commentator: NO	Missing portion NO
Language: Samskrit	Illustrations yes Complete/Incomplete
Script: Devanāgri	Condition: Good/bad/brittle/worm eaten.Fungus/Stuck
Date of Manuscript	Source of Catalogue: Descriptive/Hand list/Alphabetical/Index card
Key words: Tantra	Colour of Manuscripts: Cream Red. Blue
Subject: Tantra	Remarks: with out Binding.

02.05.06